तस्मै ज्ञानस्वरूपाय दक्षिणामूर्तये नमः ॥

यत्पादरेणुसम्पर्काद्विशुद्धिं याति मे मनः ।
अपरं दक्षिणामूर्तिं तमानन्दगिरिं भजे ॥

आनन्दशैलाङ्घ्रिसरोजभृङ्ग-
मानन्दसान्द्रामृतपूर्णरूपम् ।
आसेतुमेरूपचितप्रकाश-
माराद्भजे यादवचक्रशैलम् ॥

ग्रन्थग्रन्थिविभेदेन मन्दोपकृतिसिद्धये
अमृतानन्दयतिना व्याख्येयं सम्प्रणीयते ॥

न्यायदीपावल्याख्यं प्रकरणं चिकीर्षुराचार्यश्चिकीर्षितस्य प्रकरणस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचरपरिपालनाय च विशिष्टदेवतानमस्कारलक्षणमङ्गलाचरणं मुखतस्सम्पादयन्नर्थाद्विषयादिकञ्च सूचयति—जगदङ्कुरकन्दायेत्यादिना ॥

End:

उपसंहरति— इतीति । श्रोतॄणां प्रवृत्तिसिद्धये स्वकीयग्रन्थं स्तौति—श्रीमदिति । अमृतधारा विबुधानान्देवानामानन्ददायिनी कृतिस्तु विशिष्टानांबुधानामित्यमृतधारासाम्यमिति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्य ज्योतिरानन्दपूज्यपादशिष्यभगवदमृतानन्दमुनिविरचितायां न्यायदीपावलीन्यायविवेकाख्यव्याख्यायां प्रथमानुमानं समाप्तम् ॥

Subject: Nyāyadīpāvalīvyākhya; Nyāyaviveka; Prathamānumāna only.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 7453. The work is not noticed by Dr. Burnell in his Catalogue under this number.

॥ न्यायदीपावलीव्याख्या—न्यायविवेकः ॥

7462. NYĀYADĪPĀVALĪVYĀKHYĀ—NYĀYAVIVEKAḤ.

Burnell's Catalogue No. 9786 a. Page 94. Right column. Substance—Palm leaf. Size—13½ × 1 inches. Leaves—25 (14-38). Lines—6 to a Page. Script—Grantha. No. of Granthas—.00. Author—Amṛtānandamuni. Complete, Printed,

Beginning, end, colophon and subject—Same as No. 7461.

Remarks:—The Ms. is in a decaying good condition. The other works contained herein are:—

1 न्यायदीपावलीव्याख्या—१

2 न्यायदीपावलीव्याख्या—प्रमाणमाला,

3 प्रमाणमालातात्पर्यटीका

॥ न्यायापदेशमकरन्दः ॥

7463. NYĀYĀPADEŚAMAKARANDAḤ.

Burnell's Catalogue No. 9778. Page 94. Right column. Substance—Palm leaf. Size—16 × 1 inches. Leaves—99. Lines—3 or 4 to a Page. Script—Telugu. No. of Granthas—2000. Author—Ānandabodhayati. Complete. Printed.

Beginning:

श्रीमहागणपतये नमः ॥

यद्भासा निखिलं विभाति विषयो योनिः स्वयं ज्योतिषां
यस्याहुर्भुवनोद्भवस्थितिलयान् लीलामयान् सूरयः ।
यच्चागोचरमामनन्ति मनसां वाचाञ्चविश्वात्मने
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥

निबन्धपुष्पजालानि धियाऽलोक्य प्रयत्नतः ।
सन्न्यायमकरन्दानां समूहः क्रियते मया ॥

इह खलु केचित्प्रतिक्षेत्रं क्षेत्रज्ञभेदमाचक्षाणाः तत्र व्यवस्थान्यथानुपपत्तिं प्रमाणमाचक्षते ॥

End:

सदा तु बाध्यतैवानिर्वाच्यलक्षणमिति स्थितिः । तदानिर्वाच्यविलक्षणैवाविद्यानिवृत्तिरबाध्यत्वात् न चैवमनिर्वाच्यलक्षणमतिव्यापकमिति सकलमनाविलम् ॥

Colophon:

नानानिबन्धकुसुमप्रचया...
न्यायापदेशमकरन्दकदम्ब एषः ।
आनन्दबोधयतिना निधिना गुणानां
आनन्दहेतुरलक(लङ्क)धियाभ्यधायि ॥

नानानिबन्धकमलाकरराजिभृङ्ग—
लीलाजुषा विरचिता सुधिया विदोषा ।
आनन्दबोधयतिना निधिना गुणानां
न्यायापदेशमकरन्दलवावलीयम् ॥

श्रीगुरुभ्यो नमः ॥

Subject: Nyāyāpadeśamakaranda.

Remarks:—The Ms. is in good condition.

This work has been published in the Chowkhāmbā Sanskrit Series Nos. 38, 62, 87, 117.

॥ न्यायापदेशमकरन्दः ॥

7464. NYĀYĀPADEŚAMAKARANDAḤ.

Burnell's Catalogue No. 9779. Page 94. Right column. Substance—Palm leaf. Size—15×1 inches. Leaves—68. Lines—6 to a Page. Script—Grantha. No. of Granthas—2000. Author—Ānandabodha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7463.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायापदेशमकरन्दव्याख्या—विवेचनी ॥

7465. NYĀYĀPADEŚAMAKARANDA-VYĀKHYĀ—VIVECANĪ.

Burnell's Catalogue No. 9781. Page 94. Right column. Substance—Palm leaf. Size—16×1¼ inches. Leaves—87 (76-162). Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—2000. Author—Sukhaprakāśamuni. Complete. Printed.

Beginning:

कन्दर्पदर्पभिदुरं छिदुरं प्ररूढ-

मोहान्धकारस्तनोर्विदुरं यथावत् ।

सर्वस्व तत्कृतमुपा ....।

................................॥

..............परिचर्याविकस्वरम् ।

मदीयम्मानसं न्यायमकरन्दे प्रसीदतु ॥

सुखप्रकाशमुनिना प्रसन्नोक्तिरविस्तरा ।

टीकेयं क्रियते न्यायमकरन्दविवेचनी ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनकामश्शिष्टाचारपरिप्राप्ततया कृत्यामिष्टदेवतानमस्कारमाचरन् शिष्यशिक्षार्थं ग्रन्थतः प्रतिपादयन् प्रकरणस्यार्थादभिधेयसम्बन्धप्रयोजनानि दर्शयति— यद्भाक्षेत्यादिना ॥

End:

केषां किम्प्रयोजनहेतुतयाऽयं ग्रन्थो विहित इति अत आह— आनन्दहेतुरिति ॥ अकलङ्कधियां सन्देहविपर्यासाद्यादि कलङ्करहितबुद्धीनां भृङ्गायमाणानामानन्दहेतुरित्यनुगन्तव्यम् । लोके मकरन्दस्य भ्रमरानन्दहेतुत्वादकलङ्कधियामानन्दहेतुदर्शनेन च ग्रन्थस्यादुष्टताप्रतिपादितेति मन्तव्यम् , दुष्टस्य तदानन्द हेतुत्वाभावात् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनिपूज्यपादशि-

स्पश्रीसुखप्रकाशमुनिविरचिता न्यायमकरन्दविवेचनी

समाप्ता ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Nyāyamakarandavyākhyā, Nyāyamakarandavivecanī.

Remarks:—The Ms. is in good condition.

Ānandabodha's Nyāyāpadeśamakaranda has been commented upon by Citsukhamuni in his Vivṛti and Citsukha's pupil, Sukhaprakāśa in his Vivecanī. The above described Ms. represents the latter commentary. The Chowkhāmba edition of the Nyāyāpadeśamakaranda contains also the former commentary. The latter has not yet been printed.

This author has also written a commentary upon his Guru's (Citsukhamuni) Tattvapradīpikā. He lived during the middle of the 17th century A. D. This author seems to have written a commentary on Ānandabodha's Pramāṇamālā also.

॥ न्यायमकरन्दव्याख्या—विवेचनी ॥

7466. NYĀYAMAKARANDAVYĀKHYĀ—VIVECANĪ.

Burnell's Catalogue No. 9782. Page 94. Left column.

Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—69. Lines—9 to a Page. Script—Grantha. No. of Granthas—2200. Author—Sukhaprakāśamuni. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7465.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायमकरन्दव्याख्या—विवेचनी ॥

7467. NYĀYAMAKARANDAVYĀKHYĀ—VIVECANĪ.

Burnell's Catalogue No. 9780. Page 94. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—81 (69-139). Lines—7 or 9 to a Page. Script—Grantha. No. of Granthas—2200. Author—Sukhaprakāśamuni. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7465.

Remarks:—The Ms. is in a fairly good condition Dr. Burnell has noticed this under Nyāyāpadeśmakaranda.

॥ न्यायमकरन्दव्याख्या—विवेचनी ॥

7468. NYĀYAMAKARANDAVYĀKHYĀ—VIVECANĪ.

Burnell's Catalogue No. 9788. Page 94. Right column. Substance—Palm leaf. Size—16 × 1 inches. Leaves—68. Lines—6 to a Page. Script—Grantha. No. of Granthas—2000. Author—Sukhaprakāśamuni. Incomplete. Not printed.

Beginning:

प्रयोजनरस...माचार्यस्य गुरुनमस्कार इति द्रष्टव्यम् ।

तं व्यासक्षमते त्यत्र जीवे.... ।

End:

बाधकं विना ज्ञानस्य निर्विषयत्वकल्पने अतिप्रसङ्गात्

अपरोक्षज्ञाने तु परमते अतीतादिविषये निर्विषयत्वं वक्त-

व्यमेव तस्मान्नासत् ज्ञानं ।

Subject: Nyāyamakarandavyākhyā—Vivecanī.

Remarks:—The Ms, is in a fairly good condition.

॥ मध्वतन्त्रमुखमर्दनं (सव्याख्यम्) ॥

7469. MADHVATANTRAMUKHAMARDANAM (SAVYĀKHYAM).

Burnell's Catalogue No. 6592. Page 110. Right column. Substance—Paper. Size—7×4½ inches. Sheets—68. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—1760. Author—Appayyadīkṣita. Complete. Printed

Beginning

उदात्ते + मुकुन्दः ॥ १ ॥

मध्वतन्त्रमुखमर्दनं मया यत्कृतं प्रकरणं मिताक्षरम् ।

तत्स्वरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥ २ ॥

श्रीगणेशाय नमः ।

आनन्दतीर्थप्रवर्तितं शारीरकशास्त्रप्राथमिकपक्षाधि-
करणीप्रक्रियां शाथस्तन्मतमर्यादयैव दूषयितुं प्रकरणमार-
भमाणः शारीप्सितप्रकरणनिर्विघ्नपरिसमाप्त्यादिप्रयोजना-
यादौ त्रिशिष्टेष्टदेवतानुसन्धानसंकीर्तनरूपं मंगलमाचरन्ने-
व प्रकरणारम्भं तावदाक्षिपति—

शिवं विष्णुं वा यथाभिदधाति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहिनिन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥ १ ॥

End:

तेनैव देहेन स्वप्ने मुक्तौ च व्यवहारानपि वदन्तो दे-
हात्मवादिन इति सामर्थ्यात् असुरशब्देनातिशयोक्त्या परे
निर्दिष्टाः । मुख्याः मुखे वदने भवाः । तेन मुखवर्तिनश्च ।
अथ स्वनाम, ग्रन्थनाम च कीर्तयन् प्रकरणसमाप्तिं
दर्शयति—

Colophon:

विद्वद्दुरीर्विजितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः मितचन्द्रमौलि-
रस्यप्पयदीक्षित इति प्रथितस्तनूजः ॥
सोऽय मितपद्यमकरोत्
महितार्थं मध्वशास्त्रमुखभंगम् ।

प्रीत्यै पुरामरातेः अकिमाक्षि

.... ॥

मध्वशास्त्रमुखमर्दनेमनाक्

अप्पदीक्षितकृताविदं बुधाः ।

पश्यत प्रणयतः स्वचेतसा

पञ्चमाधिकरणस्य दूषणम् ॥

Subject: Madhvatantramukhamardana with the author's own'commentary which is an unfavourable criticism of the Dvaita view of the Vedânta religion and philosophy as held by Madhvâcârya and his followers.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell leaves this Ms. as an anoymous work and fragment.

This is a work of dialectics, engaged in a downright criticism of the Dvaita Vedânta Its author is the famous Appayyadîkṣita. The text is written in 61 Sragdharâ verses and a commentary is added by the author himself. The work has been received with a counterblast from the followers of Ānandatîrtha, in the shape of a work called 'Appayyadîkṣitakapolacapetikâ'. Both the works are available in print in South India in Grantha characters. This commentary is also called Vyadhva-vidhvamsanam.

॥ मध्वतन्त्रमुखमर्दनं(सव्याख्यम्) ॥

7470. MADHVATANTRAMUKHAMARDANAM (SAVYĀKHYAM).

Burnell's Catologue No 9766 b. Page 98. Right column.

Substance—Palm leaf Size—19½ × 1⅓ inches. Sheets—40 (59-98) Lines—5 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning—Same as No. 7469.

End :

कापालिकादिभिक्षुकस्यांगच्छेदकण्टकर्दमतप्तवालुकाश्रयादिभिः महद्दुःखमनुभवन्नपि न तत्प्रयुक्तं नैच्चमनुभवति । किंतु.......... ।

Colophon: Nil.

Subject : Madhvatantramukhamardana with the author's own commentary.

Remarks:—The Ms. is in good condition. The other work contained herein is—

तप्तमुद्राविद्रावणम् ।

Dr. Burnell does not notice the work of Appayyadīkṣita in this bundle and calls all the 98 leaves as Taptamudravidrāvaṇa.

॥ मध्वतन्त्रमुखमर्दनं (सव्याख्यम्) ॥

7471. MADHVATANTRAMUKHAMARDANAM (SAVYĀKHYAM).

Burnell's Catalogue No. 9767. Page 93. Right column. Substance—Palm leaf. Size—18¼ × 1⅓ inches. Leaves—58. Lines—8 to a Page. Script—Grantha. No. of Gran-

thas—2000. Author—Appayyadīkṣita. Incomplete. Wants end. Printed.

Beginning:

लवलीकान्ताय नमः ॥

Same as No. 7469.

End:

तस्माद्यत्तेऽनुपास्यं विमलसुखतनुब्रह्मकूटस्थमिष्टं
शास्त्रे तस्मिन्विचार्यं गमितमुपनिषद्भिस्त्वया मुक्तभोग्यम् ।
सोऽसावानन्द एवेत्युचितमसुमतामावृतो यस्त्वयोक्त-
स्तद्भेदे नास्तिमानं किमपि निगमतो लाघवेनैक्यसिद्धेः ॥५६॥

* *

स्वकल्पितार्थैरिच्छायगृहीतं तदीयानिर्युक्तिकाद्यधिकर-
णस्थितीमां मथनेन यु......न मात्रं कृतं तच्च सन्निराद·
रणीयम् । आप्यमूलत्वादित्याह—आद्रियध्वमिदं....

Colophon: (Leaf No. 55)

इत्यप्पदीक्षितेनेयं मध्वोपक्रममक्रमम् ।
तद्रीत्यैव मतं ध्वस्तं संक्षेपेण समन्ततः ॥

Subject. Madhvatantramukhamardana with the author's own commentary.

Remarks :—The Ms. is in a fairly good condition. This Ms. has been transcribed in the library vide T. V. No. 440.

॥ सिद्धान्तलेशसङ्ग्रहः ॥

7472. SIDDHĀNTALEŚASAṄGRAHAḤ.

Burnell's Catalogue No. 6803. Page 88. Right column.

Substance—Paper. Size—11½×5½ inches. Sheets—84 (35+25+15+9) Lines—12 to 15 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Appayyadīkṣita. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान्सम्प्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥

* *

तत्र तावदात्मा वा अरे द्रष्टव्यः श्रोतव्यः इति अधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मात्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः स किंविध इति चिन्त्यते ॥

End:

सिद्धान्तरीतिषु मया भ्रमदूषितं स्यात्
स्यादन्यथापि लिखितं यदि किञ्चिदस्य ।
संशोधने सहृदयाः सदया भवन्तु
सत्सम्प्रदायपरिशीलननिर्विशङ्काः ॥ ३ ॥

Colophon:

इति श्रीसिद्धान्तलवसङ्ग्रहे चतुर्थः परिच्छेदः ॥

Subject: Siddhāntaleśasaṅgraha an epitome of various

views regarding Advaitavedānta and the means of effecting the union of the soul with the Supreme Brahman. 1-4 Paricchedas.

Remarks :—The Ms. is in good condition. On the title page is given:—

हे पुस्तक श्रीमन्तराजेश्री शरभोजिमहाराजसाहेबयांच्या कार-

दींत काशीदेशाहून खरीदीकरून आणिलें असें ॥ '

The Siddhāntaleśasangraha of Appayyadīkṣita in 4 Paricchedas brings together and examines the several divergent schools of thought on certain topics of the Advaita. It has been commented upon by Acyutakṛṣṇāranda, pupil of Svayamprakāśānanda.

The work together with the commentary has been published as No, 5 in the Advaitamañjarī Series, printed at the Śrī Vidyā Press, Kumbhakonam. The Śrī Vāṇi Vilās Press is also bringing out a new edition of this work with the commentary.

SIDDHĀNTALEŚASANGRAHA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7473	B. L. 6372	Paper.	11¾×5	72	10 or 11	Devanāgarī.	Complete. 1-4 Paricchedas.
7474	„ 9808	Palm leaf.	19×1¾	24 (28-51)	14	Telugu.	Complete 1-4 „
7475	„ 9806	„	17½×1¼	104 (out of 118, 1-4, 7-9, 17 & 58 are missing)	5	Grantha.	Incomplete. 1-3 „
7476	S. S. 94 b	„	15¾×1½	86	8	Grantha.	„ „ „
7477	B. L. 9876	„	17×1½	58	10	„	Incomplete. the 4th is incomplete.
7478	S. S. 91	„	„	75	8-9	„	„ „ „
7479	N. S. 6	Paper.	9½×4¾	77	11	Devanāgarī.	„ „ „
7480	B. L. 6481	„	8¾×4¾	50	10	„	„ 1 & 2 only.

SIDDHĀNTALEŚASAṄGRAHA (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7481	B. L. 9807	Palm leaf.	15×1	27	5	Grantha.	,, I only.
7482	,, 6372	Paper.	10×4¼	16	9	Devanāgarī.	,, I incomplete.

DETAILED REMARKS

on the

SIDDHĀNTALEŚASAṄGRAHA MSS.

IN THE ABOVE TABLE.

7476 The other works contained herein are—

सन्तानगोपालमन्त्रम्

and a loose verse on Śiva.

7480 On the title page is given—

तुळजामहाराजभोसलस्येदम् ।

7481 On the title page is given—

विक्रमसंवत्सर वेदान्तसिद्धान्तलेसंग्रह * लिहिलें असें ।

॥ सिद्धान्तलेशसङ्ग्रहव्याख्या—कृष्णालङ्कारः ॥

7483. SIDDHĀNTALEŚASAṄGRAHAVYĀKHYĀ—KṚṢṆĀLAṄKĀRAḤ.

S. S. Collection No. 93.

Substance—Palm leaf. Size—17½ × 1⅝ inches. Leaves—76. Lines—5 to 7 to a Page. Script—Telugu. No. of Granthas—2200. Author—Acyutakṛṣṇānandatīrtha. Incomplete Printed.

Beginning:

श्रीकृष्णं मनसा ध्यात्वा श्रीकृष्णं सम्प्रणम्य च ।

व्याख्यातोऽयं परिच्छेदः श्रीकृष्णपरितुष्टये ॥

आपत्कायं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ।

कृष्णा कृष्णस्य दु....तं कृष्णं संश्रयेऽन्वहम् ॥

. भेदाभेदे ब्रह्मप्राप्तिरूपमोक्षस्य विद्यैकप्राप्यत्वमुक्तं ।
तत्र विद्याप्राप्यत्वमुपेत्य मोक्षस्यैकपदं लभ्यं । साधना-
न्तरव्यवच्छेदमसहमानः समुच्चयवादी प्रत्यवतिष्ठते ।

End:

अविरोधत्वमैश्वर्यविशेषणं तदनुगुणेति । ऐश्वर्यानुगुणे-
त्यर्थः । समृद्धत्वमीश्वरभावापत्तिविशेषणम् ॥

Colophon.

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयम्प्रकाशानन्दसरस्वतीदि-
व्यश्रीचरणारविन्दसंलग्नरजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ
शास्त्रसिद्धान्तलेशसङ्ग्रहव्याख्यायां कृष्णालङ्काराख्यायां चतुर्थः
परिच्छेदस्समाप्तः ॥

श्रीकृष्णचरणद्वन्द्वे स्मर्तॄणां मङ्गलप्रदे ।
योगिध्येये कृतिरियमलङ्कारार्थमर्पिता ॥

Subject: Siddhāntaleśasaṅgrahavyākhyā, Kṛṣṇālaṅkāra; A commentary on Siddhāntaleśaṅgraha of Appayadīkṣita; Paricchedas 3 and 4.

Remarks:—The Ms. is in a fairly good condition.

Acyutakṛṣṇānanda, the author of this commentary, Kṛṣṇālaṅkāra on the Siddhāntaleśasaṅgraha is a papil of Svayamprakāśayati. He is identical with the author of the Siddhānta siddhāñjana and the Taittarīyopaniṣad Bhāṣyaṭīkā, called Vanamālā. (vide notes under Siddhāntasiddhāñjana).

The work has been published as No. 5. in the Advaitamañjarī Series, Kumbhakonam.

॥ अद्वैतदीपिका ॥

7484. ADVAITADĪPIKĀ.

Burnell's Catalogue No. 6277. Page 89. Left column. Substance—Paper. Size—11½ × 4¼ inches. Sheets—184. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—7400. Author—Nṛsimhāśramin. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

यस्मादभूद्भुवनानुभवात्सुखाब्धेः

विश्वं मरीचिमरुवारिसं(समं) मुरारेः ।

तस्यालयो निखिललोकसुमङ्गलानां

पुण्यं वपुः प्रकटमस्तु ममार्चसिंहम् ॥

 

अथाधीतसांगाध्ययनस्य साधनचतुष्टयसंपन्नस्य आपातप्रतिपन्नब्रह्मात्मैक्यजिहासोः तत्प्रतिपादकानि बहूनि वाक्यानि दृश्यन्ते— तत्त्वमस्यहंब्रह्मास्मीत्येवमादीनि ।

End:

सत्यज्ञानानन्दानन्तात्मनः तत्पदलक्ष्यस्य स्वरूपमा-

भ्रामेदो महावाक्येन प्रतिपाद्यत इति सिद्धं ।

*   *

अहं कियानेषगुरोः प्रसादः

क वाऽस्मेरन्द्रैर्मनसाऽप्यलभ्यः ।

प्रसादिते देववरे मुरारौ

न किंचिदप्राप्यमिहेति मन्ये ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यभगवज्जगन्नाथाश्रमशिष्य श्रीमन्नृसिंहाश्रमकृतौ अद्वैतदीपिकायां चतुर्थः परिच्छेदः समाप्तः ।

Subject: Advaitadīpikā a treatise on Advaitavedānta 1-4 Paricchedas.

This work is in 4 chapters which are named as follows—

1—Sākṣiviveka.

2—Vibhāgaprakriyā.

3—Āupaniṣadadīpikā.

4—Ānandadīpikā.

Remarks:—The Ms. is in good condition. On the title page is given—

(विद्वत्प्रभुवरश्रीमल्लिनाथकृतनूभुवः ।

प्रभोर्यसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥)

श्रीमत्परमहंसपरिव्राजकोत्तमश्लोकतीर्थस्वामिशिष्याणां स्वयंप्रकाशतीर्थानामिदं पुस्तकम् ।

The Advaitadīpikā of Nṛsimhāśramin is a Vedāntic treatise in 4 chapters. In the introductory verses the author mentions his two gurus—Śrī Jagannāthāśramin and Śrī Gīrvāṇendrasarasvatī The latter was his Mantraguru and the work was under-taken at his command.

The work has appeared as a reprint from 'The Pandit'.

॥ अद्वैतदीपिका ॥

7485. ADVAITADĪPIKĀ.

Burnell's Catalogue No. 6276. Page 69. Left column.
Substance—Paper Size—10½×4 inches. Sheets—213 (189+24). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—7100. Author—Nṛsimhāśramin. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7484.

Remarks:—The Ms is in a good condition.

॥ अद्वैतदीपिका ॥

7486. ADVAITADĪPIKĀ.

Burnell's Catalogue No. 9650. Page 69. Left column.
Substance—Palm leaf. Size—17½×1¼ inches. Leaves—142. Lines—8-9 to a Page Script—Grantha. No. of Granthas—4000. Author—Nṛsimhāśramin. Incomplete. Printed.

Beginning:

...भोगातिशयार्थं ह्यात्मनोऽनेकशरीरपरिग्रहः । न च

निरात्मशरीरेषु भोगः संभवति...भावात् ।

अन्यथा दृष्टान्तवैषम्यादहं ब्रह्मास्मि तत्त्वमेव त्वमेव

तत् आत्मा ब्रह्मैवात्र ह्यवे न... ।

Colophon: (Leaf No. 110.)

इति श्री + अद्वैतदीपिकायामौपनिषद्दीपिकाख्यो द्वितियः परिच्छेदः

Subject: Advaitadīpikā 1-3 Paricchedas.

Remarks:—The Ms. is in a fairly good condition. There is a transcript copy of this Ms. in the library. Vide T. V. No. 285.

॥ अद्वैतदीपिका ॥

7487. ADVAITADĪPIKĀ.

S. S. Collection No. 95 a.

Substance—Palm leaf. Size—17 × 1½ inches. Leaves—75. Lines—9-11 to a Page. Script—Grantha No. of Granthas—3000. Author—Nṛsimhāśramin. Incomplete. Printed.

Beginning:

.. शब्दापरोक्षे वक्ष्यामः । एतो नष्टो घटः ध्वस्तो घटः

इत्यादि प्रतिबन्दि परमे पराकृता(?) तत्रेच्छा.... ।

End:

परसुखे च तदिष्टमेव यच्चहमर्थस्वभावरूपाज्ञानाश्र-

यस्तेनेत्यादि तद...तस्याज्ञानाश्रयाभेदात् श्वेतो धावती-

तिवदज्ञ इति प्रतीत्युपपत्तेः । यत्तु जन्मविषयज्ञानाभावात्

घटभज्ञानामीत्यनुभवो भावविषय एवेति तत्र ॥

Colophon: (Leaf No. 41)

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमज्जगन्नाथाश्रमभगवच्छिष्य-
श्रीनृसिंहाश्रमकृतौ अद्वैतदीपिकायां साक्षिविवेको नाम
प्रथमः परिच्छेदः ।

Subject: Advaitadīpikā.

Remarks:—The Ms. is in a decaying condition. The other work contained herein is—

'वासुदेवमननसङ्ग्रहः'

॥ अद्वैतदीपिकाव्याख्या ॥

7488. ADVAITADĪPIKĀVYĀKHYĀ.

Burnell's Catalogue No. 6278. Page 89. Left column. Substance—Paper. Size—$11\frac{3}{4} \times 5$ inches. Sheets—891. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—14290. Author—Nārāyaṇāśramin. Complete. Printed.

Beginning:

श्रीगुरुभ्यो नमः ।

यज्जिज्ञासा यज्ञदानादिभिस्स्यात्
श्रुत्वा मत्वा चिन्तया यत्प्रबोधः
यस्मिन् बुद्धे बाध्यतेऽनर्थमूलं
तं भूमानं भावये स्वात्मरूपम् ॥

प्रारिप्सितस्य प्रकरणस्य + मंगलं कुर्वन् अर्थात्प्रकरण-
स्याधिकारिविषयप्रयोजनानि निर्दिशति । यस्मादिति ।

End:

प्रंसगादिति । यदंभः परिपीतं एतच्छमयतीत्य-
न्वयः । अन्येषां किमित्येतादृशगुर्वनुग्रहो नेति शङ्कां निरा-
कुर्वंस्तस्य ईश्वरप्रसादलभ्यतयातिदुर्लभतामाह— अह-
मिति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनृसिंहाश्रमपूज्यपादशि-
ष्य श्रीनारायणाश्रमविरचिते अद्वैतदीपिकाविवरणे आ-
नन्ददीपिकाख्यः चतुर्थः परिच्छेदः ।

Subject: Advaitadīpikāvyākhyā, known as Vivaraṇa, A commentary on Advaitadīpikā of Nṛsimhāśramin by his pupil Nārāyaṇāśramin. 1-4 Paricchedas.

Remarks:—The Ms. is in a fairly good condition. This Ms. has been transcribed in the library vide T. V. No. 343.

Nārāyaṇāśramin, the author of this commentary Vivaraṇa, on his Guru's Advaitadīpika, should have flourished in the latter half of the 16th century. He is identical with the author of the Bhedadhikkāra Satkriyā, described below.

The work has been issued, along with the Advaitadīpikā as a reprint from 'The Paṇḍit'.

॥ अद्वैतदीपिकाव्याख्या ॥

7489. ADVAITADĪPIKĀVYĀKHYĀ.

Burnell's Catalogue No. 6279. Page 89. Left column.
Substance—Paper. Size—$12\frac{1}{4} \times 5$ inches. Sheets—293 (94+99+100). Lines—13 to a Page Script—Devanāgari. No. of Granthas—14000. Author—Nārāyanāśramin. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7488.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:

विद्वत्प्रभुवरश्रीमाद्विनायकतनूभुवः ।
प्रभोर्वैसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

After the colophon of second pariccheda is given the following:

श्रीमत्परमहंसपरिव्राजकोत्तमश्लोकतीर्थस्वामिशिष्याणां स्वयंप्रकाशतीर्थानामिदं पुस्तकम् ॥)

॥ तत्त्वविवेकः ॥

7490. TATTVAVIVEKAḤ.

Burnell's Catalogue No. 6804. Page 89. Left column.
Substance—Paper. Size—$13\frac{1}{2} \times 5$ inches. Sheets—89. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1880. Author—Nṛsimhāśramin. Complete. Printed.

Beginning:

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

विश्वस्य योनिं विश्वेशं विज्ञानानन्दविग्रहम् ।
नरकेसरिणं वन्दे प्रत्यञ्चं पुरुषोत्तमम् ॥

साक्षात्कृतब्रह्मभासाप्रहसन्मुखपङ्कजम् ।
महीयांसमहं वन्दे गरीयांसं जगत्पतिम् ॥

गुरुणा करुणापूर्वमुपदिष्टाद्द्वयात्मनः ।
कुर्वे तत्त्वविवेकं तं प्रीयतां नरकेसरी ॥

इह खलु कश्चित् विपश्चित् कुतश्चिद्भाग्योदयाभिर्व्यलीकं नित्यादिभिराराधिताराध्यपादभगवदनुग्रहादतिविमलमानसस्स्वयमेवेत्थं जगत्तत्त्वमालोचयति ।

End:

अत एव तस्या उद्देश्यत्वं । नित्यसिद्धाविद्यानिवृत्तेरप्यविद्यारूपाभावप्रमादशायां लोके तदुपपत्तेः । तस्मात्सिद्धं जीवस्याद्वैतब्रह्मसाक्षात्कारात् भेदभ्रमानिवृत्त्या सच्चिदानन्दावाप्तिरिति ।

जिज्ञासितव्यमनवद्यपुमर्थसिद्ध्यै
प्रज्ञाद्दशं स्वमहिमानमशेषयोनिः ।

श्रेयोऽस्तु नो नरमृगाकृतिमंगलाङ्घ्रिः ॥

तुष्यन्त्यव्यक्तवचसा मुक्तस्य पितरो ननु ।
मम त्वत्प्रीतये भूयाद्वाणीयं नरकेसरिन् ॥

काहं महीयसा शास्यं वात्सल्यं क गुरोरिदम् ।
अपि चण्डालकलशे भासते खलु भास्करः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमज्जगन्नाथाश्रमिपूज्यपादशिष्य श्रीनृसिंहाश्रमिमुनिविरचिते तत्त्वविवेके द्वितीयः परिच्छेदः ।

Subject: Tattvaviveka, a critical dissertation on the Advaita-Vedānta in 2 Paricchedas by Nṛsimhāśramin a pupil of Jagannāthāśramin.

Remarks:—The Ms. is in a fairly good condition.

The Tattvaviveka has been printed in the Pandit and it has been also issued as a reprint therefrom.

॥ तत्त्वविवेकः ॥

7491. TATTVAVIVEKAḤ.

Burnell's Catalogue No. 9513 a. Page 89. Left column. **Substance**—Palm leaf. Size—18½ × 1½ inches. Leaves—15 (1-15). Lines—9 to a Page. Script—Telugu. No. of Granthas—600. Author—Nṛsiṃhāśramin. Incomplete. Printed.

Beginning—Same as No. 7490.

End:

आत्मनि कर्तृत्वाध्यासोऽपि अन्तःकरणोपाधिकः,
अहं करोमीत्यनुभवात् । (सधीः) स्वप्नो भूत्वा इमं लोक-

मनुसञ्चरतीति श्रुतेश्च । तस्मान्निरस्तसमस्तकर्तृत्वाद्यनर्थ-
निरतिशयानन्दात्मकचैतन्यं त्वंपदलक्ष्यं जीवस्वरूपम-
विद्ययाभिन्नमिव कर्तृत्वादियुक्तमिव च प्रतीयत इति
सिद्धम् ।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यजगन्नाथाश्रमपूज्यपादशिष्य नृ-
सिंहाश्रममुनिविरचिते तत्त्वविवेके प्रथमः परिच्छेदः ।

Subject: Tattvaviveka first Pariccheda only.

Remarks:—The Ms. is in good condition. The other works contained herein are—

1. Pancapādikā, 2. Tattvaviveka.

॥ तत्त्वविवेकः ॥

7492. TATTVAVIVEKAḤ.

Burnell's Catalogue No. 9813

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—29 (1-29). Lines—9 to a Page. Script—Grantha. No. of Granthas—1000. Author—Nṛsimhāśramin. Complete. Printed.

Beginning:

................................दिष्टाद्वचात्मनः ।
कुर्वे तत्त्वविवेकं तं वीक्षतां नरकेसरी ॥

Same as No. 7490.

End:

न चैवं ज्ञानवैकल्यापत्तिः । ज्ञानाभावकाले कल्पितावि-
द्यादे.........वृत्तेरपि प्रवृत्त्यङ्गसाध्यत्वसंभवात् तेन विना
तस्याभावमात्रावस्थानाभावात् । अत एव तस्या उद्देश्य-
त्वं । नित्यसिद्धाविद्यानिवृत्तेरपि अविद्यारूपाभावः.... ॥

Colophon: (Sheet No. 20)

इति श्रीमत् + प्रथमः परिच्छेदः ॥

Subject: Tattvaviveka, 1-2 Paricchedas; the II pariccheda is incomplete.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 7491.

॥ तत्त्वविवेकः ॥

7493. TATTVAVIVEKAḤ.

S. S. Collection No 124 a.

Substance—Paper. Size—11½ × 5½ inches. Sheets—1-26. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1330. Author—Nṛsiṃhāśramin. Complete. Printed.

Beginning end, colophon and subject—Same as No. 7490.

Remarks:—The Ms. is in good condition. The other work contained herein is Tattvavivekavyākhyā.

॥ तत्त्वविवेकव्याख्या—अद्वैतरत्नकोशः ॥

7494. TATTVAVIVEKAVYĀKHYĀ—ADVAITARATNAKOŚAḤ.

Burnell's Catalogue No. 6308. Page 89. Left column. Substance—Paper. Size—10½ × 5¼ inches. Sheets—116. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4300. Author—Nṛsiṁhāśramin. Complete. Not printed.

Beginning:

श्रीनृसिंहाय नमः ।

यदालिङ्ग्य प्रमाणानि बोधयन्त्यात्मनस्स्फुटम् ।
प्रमेयं प्रचुरानन्दं तं वन्दे नृहरिं गुरुम् ॥

प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयादिदर्शयन्नेव निर्विघ्नपरिसमाप्तिकामनया कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति । विश्वस्येति । प्रत्यञ्चं पुरुषोत्तमम् वन्द इत्यनेन जीवब्रह्माभेदः तत्त्वमस्यादिवाक्यार्थः प्रकरणप्रतिपाद्यो दर्शितः ।

End:

स्वकृतिं परमेश्वराय निवेदयंते—तुष्यन्त्विति । स्वस्येदं सामर्थ्यं गुर्वायत्तमिति दर्शयन् गुरुं महीकरोतीत्याह । अ(का)हामिति ।

यद्वीक्षणेन सन्तुष्टं मायाविक्रीडितं जगत् ।
नरसिंहस्य तस्यैषा कृतिः कल्याणदाऽस्तु वः ॥

अरुचिरिहनकार्या साधवस्साध्वसाधु-
प्रकटनपटुचेतोऽमत्सरंवो यदि स्यात् ।
नहि कुशलपरीक्षादक्षचित्ताः कथंचित
शतमखमणिमालां काचबुध्योत्सृजन्ति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्य श्रीनरसिंहाश्रममुनिविरचिते अद्वैतरत्नकोशाख्ये तत्त्वविवेकदीपने द्वितीयः परिच्छेदः । इति तत्त्वविवेकव्याख्यानं समाप्तम् ।

Subject Tattvavivekavyākhyā known as Advaitaratnakośa or Tatvavivekadīpana, commentary by the author on his own text of Tattvaviveka.

Remarks:—The Ms. is in a decaying condition.

Dr. Burnell, on the strength of a remark by Dr. Hall, doubts whether this commentary, Advaitaratnakośa, on the Tattvaviveka, is by Nṛsimhāśramin himself or by one of his pupils. A glance at the opening words of the commentary Kośa Ratnaprakāśa, by Anubhavānanda

(...नृसिंहाश्रमो नाम & स्वयमेव स्वकृततत्त्वविवेक व्याख्यामद्वैत-रत्नकोशाख्यामारभमाणः...)

leaves no room for Dr. Burnell's doubt.

ADVAITARATNAKOŚA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7495	B. L. 6802	Paper.	$10\frac{1}{2} \times 4\frac{1}{2}$	144	10	Devanāgarī.	Complete,
7496	„ 9655	Plam leaf.	$17\frac{1}{2} \times 1\frac{1}{2}$	147	7	Grantha.	„
7497	„ 9656	„	$17 \times 1\frac{1}{2}$	85 (20-114)	9	„	„
7498	S. S. 124 b	Paper.	$11\frac{1}{2} \times 5\frac{1}{2}$	71 (27-100)	15	Devanāgarī.	„
7499	B. L. 9814 a	Plam leaf.	$18\frac{3}{4} \times 1\frac{1}{2}$	79 (16-94)	9	Telugu.	Incomplete; wants end.
7500	„ 9658	„	$16 \times 1\frac{1}{2}$	60 (75-134)	8	Grantha.	„ ; wants beginning.
7501	J. L. 978	Paper.	$11\frac{1}{4} \times 3\frac{1}{2}$	75 (25-99)	8	Devanāgarī.	„ I Pariccheda; wants beginning.

DETAILED REMARKS

on the

ADVAITARATNAKOŚA MSS. IN THE ABOVE TABLE.

7498 On the title page is given—

'इदं पुस्तकं अक्षयलिङ्गशास्त्रिणः ।'

7499 The other work contained herein is the Catussūtrī portion of the Śaṅkarabhāṣya.

॥ अद्वैतरत्नकोशव्याख्या ॥

7502. ADVAITARATNAKOŚAVYĀKHYĀ.

Burnell's Catalogue No. 9796 b. Page 94. Right column. Substance—Palm leaf. Size—18×1 inches. Leaves—173. Lines—7 to a Page. Script—Grantha. No. of Granthas—5000. Author—Anubhavānanda. Incomplete. Not printed.

Beginning:

जिज्ञासापदमीशानं जगतो योनिमव्ययम् ।
सच्चिदानन्दमद्वैतं सर्वेश्वरमहं भजे ॥

कृष्णानन्दयतीश्वरं गुरुवरं पापापहं पापिनां
पापव्यापहमन्वहं परहितव्यापारमानन्ददम् ।
शिष्या यस्य कटाक्षलेशपतनात्कार्तार्थ्यभाजो भृशं
वेदान्तार्थरहस्यवेदिनमहं तं नौमि सर्वेष्टदम् ॥

महेश्वरानन्दतीर्थं महेशापरविग्रहम् ।
शंकरं शंकरानन्दं उभौ वन्दे मुहुर्मुहुः ॥

कैवल्यरूपं कलये तीर्थं कैवल्यनामकम् ।
कैवल्यकारिणं पुंसां कैवल्येच्छावतां गुरुम् ॥

शुद्धानन्दयतीश्वरस्य शुभदं वन्देऽङ्घ्रिपद्मद्वयं
शुद्धब्रह्मविचारमार्गकुशलस्वान्तस्य शुद्धिप्रदम् ।
शुद्धत्वादपि कायकर्मवचसामानन्दहेतोर्नृणां
शुद्धानन्द इति प्रसिद्धिरमला यस्यार्थतो नामतः ॥

भुवि कश्चनपूर्णनामको विशिखो विष्णुमयोऽसितच्छदः ।
त्रिपुरात्मविभेदने पटुः भवसन्तापहरो विराजते ॥

विघ्नेश्वरः सदा भूयात् विघ्नध्वान्तदिवाकरः ।
श्रेयसां निधिरानन्दश्रेयसे भूयसे मम ॥

द्विरददन्तवलक्षविभूतिभि-
र्धवलितांगमहीश्वरकुण्डलम् ।
कटितटे परिणद्धगजाजिनं
कमपि दक्षिणदिङ्मुखमाश्रये ॥

सरस्वती सदानन्दा सर्वसिद्धिप्रदायिनी ।
सर्वार्थस्फूर्तिदा सा च सन्निधत्तां सदा मम ॥

दक्षिणामूर्तिमीशानं दक्षिणं दक्षिणामुखम् ।
सर्वज्ञं सर्वदं नृणां सदा ध्यायेम साक्षिणम् ॥

अद्वैतरत्नकोशाख्ये ग्रन्थेऽहं गुरुचोदितः ।
कोशरत्नप्रकाशाख्यां व्याख्यां कुर्वे यथामति ॥

इह खलु कश्चिद्विपश्चित् नृसिंहाश्रमो नाम योगीश्वरः वादिवारणपञ्चास्यः स्वयमेव स्वकृततत्त्वविवेकव्याख्यामद्वैतरत्नकोशाख्यामारभमाणः तत्राश्रान्तप्रवृत्त्यर्थं विषयफले दर्शयन् स्वचिकीर्षितस्य ग्रन्थस्य निरन्तरायपरिसमाप्तीच्छया स्वेन शास्त्रप्रतिपाद्यस्वेष्टदेवताकारपरतत्त्वानुस्मृतिलक्षणं मङ्गलं मनसाऽनुष्ठितमपि बालिशशिष्यानुजिघृक्षया श्लोकतो दर्शयति । यदालिङ्ग्येति ।

End:

बाधितेति । तदनुभवैक्ये दुःखादिविषयानुभवैक्ये दुःखादिरूपो यो विषयस्स्वानुभवं प्रति दुःखादेर्विषयत्वाचस्य यो विनाशादिस्तद्विषय एवायमनुभवः । विनाशाद्यनुभव इत्यर्थः । तत्स्फुरणे दुःखादिस्फुरणे । तदनुभवादुत्पत्तिविनाशः । न तु... .. ।

Colophon: Nil.

Subject: Advaitaratnakośavyākhyā known as Kośaratna, prakāśa, a commentary on Advaitaratnakośa of Nṛsimhāśramin. First Pariccheda.

Remarks:—The Ms. is in a decaying condition. This Ms. has been transcribed in the library. Vide T. V. No. 426.

Dr. Burnell does not notice the 2 copies contained in this Ms.

Anubhavānanda, the author of this commentary, Prakāśa on the Advaitaratnakośa of Nṛsimhāśramin, is a pupil of Kṛṣṇānandayati. Hence he should have flourished in the latter half of the 17th century.

The author had in addition, many other preceptors, whom he mentions in the introductory verses. Anubhavānanda is the author of a commentary—Prabhāmaṇḍala on the Śāstra-dīpikā; vide No. 6930.

॥ अद्वैतरत्नकोशव्याख्या ॥

7503. ADVAITARATNAKOŚAVYĀKHYĀ.

Burnell's Catalogue No. 9796 a. Page 94. Right column.

Substance—Palm leaf. Size—18×1 inches. Leaves—120. Lines—7 to a Page. Script—Grantha. No. of Granthas—3600. Author—Anubhavānanda. Incomplete. wants beginning. Not printed.

Beginning:

...तद्विषय एवायमनुभवः विनाश्याद्यनुभवः इत्यर्थः । तत्स्फुरणे...दिस्फुरणे तदननुभवात् उत्पत्तिविनाशानुभवादिति मूलग्रन्थार्थः । अन्यथादीति ।.. ......

End:

त्वंपदार्थविवेकं परिच्छेदार्थमुपसंहरतीत्याह— परिच्छेदार्थमिति ॥ यद्यपि त्वंपदवाच्यं जीवस्वरूपं अविद्या कर्तृत्वादियुक्तं भिन्नं चावभासते तथापि तस्य पारमा-

र्थिकं स्वरूपं निरस्तसमस्तानर्थनिरतिशयानन्दस्वरूपं त्वं-
पदलक्ष्यं चिन्मात्रमेवेति सिद्धमिति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्कृष्णानन्दपूज्यपादशि-
ष्य श्रीमदनुभवानन्दविरचिते कोशरत्नप्रकाशे प्रथमः
परिच्छेदः ।

प्रथमोऽयं परिच्छेदः चित्सभेशे समर्पितः ।
तेन चित्सुखरूपोऽसौ प्रीयतां चित्सुखेश्वरः ॥

अविरलकृतवर्णभ्रेषणं पुस्तकेऽस्मिन्
लिखितमनवसाने लेखिनीदूषणं वा ।
अनुचितमथवा यद्दृक्तो वर्णराशेः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

श्रीमदनुभवानन्दश्रीगुरुचरणाभ्यां नमः । श्रीसाम्बाय नमः ।

Subject: Advaitaratnakośavyākhyā known as Kośaratnaprakāśa. First Pariccheda.

Remarks :—The Ms. is in decaying condition.

This Ms. has been copied in the library vide T. V. No. 426.

॥ अद्वैतरत्नकोशव्याख्या ॥

7504. ADVAITARATNAKOŚAVYĀKHYĀ.

Burnell's Catalogue No. 9797. **Page** 95. **Left** column.

Substance—Palm leaf. Size—15×1¼ inches. **Leaves**—187 (2-188). Lines—6 to a Page. Script—Grantha. No. 697

of Granthas—3600. Author—Anubhavānanda. Incomplete. Not Printed.

Beginning:

...भ्रान्तिं निरस्यति— प्रत्यक्षादीति। ननु किमर्थं लक्षणप्रमाणाभ्यां निरूप्यते। केवलं प्रमाणेनैव निरूप्यताम्।

End:

तथा च एतदभ्यासात् परमपुरुषार्थस्सेत्स्यतीति।

यज्जिज्ञास्यं विमलहृदयैर्विश्वजन्मादि य-
च्छास्त्रश्चाभूत् सकलविषयं यत्प्रमाणं तदेव।
यत्तात्पर्यं निगमशिरसां वृन्दमद्वैतमेत-
न्नृपञ्चास्यं प्रततसुखसद्ब्रह्मचिद्रूपमस्मि॥

श्रीमन्नृसिंहाश्रमभावगर्भा
कृतिः क गम्भीरतरा क चाहम्।
व्याख्या तथाऽपीह गुरोः प्रसादा-
दकार्यसौ बुद्धिविशुद्धये नः॥

तुष्टोऽनया भवेच्छ्रीमन्नृसिंहो भक्तवत्सलः।
इयं कृतिः कृता यस्य कृपया परयाऽञ्जसा॥

कोशरत्नप्रकाशाख्यदीपनीराजितशिवः।
स्वर्णसंसदधीशो यः प्रीणातु शिवया सह॥

Colophon:

इति श्रीमत्परमहंस + कोशरत्नप्रकाशे द्वितीयः परिच्छेदः॥

Subject: Advaitaratnakośavyākhyā; Kośaratnaprakāśa; up to the end of the II Pariccheda.

Remarks:—The Ms. is in a decaying condition. This Ms. has been transcribed in the Library. Vide T. V. No. 18.

॥ अद्वैरत्नकोशटिप्पणी—पूरणी ॥

7505. ADVAITARATNAKOŚATIPPṆĪ—PŪRAṆĪ.

Burnell's Catalogue No. 9815. Page 89. Left column.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaves — 217. Lines—6-7 to a Page. Script—Telugu. No. of Granthas—3000. Author—Agnihotra. Complete. Not printed.

Beginning:

यत्साक्षाज्जगदुत्पत्तिस्थितिसंहारकारणम् ।
यदात्मकमिदं विश्वं... .... ॥
ज्ञानेन्द्रापरनामानं दक्षिणामूर्तिदैवतम् ।
वासुदेवादिसच्छिष्यं............... ॥
.... ।
वासुदेवाभिधं सौम्यं पतंजलिमहं भजे ॥
श्रीज्ञानेन्द्रकृपापात्रं कृत्स्नतन्त्रविवेचकम् ।
श्रीमद्गुण्डनृसिंहाख्यं सूर्यं संकलये गुरुम् ॥
नत्वा गुरून नयसद्वृद्धाद्ग्राहेज्यसूनुना ।
विरच्यतेऽग्निहोत्रेण टीका तत्त्वविवेचिनी ॥
नृहरिमिति विग्रहविशेषोपहतस्पष्टदेवतावाचकपदेन

जगत्कारणं ब्रह्म लक्षयति । गुरुं नृहरित्वेनोपास इत्यर्थः ।

End:

यदीक्षणेति ॥ सम्भ्रुषा सम्यक् प्रेरिता मायाप्रेरणस्य सम्यक्त्वा कारकान्तरव्यापारनिरपेक्षता । अमोघ[व]ता वा । तादृशमायापरिणामात्मकं जगदित्यर्थः । यद्वा सन्नु श्रा सदधिष्ठिता पराभिमता माया स्वातन्त्र्यनिरासाय.... तदधिष्ठानत्वोक्तिरिति सर्वं सुस्थम् ॥

गंभीरभावा टीकेयं व्याख्याता बालभावतः ।
किंचिद्विजृम्भितं चात्र तद्गृह्णन्तु विमत्सराः ॥
यत्....निर्दोषकीर्णा ज्ञानेन्द्रनतिपूर्विका ।
महानिबन्धसम्बन्धा प्राप्स्यति प्रचयं भुवि ॥
कृत्याऽनया रघुपतिः परात्मा कुलदैवतम् ।
सन्तुष्यतु शुकालापैस्तत्पोषकजनो यथा ॥

Colophon:

इति श्रीज्ञानेन्द्रसरस्वतीचरणारविन्दनिषेवकनिषेवणश्रीरामान्वय-प्रसूत द्वादशाहयज्वसूनुनाऽग्निहोत्रेण विरचितायां तत्त्व-विवेकटिप्पण्यामद्वैतरत्नकोशपूरण्यां द्वितीयः परिच्छेदः । समाप्तश्च ग्रन्थः ।

Subject Advaitaratnakośaṭippaṇī, Pūraṇī.

Remarks:—The Ms. is in a fairly good condition.

Agnihotra, the author of this Ṭippaṇī called Pūraṇī, on the Advaitaratnakośa, is the son of Dvādaśāhayājin and Bhavānī

of Rāmakula. The author was the pupil of one Gaṇḍa-nṛsimhasūri disciple of Jñanendra who in his turn is a disciple of Vāsudevendra. He is the author also of a Nyāya work named Tattvacintāmaṇyālokasphūrti—vide 6095. He names another preceptor called Kalahastiyajvan. It is doubtful if his father Dvādaśahayājin is the same as the author of Siddhāntakaumudīvyākhyā—Sumanoramā.

॥ अद्वैतरत्नकोशटिप्पणी—पूरणी ॥

7506. ADVAITARATNAKOŚAṬIPPṆĪ—PŪRAṆĪ.

Burnell's Catalogue No. 9816 Page 89. Left column. Substance—Palm leaf. Size—19 × 1¼ inches. Leaves—164. Lines—8-3 to a Page. Script—Telugu. No. of Granthas—3000. Author—Agnihotra. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 7505.

Remarks:—The Ms. is in a decaying condition. First few leaves are broken.

॥ तत्त्वंपदार्थशोधनप्रकारः ॥

7507. TATTVAMPADĀRTHAŚODHANA-PRAKĀRAḤ.

Burnell's Catalogue No. 6805. Page 89. Left column. Substance—Paper. Size—11½ × 5½ inches. Sheets—5. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Nṛsimhāśramin. Incomplete. Not Printed.

Beginning:

श्रीगणेशाय नमः ।

तत्त्वं पदार्थशोधनप्रकारं प्रपञ्चयति । तथाहि । अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यं एतदनुपहितं चैतन्नयं तप्तायःपिण्डवेदकत्वेनावभासमानं तत्पदवाच्यार्थो भवति ॥

End.

अखण्डचैतन्यप्रतिपादकस्य तत्त्वमसीति वाक्यस्यार्थं सप्रपञ्चमभिधायेदानीं यजुर्वेदानुभववाक्यार्थो वर्ण्यत इत्याह । अथाधुनाप्यहंब्रह्मास्मीति अनुभववाक्यार्थो वर्ण्यते ॥

Subject: Tattvampadārthaśodhanaprakāra.

Remarks:—The Ms. is in good condition.

॥ भेदधिक्कारः ॥

7508. BHEDADHIKKĀRAḤ.

Burnell's Catalogue No. 9792. Page 89. Left column.
Substance—Palm leaf. Size—19 × 1½ inches. Leaves—5. Lines—15 to a Page. Script—Telugu. No. of Granthas —450. Author—Nṛsiṃhāśramin. Complete. Printed.

Beginning:

ॐ बोधज्ञानेन्द्रयोगीन्द्रपदपद्मरजो रविः ।
राजते मे हृदाकाशे तमोध्वान्तनिवर्तकः ॥

ॐ वेदान्तवनसञ्चारी नीलाचलगु(हाश्रयं) ।

(ज्यो)तिर्विराजते ध्वस्तमायावरणवारणम् ॥

किं न त्वं (नरसिंह) एवमधिपा नाहं न नो चेत्कथं

बन्धो मय्यपि तेश्वरे त्व(यि) विभो किन्ना(स्ति भवः परः) ।

भूमादर्शनदा(त्म)बन्धहर इत्याद्यं (वचः पौरुषं)

(न)त्वं नातदहं त्व(मेव नृ)हरे भूयासमात्मंस्त्वयि ॥

हृदयालयमा(लंब्य) करुणारससुन्दरम् ।

गुरूणां चरणांभोजं कुर्वे भेदस्य धिक्कृतिं ॥

अन्तःकरणातिरि(क्तोऽहमि)ति प्रतीयमानो भेदः पर-

स्मान्न भिद्यते ॥

End:

तस्मात्तत्त्वमसीत्यादिसत्यज्ञानसुखात्मनः ।

जीवो ब्रह्मेति संसिद्धं ज्योतिश्चैतन्यमस्तु मे ॥

आस्तामन्यप्रमाणत्वमभेदेनैव वस्तुनः ।

भेदे प्रमाणमित्येतत् अद्वैतं साधयेत्स्फुटम् ॥

गुरुचरणसकाशात् इद्वतं सर्वगं त-

द्गुणमननुगुणं वा वीक्षतां तत्क्षमात्मा ।

(अपि विसृजति) कश्चित् का च मालावमत्या

शतमखमणिमालां शारदाकाशनीलाम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशि-

श्रीनृसिंहाश्रमिविरचितो भेदधिक्कारः समाप्तः ॥

Subject: Bhedadhikkāra—a refutation of the dualistic view of the universe as held by the Naiyāyika and other schools.

Remarks:—The Ms. is in decaying condition.

This work of Śrī Nṛsimhāśramin has been edited in the Benares Sanskṛt Series Nos. 86 and 92. (1904) by Pandit Lakṣmaṇa Śastri Drāvida. The edition contains also the commentary of Nārāyaṇāśramin.

॥ भेदधिक्कारः ॥

7509. BHEDADHIKKĀRAḤ.

S. S. Collection No. 90 b.

Substance—Palm leaf. Size—$14\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—9. Lines—10 to a Page. Script—Telugu. No. of Granthas—300. Author—Nṛsimhāśrama. Incomplete. Printed.

Beginning and colophon—Same as No. 7508.

End:

तस्मान्न भेदः सिध्यति । ननु घटत्वविशिष्टप्रतियोगिके न वान्योन्याभावः । न चैवं विरोधावस्य प्रतियोगिसामानाधिकरण्यमिति वाच्यम् । अन्योन्याभावस्य प्रतियोग्यविरोधात् । न च प्रतियो... ।

Subject: Bhedadhikkāra; wants end.

Remarks:—The Ms. is in good condition.

The other work contained herein is Madhvavidhvamsa.

॥ भेदधिक्कारः ॥

7510. BHEDADHIKKĀRAḤ.

J. L. Collection No. 979 a.

Substance—Paper. Size—10¾×4 inches. Sheets—16 (1-16). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Nṛsimhāśramin. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7508.

Remarks:—The Ms. is in good condition. The other work contained herein is Bhedadhikkārasatkriyā.

॥ भेदधिक्कारव्याख्या—सत्क्रिया ॥

7511. BHEDADHIKKĀRAVYĀKHYĀ—SATKRIYĀ.

Burnell's Catalogue No. 9791. Page 89. Left column.

Substance—Palm leaf. Size—18½×1⅛ inches. Leaves—86. Lines—5 to a Page. Script—Telugu. No. of Granthas—2000. Author—Nārāyaṇāśramin. Complete. Printed.

Beginning:

मृषामायाशक्त्यान्(ऽज्ञ)तमहिम(नि)ब्रह्म(णि)परे

जगज्जालं जातं स्फुरति वियतीवेन्द्रनगरम् ।

विरिञ्चिश्रीशेशत्रिदशनरतिर्यग्गताभिदा

कृतोऽतो भूमाऽहं निरवधिसदानन्द(घन)चित्‌ ॥

(काशते कलितं य)स्य पदं वै दिनमसौक्तिकैः(दिक्मस्तकैः) ।

भक्तमुक्त्यै समिहितं (समीहन्तं) तं नृसिंहगुरुं भजे ॥

गंभीरभावभरेण दुर्वहा पौरवीकृते (पौरवीकृतिः) ।

तथापि भेदाधिकारव्याक्रियामन्थमारभे ॥

 

ईश्वरतदनुस्मरणं मंगलं मनसाऽनुष्ठितं शिष्यशिक्षार्थं प्रकटयन्‌ प्रकरणविषयादिकं च सूचयन्‌ प्रस्तुतवस्तुस्वरूपं सलक्षणप्रमाणं निर्दिशति । वेदान्तेत्यादिना ।

End:

अपीति । स्वच्छामिन्द्रनीलमणिमालां कश्चिद्विचार्य काचमणिशला भ्रान्त्या त्यजत्यपि नैतावता प्राज्ञैरुपेक्ष्यत इत्यर्थः । हरिः ओम्‌ ।

वेदान्तवृन्दाविपिने विततं विशुद्ध-

मद्वैतमार्गमपवर्गपथाविरोहम्‌ ।

श्रीमद्गुरूक्तनयतुलसमस्तशङ्कं

आस्थाय यान्तु पदमुत्तममस्तदोषाः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमश्रीचरणप-

रिचरणनिरतनारायणाश्रमविरचिता भेदधिक्कारसत्क्रिया समाप्ता ।

Subject: Bhedadhikkāravyākhyāsatkriyā a commentary on Bhedadhikkāra of Nṛsimhāśramin.

Remarks:—The Ms. is in a fairly good condition.

This commentary on Bhedadhikkāra called 'Bhedadhikkāra satkriyā is by Śrī Nārāyaṇāśramin, the pupil of Śrī Nṛsimhāśramin, the author of the Bhedadhikkāra.

The work has been edited in the Benares Sanskṛt Series Nos. 86 & 92 (1904) along with the Bhedadhikkāra.

7512. BHEDADHIKKĀRAVYĀKHYĀ—SATKRIYĀ.

Burnell's Catalogue No. 9899 a. Page 95. Right column. Substance—Palm leaf. Size—19×1½ inches. Leaves —21 (6-26). Lines—14 to a Page. Script—Telugu. No. of Granthas—2000. Author—Nārāyaṇāśramin. Incomplete. Printed.

Beginning—Same as No. 7511.

End:

तदभेदप्रतियोगिनाप्येतद्भेदप्रतिभासे स्वमतेनोदाहरणमाह— जीवेश्वरयोरैक्येति भेदस्योभयाश्रितत्वे...त्वयोमिः... इति कथमेकस्य तद्वयिस्त्वेन प्रतिभान इत्याशङ्क्य... ।

Colophon: Nil.

Subject: Bhedadhikkāravyākhyā known as Bhedadhikkāra Satkriyā

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is 'Harimīḍe' Stotra.

Dr. Burnell has wrongly described this work as Vedāntaprakaraṇavākhyāmṛtam. The readings in this Ms. agree with that of the printed edition in the Benares Sanskṛt Series. The margins give the names of the various Prakaraṇas of the work.

॥ भेदधिक्कारव्याख्या—सत्क्रिया ॥

7513. BHEDADHIKKĀRAVYĀKHYĀ—SATKRIYĀ.

J. L. Collection No. 980.

Substance—Paper. Size—10¾ × 4 inches. Sheets—73 (17-89). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Nārāyaṇāśramin. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7511.

Remarks:—The Ms. is in good condition. The other work contained herein is Bhedadhikkāra.

॥ भेदधिक्कारटिप्पणी ॥

7514. BHEDADHIKKĀRAṬIPPAṆĪ.

Burnell's Catalogue No. 9793. Page 89. Left column.

Substance—Palm leaf. Size—15½ × 1 inches. Leaves—

164 (2–165). Lines—5 to a Page. Script—Grantha. No. of Granthas—2500. Author—? Incomplete. Not printed.

Beginning:

.. ति वाच्यां सर्वगतप्रसृतश्चैतन्यैकदेश * *

आह भगवदनुग्रहादिति । मूले स्वर्गादित्यादिपदेन पितृ-
लोकसंग्रहः । यथाऽधानस्येति । न च तद्वत्स्वतन्त्रफल-
साधनत्वमपि न स्यादिति वाच्यम् । तत्र स्वतन्त्रफलश्रुतेः ।
अत्र तु कर्मणा पितृलोक इति फलश्रुतेरिति भावः ।

End:

ततो वर्णितं नित्यैवे -- श्रुत्यर्थोऽभिमत इति मन्त-
व्यम् । याभिकृत्येति । यश्चाश्यस्येति वाक्यस्य ब्रह्म
इन्द्रियादिताद्। ... मायाकृत इत्येवमर्थकत्वादिति भावः ।
बाधेति । मुखादिप्रतिबिंबप्रतियोगिकभेदस्याविद्याप्रति-
बिंबात्मनः सत्त्वादित्यर्थः । न च तत्प्रति...... ।

Subject: Bhedadhikkāravyākhyā known as Bhedadhikkāra-ṭippaṇī.

Remarks:—The Ms. is in a decaying condition.

The author of this Ṭippaṇī on the Bhedadhikkāra of Nṛsiṃhāśramin, is not known.

॥ भेदाधिक्कारोपन्यासः ॥

7515. BHEDADHIKKĀROPANYĀSAH.

Not Noticed by Dr. Burnell.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—71. Lines—7 to a Page. Script—Grantha. No. of Granthas—2000. Author—? Incomplete. Not printed.

Beginning:

ओम् ।

सर्वार्थस्य (तु) साक्ष्यात्मा सदानन्दः स्वयंप्रभः ।
असङ्गश्चिदहं देहत्रयतद्धर्मवर्जितः ॥

सत्यं ज्ञानमनन्तं सच्छुद्धं सूक्ष्मं स्वतन्त्रमोम् ।
परमानन्दरूपं ब्रह्माहमस्मि न संशयः ॥

उपादानकर्त्रात्मकं सर्वसर्गे
महामाययाऽविद्ययाद्ः(?) प्रकृत्या ।
सुसर्वज्ञमद्वैतमाम्नायमूलं
नृसिंहं गुरुं मृत्युमृत्युं नमामि ॥

श्रीमद्व्यासं वासुदेवावतारं
वेदाचार्यं ब्रह्मशारीरकस्य ।
मीमांसायाः सूत्रकर्तारमीडे
शुद्धाद्वैतस्थापकाचार्यवर्यम् ॥

 

द्वैतिगजपुञ्जकविभञ्जनधुरीणं
प्रत्यगभिषैकपरसन्मणिजिघृक्षम् ।
श्रीतत्त्वबृन्दनखरायुधविशेषं
योगिवरमाश्रमिनृसिंहमहमीडे ॥

आपेरोरा च सेतोस्सकलबुधगणैश्शुद्धनामार्थभावात्
भूमेश्चानन्दभावान्निजजनभवसन्तारणाच्च प्रसिद्धः ।
यः अद्धानन्दतीर्थस्त्विति महितगिरा ख्यायते श्रीगुरुं तं
शुद्धाचारवेदत्रयसकलनयज्ञानकन्दं नमामि ॥

यत्सान्निध्यात्सर्वविद्यास्सुलब्धा
अस्माभिर्ये भूमसौख्यैकनिष्ठाः ।
येषां दृष्टेर्गोचरास्सर्वलोकाः
मुक्तास्वानानन्दकृष्णान् नमामि ॥

यद्यपि श्रुतिस्मृतीतिहासपुराणागमैः पुनः पुनरतिश्र-येन जगन्निदाने सर्वज्ञे परमात्मनि सजातीयविजातीयस्व-गतसमस्तभेदो विन्दितो निषिद्धश्च । * * अतस्तन्मोहशान्तये समस्तभेदधर्मदुर्निरूपत्वप्रकटनाय भेदधिक्कारोपन्यासाख्योऽयं ग्रन्थः आरभ्यते ।

* *

तथापि न्यायमेव बहुमन्यमानं प्रति न्यायतस्तावज्जीव-परभेदमिथ्यात्वं साध्यते ।

End:

अस्तु तावत्सुखादिविषयकत्वं चैतन्यस्य स्वभावविशे-षः । न चैवं सदा तत्कार्यापत्तिः । सुखदुःखविशिष्टानुभव-त्वेनैव सुखप्रसादविषादकारणतया भवविशेषणयोः सुख-दुःखयोरपि तत्कारणत्वाच्चयोश्च सदाऽभावात् । न चैवमप्ये-

तत्— कालावच्छेदेन जन्मान्तरीयसुखविषयकसंशयो न स्यादिति वाच्यम् । जीवसाक्षिण... ।

Subject: Bhedadhikkāropanyāsa.

Remarks :—The Ms. is in a fairly good condition.

This anonymous work is a discourse-like commentary on the Bhedadhikkāra of Nṛsimhāśramin.

The author seems to be a disciple of Nṛsimhāśramin and two others named Śraddhānandatīrtha and Ānandakṛṣṇa.

Dr. Burnell has not noticed this work.

॥ वेदान्तवादार्थः ॥

7516. VEDĀNTAVĀDĀRTHAḤ.

Burnell's Catalogue No. 9844 Page 94. Right column. Substance—Palm leaf. Size—18½ × 1½ inches. Leaves—6. Lines—9 to a Page. Script—Grantha. No. of Granthas—200. Author—Kṛṣṇānanda Incomplete. Not printed.

Beginning:

जडीकृतजगत्यन्तस्तमस्संभेदमर्मणे ।
रामभद्रयतीन्द्राय महते महसे नमः ॥
श्रीपरिव्राज्यसाम्राज्यलक्ष्मीलालितमूर्तये ।
वासुदेवयतीन्द्राय गुरवे करवै नमः ॥

इह तावदाब्रह्मकीटास्पृष्टाशिवलेशानतिशयानन्दमात्र-

मभिलषितं । सोऽयमभिलाषो मुमुक्षेति गीयते । सा तु विवेकविरागशमाद्यनुप्राणिता मोक्षसाधनप्रवेशाद्धेतुः ।

End:

महाफला हि गुरुभक्तिः ।

" यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ "

इति श्रुतिः । तस्माद्विद्यार्थिना देववदाचार्यमुपासीनेन तस्मिन् परमा भक्तिः कार्येति तात्पर्यमिति शिवम् ॥

Colophon: Nil.

Subject: Vedāntavādārthaḥ.

Remarks:—The Ms. is in a fairly good condition. The author mentions Rāmabhadra and Vāsudevayati as his Gurus and so might also be Kṛṣṇānanda the author of Siddhāntasiddhāñjanam.

After the colophon are given the following:—

रुक्मिणी प्रथमाश्लेषे रहो द्यूतमहे जिताम् ।
हरिर्मीढस्मिताकूतामालिङ्गन्मङ्गलं क्रियात् ॥

स्वाज्ञानोद्भूतभूतप्रमुखबहुमुखद्वैतदेहद्वयोग्रं
मातृत्यादिप्रपञ्चप्रचयपरिचयप्राप्तसंसारयन्त्रम् ।
नेत्यभ्यासप्रसूतप्रबलमतिबलध्वस्तमोहप्रभात-
प्रोत्स(?)प्रत्यक्षसाक्षीद्युतिकथमकथन्धाम कामं प्रपद्ये ॥ १ ॥

वक्त्राब्ध्याम्बुजजातजातमधुरप्रेयोमधुप्रार्थना
सा तु व्यग्रधियाः समग्रमहतस्स्वर्गेऽपि निर्वेदिनः ।

यस्मिन्मुक्तिपथः प्रतीतमुनिभिः संप्रार्थितस्सन् बभौ
तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते ॥ २ ॥

श्रीकृष्णानन्दयोगीन्द्रचरणांबुरुहद्वयम् ।
धर्मार्थकाममोक्षाणां निदानं नित्यमाश्रये ॥ ३ ॥

॥ वेदान्तवादार्थः ॥

7517. VEDĀNTAVĀDĀRTHAḤ.

Burnell's Catalogue No. 9845. Page 94. Right column. Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—25. Lines—9 to a Page. Script—Grantha. No. of Granthas—1000. Author—Kṛṣṇānanda ?. Incomplete. Not printed.

Beginning:

माध्वाः आपातदर्शनभिन्नं प्रति वाक्यमयमस्य वाक्यार्थ इति नानेकशाखास्थवाक्यार्थग्रहणं श्रवणं तथाज्ञानमात्रविरोधिनं तु मननवत्संशयविरोधिमननं तु अयमेव वाक्यार्थोऽन्ययुक्तो नान्य इति निर्णयहेतुयुक्त्यनुसन्धानं निरन्तरध्यानं निदिध्यासनमित्थमेव श्रवणादीनां भेदः । विचारादिविधिस्त्वपूर्वविधिरिति ।

End:

तस्मात् नित्यसिद्धसत्यात्मस्वरूपैव मुक्तिरिति सिद्धम् ॥

Colophon: Nil.

Subject: Vedāntavādārtha; a treatise on Advaitavedānta principles; critises the views of other schools.

Remarks:—The Ms is in a fairly good condition.

॥ वेदान्तवादार्थः ॥

7518. VEDĀNTAVĀDĀRTHAḤ.

Burnell's Catalogue No. 9846. Page 94. Right column. Substance—Palm leaf. Size—16×1¼ inches. Leaves—27. Lines—7 to a Page. Script—Telugu. No. of Granthas—750. Author—Kṛṣṇānanda. Incomplete. Not printed.

Beginning:

तत्र तावत् "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्नैः प्रमाणि समुदितजिज्ञासस्य तत्साधनाय वेदान्तश्रवणे विधिः प्रतीयमानः किं विध इति चिन्त्यते ।

End:

परमेश्वर इति मुमुक्षुत्क्रान्त्यधिकरणनिर्णयोऽपि साक्षिपर इत्येव निर्णीतम् । सत्वशुद्धावपि.........दिग्भ्रमस्थले वस्तुतः शुक्तिको शंकुरगतोऽपीदमंशः प्रतिभासः ।

.......रजते......... ।

Subject: Vedāntavādārthaḥ.

Remarks:—The Ms. is in a fairly good condition.

॥ सिद्धान्तसिद्धाञ्जनम् ॥

7519. SIDDHĀNTASIDDHĀÑJANAM.

Burnell's Catalogue No. 9849. Page 95. Left column. Substance—Palm leaf. Size—16½ × 1¼ inches. Leaves—349 Lines—6 to 9 to a Page. Script—Grantha. No. of Granthas—11000. Author—Kṛṣṇānandayati. Incomplete. Printed.

Beginning:

जगज्जन्मस्थेमाप्ययनियमसीमादिमगुरुः
विधेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानन्दात्मा परिमुषितनिःशेषकलुषः
त्रिभेदातीतो धीनटनचटुसाक्षी विजयते ॥ १ ॥

* *

इह खलु तावदतीतानेकभवपरम्परासमार्जितसुकृतसम्पदावर्जितभगवदनुग्रहासादितसत्त्वप्रसादतया सम्यगविवेकवैराग्यादिसाधनो * * आत्मतत्त्वज्ञानमधिगम्यं जिज्ञासते ॥

End:

न चाहं बुद्धिरित्येव तथा प्रत्यगर्थाविवेकस्तथापि प्रकृतिपरिणामस्याप्यहमित्येव भानात् किन्तु दृश्यव्यतिरेक ......एवञ्चाहंकारादिसर्वदृश्यावभासा दृशिरेव प्रतीची व्युदपादीति न तदभावप्रसङ्गः । अत एव च नैकत्र-

प्रत्यगर्थंद्वयापाचेः । अपि च... ।

Colophon: Nil.

Subject: Siddhāntasiddhāñjanam; A criticism of the Viśiṣṭādhvaita System of Rāmānuja; wants end.

Remarks:—The Ms. is in a fairly good condition. There are four loose leaves at the beginning dealing with some grammatical discussion etc.

The author of this work, Śri Kṛṣṇānandasarasvati lived in the 17th century.

The author had two pupils named Rāmānandayati and Bhāskaradīkṣita.

The Siddhāntasiddhāñjana has a commentary called Ratnatūlikā, written by the author's pupil, Bhāskaradīkṣita.

This work has been published in 4 vols. (Nos. 47, 48, 58 & 61) in the Trivandrum Sanskrit Series. For details about the author's date etc. see introduction to the above edition by Mahāmahopādhyāya T. Ganapati Sastri.

॥ तप्तमुद्राविद्रावणम् ॥

7520. TAPTAMUDRĀVIDRĀVAṆAM.

Burnell's Catalogue No. 9768. Page 98. Right column.

Substance—Palm leaf. Size—$15\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—58. Lines—5 to a Page. Script—Grantha. No. of Granthas—2000. Author—Bhāskaradīkṣita. Complete. Not printed.

Beginning:

ओं साम्बशिवाय नमः ॥

मार्ताण्डातिलकस्वामिमहागणपतीन्वयम् ।
विश्ववन्द्यानमस्यामः सर्वसिद्धिविधायिनः ॥
ब्रह्मविष्णुमहेशानां कारणं परमेश्वरम् ।
साम्बं नौमि शिवादित्यं मायाकल्पितविग्रहम् ॥
क्लेशकर्मविपाकाद्यैरपरामृष्टमीश्वरम् ।
गुरूणाञ्च गुरुं वन्दे विष्णुमोङ्कारशब्दितम् ॥
उमामहेश्वरं नौमि मन्त्रागमसविधालयम् ।
यत्पदाम्भोरुहस्मृत्या स्फुरन्ति सकलाः कलाः ॥
उमामहेश्वराचार्यांश्चोलावनिशिखमणीन् ।
तातपादानहं नौमि सर्वतन्त्रप्रवर्तकान् ॥
उमामहेश्वराचार्यतनुजो भास्कराध्वरी ।
Remarks: —The Ms. is in good condition.

॥ अद्वैतम् ॥

ADVAITAM.

४. इतराद्वैतप्रकरणानि तद्व्याख्यानानि ॥

IV. Minor works of other authors and the Commentaries thereon.

॥ अष्टावक्रीयम् ॥

7644. AṢṬĀVAKRĪYAM.

Burnell's Catalogue No 6486. Page 94. Left column.
Substance—Paper. Size—$8\frac{3}{4} \times 4$ inches. Sheets—17.
Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Aṣṭāvakra. Incomplete. Printed.

Beginning:

....प्रायोसि सर्वदा ।
अयमेव हि ते बन्धो द्रष्टारं पश्यसीतरम् ॥ ७ ॥

अहं कर्तेत्यहंमानमहाकृष्णाहिदंशितः ।
नाहं कर्तेति विश्वासामृतं पीत्वा सुखी भव ॥ ८ ॥

एको विशुद्धबोधोऽहमिति निश्चयवह्निना ।
प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव ॥ ९ ॥

यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् ।
आनन्दः परमानन्दः स बोधस्त्वं सुखी भव ॥ १० ॥

मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि ।
किंवदन्तीह सत्येयं या मतिस्सा गतिर्भवेत् ॥ ११ ॥

आत्मा साक्षी विभुः पूर्ण एको मुक्तः चिदक्रियः ।
असंगो निस्पृहः शान्तो भ्रमात्संसारवानिव ॥ १२ ॥

End:

क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमाः ।
क्व किंचित्क्व न किंचिद्वा सर्वदा विमलस्य मे ॥ ८ ॥

क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता ।
क्व हर्षः क्व विषादो वा सर्वदा निष्क्रियस्य मे ॥ ९ ॥

क्व चैष व्यवहारो वा क्व च सा परमार्थता ।
क्व सुखं क्व च वा दुःखं निर्विमर्शस्य मे सदा ॥ १० ॥

*   *

क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः ।
क्व चास्ति पुरुषार्थो वा निरुपाधेश्शिवस्य मे ॥ १३ ॥

क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयम् ।
बहुनाऽत्र किमुक्तेन किञ्चिन्नोत्तिष्ठते मम ॥ १४ ॥

Colophon:

इति अवधूतानुभूतिः ।

Subject: Aṣṭāvakrīyam.

The matter is dealt with in the following topics:—

1 उपदेशषोडशकम्
2 आत्मानुभवोल्लासविंशतिकम्
3 आक्षेपद्वारोपदेशचतुर्दशकम्
4 उल्लासषट्कम्
5 लयचतुष्कम्
शिष्योक्तोत्तरोपदेशचतुष्कम्

7 अनुभवपञ्चकम्

8 बन्धमोक्षचतुष्कम्

9 निर्वेदाष्टकम्

10 परमाष्टकम्

11 ज्ञानाष्टकम्

12 एवमेवाष्टकम्

13 यथासुखसप्तकम्

14 शान्तिचतुष्कम्

15 तत्त्वोपदेशविंशतिकम्

16 विशेषोपदेशैकादशकम्

17 तत्त्वस्वरूपविंशकम्

18 शमशतकम्

19 आत्मविश्रान्त्यष्टकम्

20 अवधूतानुभूतिः

Remarks;—The Ms. is in a decaying condition. There is a transcript copy of this Ms. in the library vide T. V. No. 459.

This dialogue between Aṣṭāvakra and Janaka, which is also called as Aṣṭāvakragītā has been published in 'the Gītāsaṅgraha,' of the Aṣṭekar & Co. Poona. In the printed text there is a 21st chapter, recounting the names of and the number of verses in each chapter. This work has also appeared in 1930 Prabuddhabhārata with an English translation. The Ms. is dated Samvat 1708 or A. D. 1651.

AṢṬĀVAKRĪYAM.

Descriptive No	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7645	B. L. 6487	Paper.	$8 \times 4\frac{1}{4}$	25	9	Devanāgarī.	Complete.
7646	P. A. 89	,,	$8\frac{1}{4} \times 4$	6	5	,,	Incomplete.
7647 Not noticed by Burnell. Ms. No.	14613	,,	$7\frac{1}{2} \times 4\frac{1}{4}$	45	8 or 9	,,	,,
7648	P. A. 89 h	,,	$8\frac{1}{2} \times 4$	1 (2nd)	4	,,	,,
7649	B. L. 6485	,,	$8\frac{1}{2} \times 4\frac{1}{2}$	2	8	,,	,,
7650	,, 6348	,,	$8 \times 4\frac{7}{8}$	2	8	,,	,,
7651	,, 6351	,,	$6\frac{1}{2} \times 4$	3	8	,,	,,

DETAILED REMARKS

on the

ASṬĀVAKRĪYA MSS.

IN THE ABOVE TABLE.

7647 On the title page is given—

'तुलजामहाराजभोसलस्य पुस्तकम् ।'

॥ पञ्चीकरणम्

7652. PAÑCĪKARAṆAM.

S. K. Collection No. 113.

Substance—Paper. Size—$7\frac{1}{2} \times 4$ inches. Sheets—7. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—225. Author—?. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

पंचीकरणम् ॥ ओं नमो ब्रह्मादिभ्यः । इति । ओम् ॥

आनन्दमानन्दकरं प्रसन्नं

ज्ञानस्वरूपं निजबोधयुक्तम् ।

योगीन्द्रवन्द्यं भवरोगवैद्यं

श्रीमद्गुरुं नित्यमहं नमामि ॥

ब्रह्मविद्या मया लब्धा ब्रह्मणेव सरस्वती ।

यस्य तत्त्वोपदेशेन तस्मै श्रीगुरवे नमः ॥ २ ॥

आत्मानात्मविवेकेन पुंसः संसारनिर्वृतिः ।
तद्विना जन्मकोट्यापि बन्धच्छेदो न सिध्यति ॥ ३ ॥
स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ॥ ४ ॥

End:

ईशेन मायाबिम्बेन ग्रासितं सकलं जगत् ।
अहो बन्ध्याकुमारेण गन्धर्वनगरं यथा ॥

एवंभूतः प्रपञ्चः सर्वमनात्मेति सम्यग्विचार्य सच्चिदानन्दस्वरूपोऽहमिति यो जानाति स एवंभूतजननमरणपरम्परारूपसंसारान्मुक्तो भवति । "तरति शोकमात्मवित्", "ब्रह्मविद्ब्रह्मैव भवति" ॥

ओं नमो ब्रह्मादिभ्यः ॥

Colophon:

श्रीकागलकर शेषभट्टात्मजबाळाख्येनाऽलेखीदं पुस्तकम् ।

Subject: Pañcīkaraṇam.

Remarks:—The Ms. is in good condition.

On the title page is given:—

शेषभट्टात्मजबाळाख्यस्य ।

The owner and scribe is the same person.

It has with it an illustration of Pañcīkaraṇa bearing the name Pañcīkaraṇapaṭa.

॥ पञ्चीकरणम् ॥

7653. PAÑCĪKARAṆAM.

T. S. Collection No. 33.

Substance—Paper. Size—12×6 inches. Sheets—9. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—225. Author—?. Complete Not printed.

Beginning:

श्री रामः कर्ता । श्री गणेशाय नमः ।

श्रीगुरुभ्यो नमः । ओम् ब्रह्मविद्भ्यो नमः ॥

End, colophon and subject—Same as No. 7652.

Remarks:—The Ms. is in very good condition.

॥ पञ्चीकरणम् ॥

7654. PAÑCĪKARAṆAM.

T. S. Collection No. 123.

Substance—Paper. Size—8¼×5½ inches. Sheets—18. Lines—7-8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—? Complete. Not printed.

This Ms. explains the theme of Pañcīkaraṇa in tabular forms with Mahraṭī explanations.

Remarks:—The Ms. is in good condition.

॥ परब्रह्मनिरूपणम् (प्रपञ्चामृतसारः) ॥

7655. PARABRAHMANIRŪPAṆAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1419. Page 141. Right column.
Substance—Paper. Size—16 × 7 inches Sheets—9. Lines—8-9 to a Page Script—Devanāgari. No. of Granthas—220. Author—Ekojirāja. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

श्रीमच्छम्भुं महादेवं वासुदेवसुतं विभुम् ।
नमस्कृत्य शिवां देवीं महालक्ष्मीं सरस्वतीम् ॥

सुब्रह्मण्यं गणेशं च नारदं मुनिपुंगवम् ।
प्रपञ्चामृतसाराख्यं पुराणं समुदीरयेत् ॥ २ ॥

एकस्मिन् समये कृष्णं नारदः प्रेमसंयुतः ।
प्रश्नं चकार विमलं सर्ववेदान्तसम्मतम् ॥ ३ ॥

स्वामिन् त्वदीयदयया श्रुतं सर्वं परं तु तत् ।
परब्रह्मस्वरूपं हि न श्रुतं परमेश्वर ॥ ४ ॥

End:

सर्वस्य कारणं सर्वव्यापकं ब्रह्म यच्छिवे ।
सदाचाररतः सम्यक् भक्तिसंयुक्तचेतसः ॥ ५१ ॥

एतद्वेदान्तसिद्धान्तग्रन्थार्थज्ञानशालिनः ।

एकस्मिन्नेव तद्व्यक्तं प्रणवे परिदृश्यते ॥

भक्त्या तस्योपासनया प्रणवस्यैव धमितः ।

ब्रह्मप्राप्तिर्भवेच्छीघ्रं नात्र कार्या विचारणा ॥

इति ते कथितं देवि.... ।

Colophon: Nil.

Subject : Parabrahmanirūpaṇa, a chapter in Prapañcāmṛta-sāra.

Remarks :—The Ms. is in good condition. Dr. Burnell says, "(1413 to 1491) These are fragments of an intended Encyclopaedia, something like the Abhilaṣitārthacintāmaṇi. Some chapters on Nīti seem alone to have been finished; some of the fragments relate to Pūjā etc."

This author was the son of Tukkoji I Mahārāja of Tanjore and Kumārāmba and ruled the kingdom of Tanjore for one year between 1735-1736. He is otherwise known as Bāvā Sahib. A work by name Prapañcāmṛtasāra both in Marāṭhi and Sanskṛt is attributed to him. The work is a compenduim of many small chapters dealing with various topics. One of the colophons to one of the many Manuscripts of this work given below contains the name of one Mahādeva as the author.

" श्रीमद्राजाधिराजतुळजमहाराजतनूजराजकुमाराम्बाप्रियबालसोमा-

स्कन्दभक्तएकराजसभुतमहादेवविरचितप्रपञ्चामृतसारराज-

रञ्जनपुराणे तुळजाराजगुणवर्णनं नाम ...अध्यायः ॥"

The chapters or portions dealing with Philosophical subjects are given here.

॥ परब्रह्मनिरूपणम् (प्रपञ्चामृतसारः) ॥

7656. PARABRAHMANIRŪPAṆAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1448. Page 141. Right column.

Substance—Paper. Size—16×7 inches. Sheets—5. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ekojirājā. Incomplete. Not printed.

Beginning and subject—Same as No. 7655.

End.:

सिद्धान्तं सर्वशास्त्राणां मुक्तेः साधनमुत्तमम् ।
परब्रह्मज्ञानदीपं भवान्यै गदितं शिवम् ॥

यः शृणोति सदा भक्त्या तस्य ज्ञानं भवेद्ध्रुवम् ।
संसारार्णवसन्तारसुसाधनमबाधितम् ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition. For full particulars vide No. 7655.

॥ परब्रह्मनिरूपणम् (प्रपञ्चामृतसारः) ॥

7657. PARABRAHMANIRŪPAṆAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1488. Page 141. Right column. Substance—Paper. Size—16 × 7 inches. Sheets—7. Lines—7 to a Page. Script—Devanāgarī. No of Granthas—125 Author—Ekojirajā. Incomplete. Not printed.

Beginning—Same as No 7655.

End :

ब्राह्मणाय सते शुद्धगृहस्थाश्रमवासिने ।
सुगुणाय सुवृत्ताय सदा शान्तिपराय च ॥
अध्यायं कथयेदेतं शुभं प्रणवपूर्वकम् ।
विष्णुभक्तेषु वाचापि तथा शैवेषु ये जनाः ॥
मन्यते ये .... ।

Colophon : Nil.

Subject : Parabrahmanirūpaṇa a portion of Prapañcasārāmṛtá.

Remarks :—The Ms. is in a fairly good condition. It ends abruptly. For full details see remarks under No. 7655.

॥ परब्रह्मतत्त्वनिरूपणम् (प्रपञ्चामृतसारः) ॥

7658. PARABRAHMATATTVANIRŪPAṆAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1420. Page 141. Right column.

Substance—Paper Size—16×7 inches Sheets—8. (10-12). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ekojirājā. Incomplete. Not printed.

Beginning:

इति ते कथितं देवि ब्रह्मणस्तत्वमुत्तमम् ।
एवं स्पष्टतया सर्वं क्वापि न प्रतिपादितम् ।
अष्टादशपुराणेषु श्रुतिस्मृत्यागमेषु च ॥
मया त्वदीयभक्त्यैव रहस्यं सम्प्रकाशितम् ।
इत्येवं कथितं देव्यै दुर्ज्ञेयं तत्त्वमुत्तमम् ॥ २ ॥
देवेन परमेशेन श्रीमता चन्द्रमौलिना ।
मुने त्वमपि जानीहि सावधानेन चेतसा ॥ ३ ॥
एतज्ज्ञानात्तव भवेच्चित्तमानन्दनिर्भरम् ।
रहस्यमेतत्परमं कथितं तव नारद ॥ ४ ॥
विरक्तो यस्सदा शान्तो जितकामारिवर्गकः ।
शिवविष्णोरभेदन्तु सर्वदा मनुते दृढम् ॥ ५ ॥

End :

श्रुत्वैवं भगवद्वाक्यं नारदो मुनिसत्तमः ।
कृष्णं तुष्टाव बहुभिर्वाक्यैः श्रुतिशिरोगतैः ॥ ५७ ॥
पार्वतीपरमेशानसंवादश्रवणेन च ।
त्वं धन्योऽसि महाबाहो पूज्योऽसि जगतामपि ॥

अहं त्वदुपदेशेन धन्योऽस्मि यदुनन्दन ।
इत्युक्त्वा नारदः श्रीमान् भगवद्भक्तिसंयुतः ॥ ५९ ॥
अभवत्परमानन्दपरिपूरितमानसः ॥

Colophon:

श्रीमद्राजाधिराजमहादेवभक्तहरिहराभेदज्ञानसम्पन्नपरब्रह्मोपासकश्री-मत्तुलजमहाराजतनूजैकमहाराजविरचिते प्रपञ्चसारराजरञ्जनपुराणे त्रिपुरसुन्दरीसंवादरूपपरब्रह्मतत्त्वनिरूपणाध्यायः सम्पूर्णोऽयमाचन्द्रतारकं विजयताम् ॥ जयतु ॥

Subject: Parabrahmatattvanirūpaṇa a portion of Prapañcasārāmṛta or Prapañcāmṛtasāra of Ekojirāja of Tanjore

Remarks:—The Ms. is in a fairly good condion. For detailed remarks see under No. 7655 The colophon of this Ms. confirms that the author was the desciple of one Mahādeva.

॥ रामानुजमतखण्डनम् (प्रपञ्चामृतसारः) ॥

7659. RĀMĀNUJAMATAKHAṆḌANAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1433. Page 141. Right column. Substance—Paper. Size—16×7 inches. Sheets—2. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—55. Author—Ekojirājā. Complete. Not printed.

Beginning:

श्री गणेशाय नमः ॥

सर्वज्ञं शंकरं देवं भवानीप्राणनायकम् ।
एकराजस्तुतं वन्दे तुकजेन्द्रसुखप्रदम् ॥ १ ॥

यस्यास्स्मृत्या सतां सद्यो वाग्विभूतिर्विजृम्भते ।
तां नमामि महादेवीं वाणीं वाचामधीश्वरीम् ॥ २ ॥

नत्वा श्रीगुरुपादाब्जं श्रीमदेकेन्द्रभूपतिः ।
रामानुजमताचारान् कांश्चिद्ब्रूते नृणां मुदे ॥ ३ ॥

साधूनां विदुषां सद्यःप्रीतिसंवृद्धिकारकः ।
अध्यायोऽयं सदा श्राव्यः शिवभक्तैर्विशेषतः ॥ ४ ॥

कदाचित्कुतुकाविष्टो नारदो मुनिसत्तमः ।
द्वारकायां समासीनं कृष्णं यदुकुलोद्भवम् ॥ ५ ॥

पप्रच्छ सकलज्ञोऽपि सर्वलोकहितेच्छया ।
स्वामिन् सर्वजगन्नाथ सर्वधर्मप्रवर्तक ॥ ६ ॥

त्वत्तः श्रुता मया भूरिमतभेदाः सुचेतसा ।
रामानुजमतं कीदृक् किमाचारास्तदाश्रयाः ॥ ७ ॥

End:

पुण्ड्राणि धारयन्त्यङ्गे न जपन्ति कदाचन ।
वस्त्रक्षालनमाद्यं तु द्वितीयं पुण्ड्रधारणम् ।
तृतीयं तु शिवद्रोहो नान्यत्कर्मास्ति शृंगिणाम् ॥
एतत्पापमतश्रुत्वा यत्ते पापं भविष्यति ।
पञ्चाक्षरीजपात्सद्यः तन्नश्यति न चान्यथा ॥

एतच्छ्रुत्वा तु सन्तुष्टो नारदो देवतापसः ।
विस्मयाविष्टहृदयो ययौ पञ्चाक्षरीं जपन् ॥

Colophon:

प्रपञ्चामृतसारे राजरञ्जनपुराणे श्रीमद्राजाधिराजतुलजराजसूनु-
एकराजविरचितं रामानुजमतखण्डनं सम्पूर्णम् ॥

Subject: Rāmānujamatakhaṇḍana, This work particularly deals with the peculiarity of the creed of the followers of Rāmānujacārya rather, in a contemptuous tone.

Remarks:—The Ms. is in a fairly good condition. For further remarks see under No. 7655. In the margin is given
' रामानुजमतखण्डन '

॥ मध्वमतकथनम् (प्रपञ्चामृतसारः) ॥

7660. MADHVAMATAKATHANAM (PRAPAÑCĀMṚTASĀRAḤ).

Burnell's Catalogue No. 1486. Page 141. Right column. Substance—Paper. Size—16×7 inches. Leaves—2. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Ekojirājā Complete. Not Printed.

Beginning:

श्री गणेशाय नमः ॥

एकस्मिन् दिवसे कृष्णं द्वारकामध्यवासिनम् ।
नारदः परिपप्रच्छ भगवन्तं यदूद्वहम् ॥ १ ॥

स्वामिन् मतानि लोकेऽस्मिन् षट् सन्तीति मया श्रुतम् ।
तेषु सर्वेषु श्रेष्ठं किं पूतं वा किं दयानिधे ॥ २ ॥

तेषां तेषां तु सिद्धान्तः कीदृङ्मोक्षोऽस्ति वा कथम् ।
विस्तरेण प्रकथय मतानां तत्त्वनिश्चयम् ॥ ३ ॥

त्वं सर्ववित्सर्वमता(न्) जानासि निखिलं यतः ।
इत्युक्तो नारदेनाथ देवकीतनयो हरिः ॥ ४ ॥

विस्तारं कथयांचक्रे मतानां शास्त्रवर्तिनाम् ।
मध्वाचार्य इति ख्यातो ह्यभूत्कश्चन मस्करी ॥ ५ ॥

End:

विधवानां तु नारीणां व्यभिचारिनृणामपि ।
इदं मतं बहुमतं नान्येषां पुण्यकर्मणाम् ॥

प्रायेणास्मिन्मते लोकाः स्थूलांगाः बलशालिनः ।
लज्जां विहाय निःशङ्कं वदन्तोऽज्ञानिनः परम् ॥

यावन्मतप्रवेशस्तु भवेत्तावद्धि सौम्यता ।
प्रवेशे लज्जया हीना व्यभिचारं वितन्वते ॥ ३७ ॥

व्यभिचारस्य शुद्ध्यर्थं गृहीत्वाज्ञां गुरोरपि ॥
घृतशौचविधानेन कुर्वन्ति मलनाशनम् ॥

Colophon : Nil.

Subject : Madhvamatakhaṇḍana. This particular portion deals with the creed of the followers of Madhvācārya in a contemptuous tone.

Remarks:—The Ms is in a fairly good condition. For full particulars see remarks under No 7655.

॥ ज्ञानांकुशम् (सव्याख्यम्) ॥

7661. JÑĀNĀṄKUŚAM (SAVYĀKHYAM).

Burnell's Catalogue No. 9748 b.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—6. Lines—8-9 to a Page. Script—Grantha. No. of Granthas—200. Author—? Complete. Not Printed.

Beginning :

अथ मुमुक्षूणामखिलपुरुषार्थसाधकानां नित्यशुद्धबुद्धमुक्ताद्वयानन्दज्ञानस्य चित्तसमाधानमूलत्वात् तदर्थं ज्ञानाङ्कुशाख्यं प्रकरणं करोति ।

॥ मू ॥ महात्मनां सत्त्ववशाद्व्यवस्थितिः
दृढा परिज्ञानसमाहितात्मनाम् ।
परापवादेष्वपि मादृगात्मनः
समानयेत्कल्पनया नयाङ्कुशम् ॥

(महात्मनामिति । परिज्ञानसमाहितात्मनां) परापवा-

देषु सत्सु सत्त्ववशात् महात्मनां व्यवस्थितिः दृढा भवति। माहगात्मनस्तु परापवादेषु सत्सु अनया कल्पनया अङ्कुशं समानयेदित्यन्वयः।

End:

॥ मू ॥ सर्वतः परिधावन्तं मनोमत्तमतङ्गजम्।
ज्ञानाङ्कुशवशं नीत्वा पुनः पन्थानमानयेत् ॥ २५ ॥

॥ व्या ॥ * *

॥ मू ॥ न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम्।
अङ्कुशेन विना मत्तो यथा दुष्टो मतङ्गजः ॥ २६ ॥

विषयान्प्रति भोः पुत्र सर्वानेव हि सर्वदा।
अनास्था परमा येषा सा युक्तिर्मनसो जये ॥ २७

* * *

आत्ममये महति पटे
जगति जगच्चित्रमात्मना लिखति।
स्वयमेव
पश्यन्प्रमुदं प्रयाति परमात्मा ॥ २८ ॥

हरिः ओम्।

त्वन्मायया कमलनाभविमोहितश्चेत्
विश्वात्मको जनमतेऽपि [illegible] विवेकः।

गाढान्धकारकवलीकृतलोचनानां
उन्मीलितेन किमु वा च निमीलितेन ॥ ३० ॥

तत्त्वे श्रुत्युपपत्तिभिर्व्यपगते द्वैतस्य तद्ग्राहिणः
प्रामाण्यं व्यवहारकारिविषयं मिथ्यापि सद्बोधकम् ।
मायायन्तु रवीवरस्य(?) मुखतः कूटस्थ.. ज्ञानतो(?)
दृष्टान्तैः परिणामसम्भ्रम इति अश्लेकमेकान्ततः ॥ ३१ ॥

जिज्ञासितेप्सितजिहासितबुद्धिगम्यं
रूपेण केनचिदिदं जगदिष्टमेव ।
इच्छा च सौख्यसरणी सुखमेवमिष्टं
सर्वं सुखात्मकमतो मदनन्यसौख्यम् ॥ ३२ ॥

Colophon: Nil.

Subject: Jñānāṅkuśa with a running commentary; Ślokas 1-25.

Remarks:—The Ms. is in a good condition.

The other works contained herein are:—

1. Nārāyaṇopaniṣad Bhāṣya. (Vide No. 1504)
2. One leaf—An extract from Mahābhārata.
3. Laghuvākyavṛttiprakaraṇa.
4. Saptaślokīprakaraṇa.

Neither the name of the author nor of the commentator could be identified.

॥ ज्ञानांकुशम् (सव्याख्यम्) ॥

7662. JÑĀNĀṄKUŚAM (SAVYĀKHYAM).

J. L. Collection No 984.

Substance—Paper. Size—9⅜×4 inches. Sheets—7. Lines—8-11 to a Page Script—Devanāgarī. No. of Granthas—160. Author—? Complete. Not printed.

Beginning—Same as No. 7662.

End:

॥ मू ॥ सर्वतः परिधावन्तं मनोमत्तमतङ्गजम् ।
ज्ञानाङ्कुशवशं नीत्वा पुनः पन्थानमानयेत् ॥ २५ ॥

॥ व्या ॥ एतत्प्रकरणप्रयोजनमुपपादयन्नुपसंहरति— सर्वत इति ॥

मनसि साधनचतुष्टयसम्पन्नस्याधिकारिणः सद्रूपसत्या· श्रवणादिक्रमेण ज्ञानोत्पत्त्या जीवन्मुक्तिर्विदेहकैवल्यं वा सिध्यतीति सर्वं समञ्जसम् ॥ २५ ॥

Colophon:

(मू) ज्ञानाङ्कुशः समाप्तः ।

(व्या) ज्ञानाङ्कुशटिप्पणं समाप्तम् ।

Subject. Jñānāṅkuśa; 1-25 Ślokas with commentary.

Remarks:—The Ms. is in a fairly good condition.

On the title page are given 8 verses from Viśvaguṇādarśa Campū.

॥ आत्मानात्मविवेकः ॥

7663. ĀTMĀNĀTMAVIVEKAḤ.

P. A. Collection No. 84.

Substance—Paper. Size—11 × 8½ inches. Sheets—16. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Complete. Not printed.

Beginning :

आत्मनः किंनिमित्तं दुःखं । शरीरपरिग्रहात् । शरीरपरिग्रहः केन वा भवतीति चेत् कर्मणा । कर्म केन वा भवति । रागादिभ्यः । रागादि केन । अभिमानात् । अभिमानोऽपि केन । अविवेकात् । अविवेकः केन । अज्ञानात् । अज्ञानं केन वा भवतीति चेत् । न केनापि भवति । अज्ञानमनाद्यनिर्वचनीयं । अज्ञानादविवेको जायते । अविवेकादभिमानः । अभिमानाद्रागादयः । रागादिभ्यः कर्माणि । कर्मणा शरीरपरिग्रहः । शरीरपरिग्रहाद्दुःखम् । दुःखस्य कदा निवृत्तिः । सर्वात्मना शरीरपरिग्रहाभावे ।

End :

आत्मानात्मविवेकेन कृत्वा तिष्ठति यः पुमान् ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥

आत्मानात्मविवेकेन पुनस्संसारनिह्नुतिः ।

तद्विना जन्मकोट्यापि बन्धच्छेदो न सिध्यति ॥

Colophon:

आत्मानात्मविवेकप्रकरणं समाप्तम् ।

नान्यो देवो स्वप्रकाशात्प्रतीचो

नान्यो मन्त्रो वेदसाराच्च नारात् ।

नान्यत्पन्था मुक्तये तत्त्वबोधात्

नान्यत्कार्यं सर्वसङ्कल्पहानात् ॥

ओं तत्सद्ब्रह्मार्पणमस्तु । हरिः ओम् । सच्चिदानन्दगुरवे नमः ॥

Subject: Ātmānātmaviveka a work on Advaita Vedānta which investigates into the nature of the difference between soul and matter.

Remarks:—The Ms is in a fairly good condition.

This text completely differs from that which is included in the minor works of Śaṅkarācārya and the authorship is not known.

॥ वाक्यसुधाकरः ॥

7664. VĀKYASUDHĀKARAḤ.

P. A. Collection No. 74

Substance—Paper. Size—8¾ × 4½ inches. Sheets—15 (3-17). Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Incomplete. Not printed.

Beginning :

स्वाज्ञानाविरोधिनस्तन्निवर्तने च ज्ञानान्तरमपेक्षते । ब्रह्म तु स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव । तत एव निवर्तकान्तरं च नापेक्षते । अथोच्यते ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधीति । तत्र । इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं किं ब्रह्मयाथात्म्याज्ञानविरोधि उत प्रपञ्चसत्यत्वरूपाज्ञानविरोधीति विवेचनीयम् ॥

End :

सा किं परमार्थभूता अपरमार्थभूता वा । न तावत्परमार्थभूता तस्या अपरमार्थान्वयायोगात् । नाप्यपरमार्थभूता परमार्थान्वयायोगात् । अपरमार्थे परमार्थबुद्धिशब्दयोर्निर्वाहकत्वायोगाच्चेत्यलं अतिप्रसङ्गेन ॥

Colophon : Nil.

Subject: Vākyasudhākara

Remarks:—The Ms is in good condition. This must be distinguished from Vākyasudhā which is published with the name Vākyasudhākara at Benares.

॥ सिद्धस्वरूपविवरणम् ॥

7665. SIDDHASVARŪPAVIVARAṆAM.

Burnell's Catalogue No. 9879. Page 97. Left column.

Substance—Palm leaf. Size—12½ × 1½ inches. Leaves—

39. Lines—7 to a Page. Script—Grantha No. of Granthas—200. Author—? Incomplete. Not printed.

Beginning:

......कल्पनाक्लेशः एकधा भवति । स त्रिधेत्यादिवाक्यानामुपासकविषयत्वात् न च देहपातश्च......प्रारब्धस्य विनाशान्तस्य 'तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यते' इति श्रुतेः । कर्मविपाकेन प्रारब्धनिवृत्तावपि उक्तश्चास्याज्ञानानिवर्त्यत्वाभिधानात् । ततश्च ज्ञानेन तदानीमेवाज्ञाने सर्वात्मना निवर्तयितव्ये प्रारब्धप्रतिबन्धादनिवृत्तिः ।

End:

वेदोक्तोपायोपेतो वेदान्तवाक्यादहंब्रह्मास्मीति ब्रह्मात्मा नाम....त्यमुच्यत इति वेदान्तसिद्धान्तः । तत्र केचिदाहुः । अस्य संसारिणो ब्रह्मविरुद्धस्वभावत्वात् न ब्रह्मात्मज्ञानान्मोक्षः किन्तु कर्मणा मोक्षः । कर्मसमुच्चिताद्ज्ञानादिति त...नुपपन्नम् । कर्मकार्यत्वे मोक्षस्य अत्यत्वप्रसंगात् । आत्मनो विपरीतरूपस्य चाज्ञानाध्यस्तत्वात् । अज्ञानस्य च सम्यक् ज्ञानेन निवृत्ते... ..संसारस्य च निवृत्तेर्ज्ञानादेव मोक्ष इति प्रतिपादयितुमीक्षितृत्वामित्यादिप्रकरणं प्रणीतम् । तत्संक्षेपतो व्याख्यायते ।

ईक्षितृत्वं स्वतस्सिद्धं जन्तूनां भोक्तृताऽन्विता ।

ततोऽन्यता— अज्ञानादित्यतो स्वं प्रसदसीति(?) नि-

वर्त्यते । ईक्षितृत्वं चिद्रूपत्वं अन्यनिरपेक्षं प्राणिनां सि-द्धम् । ततश्चिद्रूपाय........ ।

Subject: Siddhasvarūpavivaraṇa.

Leaf No. 16 स्मृतिविवरणम् (196 verses witha commentary)

,, 19 अचक्षुष्ट्वादित्यस्य विवरणम्

,, 35 प्रकाशस्थमित्यादिविवरणम्

,, 36 ईक्षितृत्वामित्यादिविवरणम्

(11 verses; total 108 verses)

,, 39 दृशिस्वरूपविवरणम् (88 verses)

Remarks :—The Ms. is in good condition. The title

"सिद्धस्वरूपविवरणम्"

is given on the cover. The author's name is not known.

॥ ज्ञानप्रबोधमञ्जरी ॥

7666. JÑĀNAPRABODHAMAÑJARĪ.

Burnell's Catalogue No. 6560. Page 94. Left column.

Substance—Paper. Size—9¼ × 4¼ inches. Sheets—18. Lines—8 or 9 to a page. Script—Devanāgarī. No. of Granthas—160. Author—? Complete. Not Printed.

Beginning.

श्री गणेशाय नमः ।

शिष्य उवाच । हे गुरो संसारोत्पत्तिं स्थितिं विनाशं यथोक्तं कथय । संसारस्वरूपं ज्ञात्वा यथाहं मुच्ये[ते](यम्) ।

यथा तव निजस्वरूपं ज्ञात्वा जन्ममरणदुःखपापपुण्यकर्म-
कोटिबन्धनान्मुच्येऽहं । तापत्रयरूपात्संसारात् श्रीरामं
शरणं गच्छेयम् ।

End:

ज्ञानं सदा प्रकाशरूपं । मायागुणाः सदाज्ञानरूपा
अन्धकारस्थानीयाः । एवं ज्ञातव्यं तदा कृतकृत्यो
भवति ।

Colophon: Nil.

Subject: Jñānaprabodhamañjarī

Remarks:—The Ms. is in a fairly good condition. It is full of scriptorial blunders

---

॥ ज्ञानप्रबोधमञ्जरी ॥

7667. JÑĀNAPRABODHAMAÑJARĪ.

Burnell's Catalogue No. 6561, Page 94. Left column. Substance—Paper. Size—9 × 4½ inches. Sheets—13. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—? Complete. Printed.

Beginning, end and subject—Same as No. 7666.

Colophon:

इति ज्ञानप्रबोधमञ्जरी समाप्ता ।

Remarks:—The Ms. is in good condition. After the colophon is given the following—

नृत्यन्ती तव वीक्षणाङ्गणगता कालः स्वभावादिभि-
भावान्सत्त्वरजस्तमोगुणमयानुन्मूलयन्ती बहून् ।
मामाक्रम्य यदा शिरस्यतिभरं संमर्दयत्यातुरं
मायाते(तः) शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥ १ ॥

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत्स आत्महा ॥ २ ॥

॥ शिष्यप्रश्नोपनिषत् ॥

7668. ŚIṢYAPRAŚNOPANIṢAD.

Burnell's Catalogue No. 6556. Page 94. Left column. Substance—Paper. Size—9½ × 4¼ inches. Sheets—10. Lines —8 to a Page. Script—Devanāgarī. No of Granthās—160. Author—? Incomplete, wants end. Not Printed.

Beginning :

श्रीरामवरद ।

अथ शिष्येण सप्त प्रश्नाः कृताः । ते कथं ।

तथा प्रोवाच शिष्यस्तु ब्रह्मशब्देन श[ब्दितम्] ।
जीवशब्देन च तथा क उक्तस्स्यात्तदुच्यताम् ॥ १ ॥

मायाकाकस्या(मायायाश्च तु का) शक्तिः तत्स्वरूपं च
कीदृशम् ।

अविद्यायाः कथं रीतिः किमात्मासौ तथा भवेत् ॥ २ ॥

प्रपञ्चोऽयं तथा.... कीर्तितः कीदृशात्मकः ।

संसारो नास्तिताग्रायो जीवस्स्यात्किन्निमित्तकः ॥ ३ ॥

एतत्प्रश्नोत्तरं वाच्यं मन्मनोरथपूर्वकम् ।

कर्तव्यं मां च सर्वज्ञं सद्गुरो कृपया त्वया ॥ ४ ॥

End :

रागद्वेषभया लज्जा मोहं चैव तु पञ्चकम् ।

व्योमपञ्चकमिति प्रोक्तं चतुरैस्तत्त्ववादिभिः ॥ १० ॥

ते षड्भावविकाराः के । अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यति इत्येते षड्विकाराः । एतैर्विकारैः युक्तं शरीरं मनुष्यजातीयब्राह्मणक्षत्रियवैश्यशूद्रभेदभिन्नम् । ब्रह्मचारीगृहस्थवानप्रस्थयतिरूपाश्रमभेदभिन्नः । अत्रिवसिष्ठकश्यपगौतमादिगोत्रभेदाभिन्नश्च । देवदत्तयज्ञदत्तविष्णु... ।

Colophon : Nil.

Subject: Śiṣyapraśnopaniṣad containing seven questions from a pupil and answers from a preceptor.

Remarks:—The Ms is in a fairly good condition. On the last sheet is given:

गुरुशिष्यकृतसप्तप्रश्न ।

॥ स्वरूपब्रह्मभावना ॥

7669. SVARŪPABRAHMABHĀVANĀ.

Burnell's Catologue No. 9902 a. Page 95. Right column. Substance—Palm leaf. Size—8×1 inches. Leaves—20 (6-25). Lines—5 to a Page. Script—Grantha. No. of Granthas—150. Author—Svaprakāśayati. Complete. Not Printed.

Beginning :

(नत्वा) श्रीवासुदेवेन्द्रगुरूनिह यथामति ।
कुरुते स्वप्रकाशेन्द्रः स्वरूपब्रह्मभावनाम् ॥

इह जगति ये मुमुक्षवः श्रुतवन्तोऽपि कोमलकण्ठकायमान...रूपतत्त्वज्ञानसन्तुष्टा मनननिदिध्यासनयोरलसास्सन्तः ...वनाद्विपरीतभावनाभ्यां पुनरपि संसारसम्भावितो वा उत वर्तमान...रानन्तरं मुक्तिरेव वेति भावावगतिं निश्चेतुमसमर्थाः तेषाम ..रब्धफलविशेषैः तच्छरीरदशायामेव बाह्यस्पर्श विनापि 'स एको ब्रह्मण आनन्दः' इत्युपनिषद्बोधितमुमुक्षुप्राप्यनिवृत्तिनिरतिशयनिजानन्दानुभवा...यसमाधिमार्गपरिज्ञानसंपादकमिदं स्वस्वरूपब्रह्मभावनावाक्यम् ।

End :

अज्ञानस्यानिर्वचनीयत्वाच्च तत्र सावयवत्वशंकावकाशः । तथा चोक्तं—'एवं त्रिधा नश्यति ग्वारममाया' इति ।

तस्मादकल्पितान्तरालोकनाम्रकमस्मद्वास्तवस्वरूपं साक्षि-चैतन्यमेव मुमुक्षुप्राप्यम्। शुद्धचैतन्यं परं ब्रह्म सिद्धं न समीक्षितम्।

ये त्विदं भावनावाक्यं सायंप्रातरतन्द्रिताः।
पठन्तोऽर्थानुसन्धानपूर्वकं ब्रह्मभावनाम्॥
कुर्वन्ति साक्षिचैतन्ये पञ्चकोशान्तरस्फुटे।
जीवस्य वास्तवे रूपे वस्तुतः परमात्मनि।
वर्तमानशरीरान्ते संसाराब्धिं तरन्ति ते॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभगवद्वासुदेवेन्द्रसरस्वती-श्रीचरणशिष्यश्रीस्वप्रकाशेन्द्रसरस्वतीरचितं मुमुक्षूणामसंभा-वनाविपरीतभावनाविरोधिनिजानन्दानुभवानुकूलसमाधिचतुष्टये-ऽपि स्वस्वरूपब्रह्मभावनयावस्थानमार्गप्रदर्शकं स्वस्वरूपब्रह्म-भावनावाक्यं संपूर्णम्।

Subject: Svarūpabrahmabhāvanā, a treatise on self-meditation to help seekers in Samādhi.

Remarks:— The Ms. is in a good condition. The other works contained herein are:—

1. Prāṇāyāmaprakaraṇa.
2. Cidacidgranthiviveka.

The last also is the work of this author. This author must be distinguished from the famous Svayamprakāśayati the author of many Vedānta works like Haratattvamuktāvalī.

॥ चिदाचिद्ग्रन्थिविवेकः ॥

7670. CIDACIDGRANTHIVIVEKAḤ.

Burnell's Catalogue No 9902 b. Page 95. Right column. Substance—Palm leaf. Size—8×1 inches. Leaves—27-51. Lines—5 to a Page. Script—Grantha. No. of Granthas—150. Author—Svaprakāśayati. Complete. Not Printed.

Beginning:

श्रीवासुदेवेन्द्रगुरून् प्रणम्य
तेषां प्रसादोदिदयातितीर्षुः ।

पुराणशास्त्रागमकल्पपादपा-
ग्रदासि(स्ति) माधूकवि(कर)वृत्ति सञ्चितम् ।
मया स्वतत्त्वैकफलं हि तादृश-
प्रकाशनं चात्मविचारहेतुकम् ॥

स्वप्रकाशानुसारेण स्वप्रकाशेन्द्रयोगिना ।
अनादिश्चिदचिद्ग्रन्थिविवेकोऽयं वितन्यते ॥

अथ कोऽयमात्मा यद्विचारः स्वतत्त्वाख्यफलस्वरूपानन्दरसाभिव्यञ्जकः । स्वयं शब्दार्थं ज्ञात्वा तर्हि त... पाक इति चेदुच्यते ।

End:

अज्ञानतत्कार्यातिरिक्त एवात्मेति प्रतिपादितवान् । तथा च स्वयमहमित्यत्रात्मशब्दलक्षणया साक्षिबोधक एव ।

Colophon:

इति चिदचिद्ग्रन्थिविवेके पञ्चकोशविवेकः समाप्तः ॥

Subject: Cidacidgranthiviveka, a treatise dealing what is Ātman and Anātmn.

Remarks:—The Ms. is in good condition. For the other works contained herein see remarks under No. 7669.

॥ चिदचिद्ग्रन्थिविवेकः ॥

7671. CIDACIDGRANTHIVIVEKAḤ.

Burnell's Catalogue No. 9902 c. Page 95 Right column. Substance—Palm leaf. Size—8⅛×1 inches. Leaves—25 (27-51). Lines- 5 to a Page. Script—Grantha. No. of Granthas—150. Author—Svaprakāśayati. Incomplete. Not printed.

Beginning:

अस्त्येवात्र हि पञ्चकोशकुहरे यद्ब्रह्मतत्त्वं निजं
भूत्वा यद्यपि कोशपञ्चकमतो लभ्यं विवेकार्थिना ।
मुक्तानात्ममिदं त्वथापि सहसा निश्रेयसाकांक्षिभिः
प्रेक्षावद्भिरवाप्यते श्रुतिशिरोभेदेन तत्सौम्यहम् ॥

श्रीवासुदेवेन्द्रगुरून् प्रणम्य
तेषां प्रसादोदिदया तितीर्षुः ।
अस्मीह देहात्मविवेकनावा
विषीरवातिरितया भवाब्धिम् ॥

पुराणशास्त्रागमकल्पपादपा-
यदस्ति माधूकरवृत्तिसंचितम् ।
मया स्वतत्त्वैकफलं हि तादृश-
प्रकाशनं चात्मविचारहेतुकम् ॥

स्वप्रकाशानुरोधेन स्वप्रकाशेन्द्रयोगिना ।
अनादिचिदचिद्ग्रन्थिविवेकोऽयं वितन्यते ॥

End:

'स एकोऽवशिष्टः शिवः केवलोऽहम्' इत्यादिभिः दशभिः श्लोकैः अज्ञानतत्कार्यातिरिक्त एवात्मेति प्रतिपादितवान्। तथा च स्वयमहमित्यत्र अस्मच्छब्दः लक्षणया साक्षिबोधक एव ।

Colophon:

इति चिदचिद्ग्रन्थिविवेके पञ्चकोशविवेकः समाप्तः ।

Subject: Cidacidgranthivivekaḥ, a work dealing with the difference between chit and achit.

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell gives the name of this work as Pañcakośa-viveka.

For other work contained herein vide No. 7669.

The author calls himself the desciple of Vāsudevendra and it is doubted if this is the same Vāsudevendra to whom Tattvabodha is ascribed.

॥ गुरुशिष्यकथनम् ॥

7672. GURUŚIṢYAKATHANAM.

Burnell's Catalogue No. 6562. Page 94 a. Left column. Substance—Paper. Size—$8\frac{1}{4} \times 1\frac{1}{4}$ inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—? Complete Not Printed.

Beginning:

श्री गणेशाय नमः ।

प्रणम्य शंकरं देवं महेश्वरपरात्परम् ।
आत्मबोधप्रकाशिन्यां ब्रूहि मे परमेश्वर ॥ १ ॥

सुकृतं परमं ध्यानं परं ब्रह्म भयापहम् ।
उत्पत्तिप्रलयं नास्ति इदं ब्रूहि महाप्रभो ॥ २ ॥

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
प्रणम्य शिरसा स्वामी कृष्णो वचनमब्रवीत् ॥ ३ ॥

ईश्वर उवाच ॥

असंख्या....ब्रह्म जानाति कोटि .... ।
.... विष्णुप्रलयं गत्वा ॥ ४ ॥

End:

गुह्यं परात्परं ब्रह्म कथितं च महाप्रभो ।
समर्थो वाऽसमर्थोऽपि यथा इच्छा तथा कुरु ॥ २८ ॥

क्षयं व्याधी च रोगी च अपस्मारोचनस्तथा(?) ।
क्षुधा तृष्णा तथा निद्रा मुच्यते च शनैः शनैः ॥ २९ ॥

स्वयं ब्रह्मा स्वयं विष्णुः स्वयं देवो महेश्वरः ।
स्वयं सिद्धः स्वयं बुद्धः स्वयं त्रैलोक्यतारकम् ॥ ३० ॥

Colophon:

इति श्रीहरिहरसंवादे गुरुशिष्यकथनं सम्पूर्णमस्तु ।
श्रीगुरुनाथार्पणमस्तु ।

Subject: Guruśiṣyakathana, written in the form of a dialogue between Hari and Hara on Vedānta.

Remarks:—The Ms. is in a fairly good condition and full of scriptorial blunders.

॥ सिद्धान्ततत्त्वम् ॥

7673. SIDDHĀNTATATTVAM.

Burnell's Catalogue No. 9888. Page 95. Right column. Substance—Palm leaf. Size—12⅜ × 1½ inches. Leaves—19. Lines—7 to a Page. Script—Grantha. No. of Granthas—150. Author—Anantadeva. Incomplete (Wants beginning). Printed.

Beginning:

आत्माहंकारादिदेहान्ताविद्यापरिकल्पित..........
चेति यो भावो मिथ्याप्रत्ययः एष ब्रह्मा अज्ञानविजृम्भितः स चात्मैकत्वविज्ञाने बीजनिवृत्तौ न विद्यते । तस्मान्मूलाभावे कुतं फल......हमादिलक्षणस्ये (?) । आत्मैकत्वं केन प्रकारेण अवगम्यत इति चेत् वेदान्तप्रमाणेन प्रतिपत्तव्यमित्याह ।

End.

अज्ञानोपहितश्च साक्षी । अज्ञाने च शक्तिद्वयमप्यावश्यकम् । तच्च कचित् संबद्धं जडत्वात् । ततश्च विक्षेपशक्तिसंबद्धश्चैतन्यमीश्वरः । आवरणशक्तिसंबद्धं चैतन्यं जीवः । इति जीवेश्वरयोरनादित्वम् । ततस्तयोर्भेदानुपपत्तेः लक्षणया * * *

श्रवणादिपरिपाकसमुत्पन्नतत्त्वज्ञानस्य ज्ञानस्याज्ञानतत्कार्यबाधे सति सत्यज्ञानानन्दाखण्डाद्वितीयं वस्तुमात्रमवशिष्यते नान्यत् ।

Colophon:

इत्थं परिव्राजकतीर्थपाद-
श्रीरामतीर्थानुसृतिप्रसादात् ।
सिद्धान्ततत्त्वं गतवाग्विवादं
अनन्तदेवेन मुदा न्यरूपि ॥

इत्येषा वाङ्मयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

इति श्रीमत्सकलदिङ्मण्डलविश्रान्तयशोमण्डलनिखिलश्रुतिशिरस्तत्त्वपरिशीलनमर्यादाधुरन्धरश्रीमदापदेवसूनुनाऽनन्तदेवेन कृतं सिद्धान्ततत्त्वनाम प्रकरणम् ।

Subject: Sidhāntatattva a primer on Advaita philosophy.

Remarks:—The Ms. is in a fairly good condition.

After the colophon is given—

श्रीमत्कौशिकवंश्येन श्रीनिवासविपश्चिता ।
लिखिता रामभक्तेन नाम्ना सिद्धा......... ॥

The other work contained herein is a fragment of the Upadeśasāhasrī—Padya Grantha, with commentary. Vide No. 7218 (Vol. XII.)

This work, Siddhāntatattva is by Anantadeva, the father of Āpadeva, who has written Mīmāmsānyāyaprakāśa and Bālabodhinī. Anantadeva's father also was called Āpadeva.

He must not be confounded with his grandson, Anantadeva II, the author of a commentary on Āpadeva's Nyāyaprakāśa and Smṛtikaustubha. Thus the author of the Siddhāntatattva lived in the end of the 16th century He is the pupil of Rāmatīrtha, a commentator on the Saṅkṣepa Śārīraka. Vide pp. 100-102, J. O R. Madras Vol. II. 1928.

The work has been published in "the Pandit" Series, Benares. He is also the author of a commentary on Tattvaprakriyā. This author is also called Govindadeva as can be known from his commentary on Tattvaprakriyā.

॥ महावाक्यदीक्षा ॥

7674. MAHĀVĀKYADĪKṢĀ.

J. L. Collection No 987.

Substance—Paper Size—$5\frac{1}{4}\times4\frac{1}{2}$ inches. Sheets—1-16. Lines—10 to a Page Script—Devanāgarī. No. of Granthas—185. Author—? Incomplete. Not printed.

Beginning:

शुक्लांबरधरं + सर्वविघ्नोपशान्तये ॥

ओं। सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

ओं मं मण्डूकाय नमः। ॐ कालाग्निरुद्राय नमः।
योगः। ओंकारस्य सूर्य ऋषिः जगती च्छन्दः। ईश्वरो
देवता।

End:

इति ध्यानं। "ओं तद्ब्रह्म। ओं तद्वायुः। ओं तत्सत्यं।
ओं तत्सर्वे। ओं तत्पुरोत(र्न)मः। अन्तश्चरति भूतेषु गुहा-
यां विश्व.........(मूर्तिषु)"।

Subject: Mahāvākyadīkṣā.

Remarks:—The Ms. is in a decaying condition and ends abruptly.

॥ श्रुतिसारः ॥

7675. ŚRUTISĀRAḤ.

Burnell's Catalogue No. 6124. Page 92. Right column. Substance—Paper. Size—8½ × 5 inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Pūrṇānanda. Complete. Not printed.

Beginning:

श्री गणेशाय नमः। श्री सरस्वत्यै नमः।
श्रीमद्गुरुमूर्तये नमः।

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः।

यो विभात्यवभासात्मा तस्मै ज्ञानात्मने नमः ॥

अथात्मप्रतिपादनम् । अयमात्मा स्वानुभवगम्यः । स्वसंवेद्यः ।

को देवो यो मनस्साक्षी मनो मे दृश्यते मया ।

स हि देवत्वमेवासीत्येको देव इति श्रुतेः ॥

तथा च श्रुतिः ॥

'एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥'

इत्याथर्वणी श्रुतिः ।

End:

न हि बन्धपदं न हि मोक्षपदं
न हि पापपदं न हि पुण्यपदम् ।
न हि पूर्णपदं न हि रिक्तपदं
किमरोदसि मानस सर्वं समम् ॥

दत्तात्रेयप्रसादेन श्रुतिसारो मया कृतः ।

पूर्णानन्दमुनीन्द्रेण सर्वलोकोपकारकः ॥

Colophon:

इति श्रुतिसारः पूर्णानन्दविरचितः श्रीरामार्पणमस्तु ॥

Subject: Srutisāra a treatise purporting to give the essence of Upaniṣads on Vedānta.

Remarks:—The Ms. is in a fairly good condition. On the title sheet is given:

पुस्तकश्रुतिसारपूर्णानन्दकृतम् । ग्रन्थसंग्रहकर्ता राजेश्री नारोतानाजि तत्त्वज्ञः ।

This work, must be distinguished from another Śrutisāra which is said to be by Toṭakacārya. The author evidently appears to be a Northern Indian.

॥ श्रुतिसारः ॥

7676. ŚRUTISĀRAḤ.

Burnell's Catalogue No. 6425. Page 92. Right column. Substance—Paper. Size—8 × 4⅕ inches. Sheets—11. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—130. Author—Pūrṇānandaḥ Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7675.

Remarks :—The Ms. is in a fairly good condition.

॥ श्रुतिसारः (सटीकः) ॥

7677. ŚRUTISĀRAḤ (SAṬĪKAḤ.)

Burnell's Catalogue No. 9892. Page 95. Left column. Substance—Palm leaf. Size—18¼ × 1¾ inches. Leaves—21 (48-89). Lines—6 to a Page. Script—Telugu. No. of Granthas—1000. Author—Toṭakācārya. Complete. Not printed.

Beginning:

श्रीकृष्णं प्रत्यगात्मानं भक्त्या नत्वा गुरूनपि ।
टीकामुदाहरिष्यामि तोटकश्लोकगामिनीम् ॥

तत्र त्रैलोक्ये........नत्वादिमित्यादिना मध्यश्लोके स्वे-
ष्टदेवतागुरुनमस्कारस्यादौ .... ।
ननु प्रकरणं नाम शास्त्रैकदेशसंबन्धं शास्त्रकारा..........
क्षणम्रे रूढ इति चेत् ॥

End:

यस्यान्तस्थं......गोभोगिगन्धर्वदैत्यैः....
....चित्रं नानाविधं विश्वं ररम्यत्यतिशयेन
रमते तत्र.........................
........................विष्णुं मुहुर्मुहुर्नमामि ॥

Colophon:

श्रीमच्छङ्करभगवत्पादशिष्यतोटकाचार्यविरचितं श्रुतिसार(स)-
मुद्धरणाख्यं प्रकरणं समाप्तम् ॥

इति मन्दमुमुक्षूणां तत्त्वयोगप्रसिद्धये ।
तोटकश्लोकटीकेयं रचिता पददीपिका ॥

इति श्रीमत्पूर्णात्मयोगीन्द्रशिष्येण चिदानन्दयोगिना विर-
चिता तत्त्वदीपिका तोटकश्लोकटीका समाप्ता ।

Subject: Śrutisāra otherwise known as Śrutisārasamuddharaṇa with a ṭīkā named Tattvadīpikā or Padadīpikā which is said to be the work of Cidānandayogin.

Remarks:—The Ms. is in a decaying condition. This work must be distinguished from another Śrutisāra by Pūrṇānanda. (No. 7675) If the text is as is said by Toṭakācārya the work is valuable and rare.

॥ साक्ष्यसाक्षिविवेकः ॥

7678. SĀKṢYASĀKṢIVIVEKAḤ.

Burnell's Catalogue. No. 9667 d.

Substance—Palm leaf. Size—15 × 1½ inches. Leaves—5 (3-7) in the end. Lines—10 to a Page. Script—Grantha. No. of Granthas—125. Author—? Complete. Not Printed.

Beginning:

साधूनामनेकजन्मसमनुष्ठितविविधसत्कर्मविधूतपातकानां अत एव शुद्धान्तःकरणानां साधनचतुष्टयसम्पन्नानामात्मज्ञानार्थं चतुर्विंशतितत्त्वोत्पत्तिप्रकारप्रदर्शनपुरस्सरं साक्ष्यसाक्षिपरिशोधना क्रियते । तत्र साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः ।

* *

मुमुक्षुत्वं नाम मुक्तात्विच्छा । तत्र तावत् साक्षिस्वरूपं निरूप्यते ।

End:

तस्मात्त्वंपदलक्ष्यार्थभूतकूटस्थस्यैव साक्षिणः तत्पदलक्ष्यार्थेन परिपूर्णेन ब्रह्मणा बोधयत्यत्यन्तं तत्त्वमस्यादिवा-

क्यम् । एतत्साक्ष्यभिन्नब्रह्मैवाहवस्मीति बुद्ध्या तद्व्य-
तिरिक्तं साक्षिप्रपञ्चजातमसत्यमिति विलाप्य विलम्ब्यत
इति । अत्र श्रुतिः । जीवन्मुक्तः सन् प्रारब्धक्षयानन्तरं
विदेहमुक्तो भवति । तत्र श्रुतिः । 'भूयश्चान्ते विश्वमा-
यानिवृत्तिः ॥' इति ।

साक्ष्यसाक्षिपरिशोधनन्त्विदं
ग्रन्थतो विरचितो नृकेसरी ।
भक्तरक्षणकृतोद्यमस्सदा
प्रीतिमेति नितरां मयार्चितः ॥

Colophon:

साक्षिविवेकः समाप्तः । श्रीनृसराजाय नमः ।

Subject: Sākṣyasākṣiviveka a treatise differentiating the soul from matter, a work on the lines of Dṛgdṛśya-viveka.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 7457.

॥ वेदान्तविलासः ॥

7679. VEDĀNTAVILĀSAḤ.

Burnell's Catalogue No. 12174 f. Page 208. Right column. **Substance**—Palm leaf. **Size**—17¼ × 1½ inches. **Leaves**—3 (33-35). Lines—6 to a Page. **Script**—Telugu. **No.** of Granthas—100. **Author**—?. **Incomplete. Not Printed.**

Beginning:

तत्तदाकारवृत्त्युपहिततत्वस्य प्रमातृविशेषणत्वात् ।... कारवृत्तिदशायां परिमाणाकारवृत्त्यभावे......कपरिमा-णाकारवृत्त्युपहितप्रमात्रा चैतन्यभिन्नसत्ताकत्वाभावे ना-तिव्याप्त्यभावात् ।

End:

ननु साक्ष्यध्यस्ततापी....रजतमिति प्रत्ययस्स्यादहं सुखीति वदति चेत् उच्यते । स हि सुखादीनां अन्तःक-रणावच्छिन्नचैतन्याध्यस्तत्वप्रयुक्तमहं सुखीति ज्ञानम् ॥

Colophon. Nil.

Subject: Vedāntavilāsaḥ.

Remarks: —The Ms. is in a fairly good condition. The other works contained herein are mantras. There is a loose leaf at the end dealing with व्याकरण. This is an extract from some Vedanta treatise

---

॥ अहमर्थविवेकः ॥

7680. AHAMARTHAVIVEKAḤ.

Burnell's Catalogue No. 9717 c

Substance—Palm leaf Size—$14\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—11-15. Lines—5 to a Page. Script—Telugu. No. of Granthas—100, Author—? Incomplete. Not Printed.

Beginning:

श्री रस्तु ।

वक्ष्यामि परमं गुह्यं युष्माकं मुनिपुङ्गवाः ।
विनि... ..नं वेदसंभूतं भक्तानां ..... ॥

रुद्रविष्णुप्रजानाथप्रमुखाः सर्वचेतनाः ।
स्वभावेनाहमित्याहुः इदमित्यपि चिन्ततः ॥

इदं बोद्धव्यसन्थार्थे त्वहंबुद्धिस्तथात्मनि ।
प्रसिद्धा सर्वजन्तूनां विवादोऽत्र न कश्चन ॥

End:

अनुगृह्णाति तं शिष्यं समता कृपया तदा ।
तदहं सुखदं नित्यमविनाशं विनश्वरम् ॥
तुभ्यं वक्ष्यामि कृपया सच्चिदानन्दलक्षणम् ॥

स्कन्दः ॥
सर्वात्मन् सर्वभूताक्षन् सर्वभूते रत... ।
येन ज्ञानेन मे देव मुक्तिर्भवति तत्क्षणात् ॥
तज्ज्ञानं श्रोतुमि....मद्वचः शृणु शंकर ॥

स्कन्दः ।

Subject · Ahamarthavivekaḥ.

Remarks—The Ms. is in decaying condition. For the other works contained herein see remarks under No. 1404.

॥ असङ्गात्मप्रकरणम् ॥

7681. ASAṄGĀTMAPRAKARAṆAM.

Burnell's Catalogue No. 9664. Page 93. Left column.

Substance—Palm leaf. Size—16×1½ inches. Leaves—14-21. Lines—7 to a Page. Script—Telugu. No. of Granthas—100 Author—Śaṅkarabhāratītīrtha. Incomplete. Not printed.

Beginning:

(तटाकस्थं य)था तोयं नानारूपेण निश्चलम् ।
भाति दण्डप्रहारेण तथा ब्रह्मेति निश्चिनु ॥

तटाकस्य तोयं निश्चलं दण्डप्रहारेण यथा नानारूपेण प्रतीयते, ब्रह्मापि तेनैव प्रकारेण नानेव भाति । वस्तुत एक एवेति निश्चिनु । 'अजायमानो बहुधा विजायत' इति श्रुतेः 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः ।

End:

इदं प्रकरणं नित्यं येऽनुसंदधते बुधाः ।
अनायासेन मर्त्यत्वं हित्वा यान्ति परं पदम् ॥
ब्रह्मज्ञानोदयात्पूर्वं देहभावं (स)दागतिम् ।

मर्त्यत्वं अहं ब्रह्मास्मीति न्यायेन देहाभिमानं परित्यज्य अनायासेनैव परं पदं निरतिशयानन्दत्वमेति नान्यः पन्था विद्यते ब्रह्म प्राप्नुवन्तीत्यर्थः । 'ब्रह्म वेद ब्रह्मैव भवति' । 'ब्रह्मसंस्थोऽमृतत्वमेति' । 'तरति शोकमात्मवित्' । इति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमन्नृसिंहभारतीतीर्थ-

शिष्येण श्रीमच्छङ्करभारतीतीर्थविरचितं असङ्गात्म-
प्रकरणं सव्याख्यं सम्पूर्णम् ॥

Subject: Asangātmaprakaraṇa a treatise on Advaita Vedānta explaining that the soul is different from mind, senses, intellect etc

Remarks — The Ms is in a fairly good condition. The names of Guru and Śiṣya suggest that they were the heads of Sringeri Mutt

॥ तत्त्वबोधः ॥

7682. TATTVABODHAḤ.

J. L. Collection No 982

Substance—Paper. Size—5¼ × 4 inches. Sheets—12. Lines—7 to a Page. Script—Devanāgarī No of Granthas—85 Author—Vāsudevendra Complete. Printed.

Beginning.

श्रीगणेशाय नमः ॥

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां यथार्थाय तत्त्वबोधो विधीयते ॥ १ ॥

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूततत्त्ववि-
वेकप्रकारं वक्ष्यामः ॥

End:

ज्ञानिनो देहो गङ्गायां सुक्षेत्रे वा कीटके वा यत्र कुत्रा-

पि वा पततु न तस्य तावता हानिः । स्वानन्दमग्नस्य कृतार्थस्य सर्वेभ्यः कर्मभ्यः मुक्तस्येति एतदालोड्य स्वानन्दो भूत्वा कृतार्थो भवति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रस्वामिकृततत्त्वबोधप्रकरणं समाप्तम् ॥

Subject: Tattvabodha

Remarks:—The Ms. is in a fairly good condition. The name of the author's Guru appears to be Vāsudevendra Yogīndra from the introductory verse; but the colophon gives the author's name also as Vāsudevendra. Probably the author and his guru bore the same name. Whether the author is the same as the author of Cidacidgranthiviveka. (No. 7670.) or the latter's Guru deserves further investigation.

Tattvabodha is a very familiar work and is printed in many places and is translated into many North and South Indian Vernaculars. This work is ascribed to Śaṅkarācārya as also to Vāsudevendra. This Ms. does not give us any room for suspicion because the colophon clearly states Vāsudevendra as the author.

॥ तत्त्वबोधः ॥

7683. TATTVABODHAH.

P. A. Collection No. 125.

Substance—Paper. Size—$12\frac{1}{4} \times 5\frac{1}{2}$ inches. Sheets—5. Lines—8-9 to a Page. Script—Devanāgarī. No. of

Granthas—75. Author—Vāsudevendra. Complete. Printed.

Beginning:

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां यथार्थाय तत्त्वबोधो विधीयते ॥

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः ।

End:

स्वानन्दमयस्य कृतार्थस्य सर्वेभ्यः कर्मभ्यो मुक्तस्येति एतदालोच्य स्वानन्दो भूत्वा कृतार्थो भवति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्वासुदेवेन्द्रस्वामिकृतं तत्त्वबोधप्रकरणं समाप्तम् ।

Subject: Tattvabodha

Remarks:—The Ms. is in a good condition.

॥ आत्मविद्याविलासः ॥

7684. ĀTMAVIDYĀVILĀSAḤ.

Burnell's Catalogue No. 6175. Page 93. Left column. Substance—Paper. Size—$6\frac{1}{4} \times 8\frac{1}{2}$ inches. Sheets—14. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—Sadāśivabrahman. Complete. Printed.

Beginning:

श्री गणेशाय नमः ॥

वटतरुनिकटनिवासं
पटुतरविज्ञानमुद्रितकराब्जम् ।
कंचन देशिकमाद्यं
कैवल्यानन्दकन्दलं वन्दे ॥ १ ॥

निरवधिसंसृतिजलनिधि-
निपतितजनतारणस्फुरन्नौकाम् ।
परमतभेदनघुटिकां
परमशिवेन्द्रार्यपादुकां नौमि ॥ २ ॥

देशिकपरमशिवेन्द्रा-
देशवशोद्बुद्धदिव्यमहिमाहम् ।
स्वात्मनि विश्रान्तिकृते
सरसं प्रस्तौमि किंचिदिदम् ॥ ३ ॥

End·

इति गुरुकरुणापाङ्गात्
आर्याभिर्ध्यधिकषष्टिसंख्याभिः ।
निरवद्याभिरदोचं
निगमशिरस्तन्त्रसारभूतार्थम् ॥ ६२ ॥

गदितामिममात्मविद्या-
विलासमनुवासरं स्मरन्विबुधः ।
परिणतपरमात्मविद्यः
प्रपद्यते सपदि परमार्थम् ॥ ६३ ॥

Colophon :

इति श्रीमद्भगवद्गुरुवर्यसदाशिवब्रह्मकृतात्मविद्याविलासः सम्पूर्णः ।

Subject: Ātmavidyāvilāsā, a poem on the Brahman and the Jivanmukta in 62 verses in Arya metre.

Remarks:—The Ms. is in good condition. For details see under No. 6709

॥ आत्मविद्याविलासः ॥

7685. ĀTMAVIDYĀVILĀSAḤ.

Burnell's Catalogue No. 4894 Page 165. Left column. Substance—Paper. Size—$9\frac{7}{8} \times 5\frac{1}{4}$ inches. Sheets—5. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Sadāśivabrahman. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7684.

Remarks:—The Ms. is in a fairly good condition. After the colophon is found a letter to Śarabhoji I, written by Malhāri Paṇḍita, a court-poet of the same, as follows :—

निर्व्याजं भवता दुरीश्वरगृहद्वारासिका त्याजिता:
वीरश्रीशरभक्षितीश्वर वयं किं वाऽन्यदाशास्महे ।
क्षीरक्षालितशर्वशेखरकलाधावल्यगर्वच्छिदा
कीर्त्या भासितदिक्तटा भवतु ते सन्तानपारम्परी ॥ १ ॥

निर्गत्य तञ्जानगरात् श्रीमतामाज्ञया मया ।
कुम्भकोणे गतं तत्र दिनमेकमभूत्स्थितम् ॥ २ ॥

मायूरमगमं स्नात्वा कावेर्यां दिनपञ्चकम् ।
सायंप्रातर्नमस्कृत्य शंकरं लोकशङ्करम् ॥

पुत्रोत्पत्तिं समाशास्य महाराजस्य भूयसीम् ।
पुत्रलाभाय भवतां वैद्यनाथालयं गतः ॥

बालाम्बिकापरिवृढं प्रसाद्य बहुधा ततः ।
समागतोऽस्मि दीपाम्बापुरं तत्सर्वमानितम् ॥

सदाशिवब्रह्मरूपं ब्रह्माद्राक्षं चिरेप्सितम् ।
प्रणम्य प्रार्थितास्ते हि महाराजकृते मया ॥

पुत्रोत्पत्तौ झटित्यत्र प्रसादः क्रियतामिति ।
संज्ञया सूचयन् पुत्रो भविता ह्यचिरादिति ॥

आत्मविद्याविलासाख्यः स्वीयो ग्रन्थः प्रसादितः
युष्माकं भूयसे भाविश्रेयसे कारिता मया ॥

भिक्षास्तित्स्तत्प्रसादात्पुत्रसम्पत्तिरुत्तमा ।
जातेयमिति चाश्रौषं श्रीमतां भवतामिह ॥

महत्प्रसादचिह्नानि श्रेयांसीति वदन्ति हि ।
भवत्प्रहितवैद्येन दत्तौषधिनिषेवणात् ॥

आनुकूल्यं शरीरस्य सम्यगेव हि दृश्यते ।
इतःपरं तथा शक्तिर्नास्ति देशान्तराटने ॥

वार्धक्यादपि दौर्बल्यादलंबुध्या च साम्प्रतम् ।
कावेरीतीर एवात्र वस्तव्यमिति निश्चयः ॥

भवत्कल्पिताग्रहारेषु तत्रापि स्वरसा रुचिः ।

त्रिकोटिहाख्यके मुक्तिक्षेत्रे प्रीतिरनुत्तमा ॥

ग्रामोपकण्ठे वासार्थं तेषां हि शिवसान्निधौ ।
निर्मातव्यो मठः कश्चिदित्येवं निश्चितं मया ॥

भवतामाज्ञया तत्र जायते मठनिर्मितिः ।
इदं च भवतां सर्वं श्रेयसे प्रार्थ्यते मया ॥

कराहतमहीचक्रः परसैन्यभयंकरः ।
शरभोजिमहीपालः शरदां शतमेधताम् ॥

करदीकृतभूपाल वरदीकृतवासव ।
शारदीयति ते कीर्तिः शरभोजिमहीपते ॥

मल्लारिपण्डितेन्द्रस्य मात्रा चासौ नियोजितः ।
अनन्तदेवनामासौ पद्यानारचयत्कविः ॥

Thus this Ms. is of considerable historical interest, giving as it does the occasion for the composition of the Ātmavidyāvilāsa by Sadāśivabrahman

ĀTMAVIDYĀVILĀSA.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7686	B. L.	6476	Paper.	$5\frac{1}{4} \times 3$	20	5	Devanāgarī.	Complete.
7687	,,	6477	,,	$6\frac{3}{4} \times 3\frac{1}{2}$	13	6	,,	,,
7688	,,	9856 d	Plam leaf.	$11\frac{1}{2} \times 1\frac{1}{2}$	6 (214-219)	7	Grantha	,,
7689	,,	9536 b	,,	$18\frac{3}{4} \times 1$	5 (166-170)	5	,,	,,
7690	,,	9535 b	,,	$19 \times 11\frac{1}{2}$	4 (175-178)	7	,,	,,
7691	,,	9857 d	,,	$18\frac{1}{2} \times 1\frac{1}{4}$	3 (82-84)	8	,,	,,
7692	T. S.	174	Paper.	$10 \times 4\frac{1}{4}$	4	10	Devanāgarī.	,,
7693	J. L.	981	,,	$9\frac{1}{2} \times 4\frac{1}{2}$	8 (2-4)	10	,,	Incomplete Ślokās 19 to the end.

DETAILED REMARKS
on the
ĀTMAVIDYĀVILĀSA MSS.
IN THE ABOVE TABLE.

7688 For other works contained herein see under No 7616.

7689 The text has an additional verse at the beginning—

चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् ।
गुरुवरमाद्यं कंचन निरवधिकानन्दनिर्भरं वन्दे ॥

The other work contained herein is Paramahamsacaryā. (No. 7614.)

7690 The other work contained herein is Paramahamsacaryā. (No. 7618.)

7691 This text also has the above given additional verse at the beginning. For other works contained herein see remarks under No. 7617.

Dr. Burnell has not noticed this work under this No.

7692 After the colophon is given—

इदं पुस्तकं शिवभट्टपुत्र अप्पानामकस्येति ज्ञेयम् ।

॥ सिद्धान्तचन्द्रिका ॥

7694. SIDDHĀNTACANDRIKĀ.

J. L. Collection No 983.

Substance—Paper. Size—7½ × 5 inches. Sheets—5. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—Rāmānandasarasvatī. Incomplete Not printed.

Beginning:

श्री शिवाय नमो नमः ॥

श्रीरामभद्रसंयमि-
चरणौ शरणं विधाय बोधाय ।
सिद्धान्तचन्द्रिकामृत-
सेकैः संशोधयामि चेतस्स्वं ॥ १ ॥

श्रीगुरुकृपाकटाक्षात्
सारं शास्त्रस्य सकलमाकलयन् ।
सुकृती कृतीह कश्चि-
च्छ्रुतिसुखमित्थं जगौ मिथः सुहृदे ॥ २ ॥

चित्रमकृत्रिममेकं
ज्योतिर्निहितं गुहासु संख्यासु ।
तदुपरि किमपि तमिस्रं
त्रैलोक्यमहो विविच्य दर्शयति ॥ ३ ॥

End:

इत्थमशेषश्रुतिशिखरार्थं
विदुषाहितं मितं गदितम् ।
आकर्ण्य सपदि विगलित-
शोकः स सुखाऽसुखार्णवनिमग्नः ॥ ४९ ॥

इति सुखचिदात्मवस्तुनि
कुतुकाहतिमन्दमपि मया गीतम् ।
कलभाषितं शिशोरिव
कलयतु हर्षं सतामभीक्ष्णमिदम् ॥ ५० ॥

श्रीरामयतिमुखेन्दोः
शारदसमये गुरुप्रसादमये ।
सिद्धान्तचन्द्रिकाजनि
संभूय पिबन्तु सहृदयचकोराः ॥ ५१ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दसरस्वतीतिलकश्री·
रामभद्रभगवच्चरणारविन्दमकरन्दमन्दिर(श्रीमद्रामानन्दसरस्वती)
विरचिता सिद्धान्तचन्द्रिका सम्पूर्णा।

Subject: Siddhāntacandrikā a poem giving the essence of Advaita Vedānta. 1-51 Ślokās.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given a loose verse.

विश्वनाथ वृषारूढ मामुद्धर दयानिधे ।
सर्वदा शिव काशीश महेश मृड शङ्कर ॥

The author of this work seems to be a pupil of Rāmabhadrayamin who in his turn is the desciple of Ānanda Sarasvati and thus belongs to the end of the 17th century.

॥ सिद्धान्तचन्द्रिकाव्याख्या—उद्गारः ॥

7695. SIDDHĀNTACANDRIKĀVYĀKHYĀ—UDGĀRAḤ.

Burnell's Catalogue No. 6499. Page 96. Left column. Substance—Paper. Size—11 × 5½ inches. Sheets—25. Lines—10-14 to a Page. Script—Devanāgarī. No.

of Granthas—1000. Author—Gaṅgādhara Sarasvati. Complete. Not printed.

Beginning:

श्रीगणाधिपतये नमः ॥

प्रणमदमरमौलिप्रस्फुरद्रत्नरश्मि-
प्रकरविमलदीपैर्नित्यनीराजिताङ्घ्रिः ।
शिशिरकिरणधारी योगिहृत्पद्मचारी
कृपयतु मयि साम्बः कोऽपि संवित्कदम्बः ॥ १ ॥

श्रीरामसंयमीन्द्रोः
सारां सिद्धान्तचन्द्रिकां प्रपिबन् ।
प्रथयति गङ्गाधरयति-
भव्यचकोरस्तदुद्गतोद्गारान् ॥ २ ॥

इह खलु बहुविधपरंपरार्जितसुकृतपरिपाकजनितविवेकवैराग्यादिसाधनमुमुक्ष्वभिलाषितमोक्षोपायब्रह्मात्मैक्य-ज्ञाननिदानं सर्ववेदान्तसिद्धान्तसारसंग्रहरूपं प्रकरणं चिकीर्षुः

अनुबन्धचतुष्टयं सूचयन् चिकीर्षितं प्रतिजानीते—
श्रीरामभद्रेति ।

॥ मूलम् ॥

श्रीरामभद्रसंयमि-
चरणौ शरणं विधाय बोधाय ।

सिद्धान्तचन्द्रिकामृत-

सेकैः संशोधयामि चेतस्त्वं ॥ १ ॥

॥ व्याख्या ॥ श्रीरत्र लक्ष्मीस्त्रयी च ।

End:

॥ मूलम् ॥

श्रीरामयतिमुखेन्दोः

शारदसमये गुरुप्रसादमये ।

सिद्धान्तचन्द्रिकाजनि

संभूय पिबन्तु सहृदयचकोराः ॥ ५१ ॥

॥ व्याख्या ॥ आदौ श्रीरामभद्रेति मध्ये गुरुमूर्तिमिति अन्ते गुरुप्रसादमय इति आदिमध्यावसानेषु गुरुस्मरणलक्षणं मङ्गलं ग्रन्थस्य प्रचयगमनाय अध्येतृश्रोतॄणामायुरभिवृद्धये परमपुरुषार्थसिद्धये च कृतमिति सर्वं शिवम् ।

निगुम्फेऽस्मिन् श्रीमद्गुरुचरणगंभीरवचसां

ममौत्सुक्यादेते कतिपयपदार्थाः प्रकटिताः ।

विचिन्वानोऽप्यन्तर्जलधिजठरं को नु कलयेत्

इयत्तां रत्नानां प्रचुरतरयत्नैरपि कृती ॥ १ ॥

महतामादरणीया मनसि मदीयापि कृतिरियं न कथम् ।

धुत्तूरकुसुममालां धत्ते न किमीश्वरोऽपि भक्तस्य ॥ २ ॥

क गभीरसूक्तिविभूतिः काहं बालस्तथापि कृतिरेषा ।

श्रीगुरुसदयकटाक्षात्साहाय्याद्वरदराजविदुषश्च ॥

Colophon:

(मूलं) इति + श्रीमदानन्दसरस्वतीतिलकश्रीमद्रामभद्रभगवत्पूज्यपादपाथोजपादुकापरिचरणपरायणश्रीमद्रामानन्दसरस्वतीविरचिता वेदान्तसिद्धान्तचन्द्रिका संपूर्णा ।

(व्याख्या) इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीगङ्गाधरसरस्वतीविरचितः सिद्धान्तचन्द्रिकोद्धारः संपूर्णः ।

Subject: Siddhāntacandrikāvyākhyā a commentary on Rāmānanda Sarasvatī's Siddhāntacandrikā with the text.

Remarks:—The Ms. is in good condition. The auther calls himself the desciple of Rāmacandra Sarasvatī. One Varadarāja is said to have helped the author in writing this work, There is a Transcript copy of this work in the library.

॥ ब्रह्मानन्दविलासः ॥

7696. BRAHMĀNANDAVILĀSAḤ.

Burnell's Catalogne No. 6859. Page Left column. Substance—Paper. Size—5½ × 2¾ inches. Sheets—15. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—84. Author—Śāśvatānanda. Complete. Not Printed.

Beginning:

श्री शाश्वतानन्दब्रह्मणे नमः ॥

24081

नत्वा गुरुवरचरणान्

नानामोहान्धकारखरकिरणान् ।

ब्रह्मानन्दविलासं

ब्रह्मवदीड्यं करोमि सोल्लासम् ॥ १ ॥

हित्वा दृश्यात्ममतिं

मत्वा प्रत्यञ्चमद्वितीयचितिम् ।

त्यक्त्वा विषयाभिरतिं

धृत्वोदास्ते मुनिः शिवात्ममतिम् ॥ २ ॥

निर्मूलितविषयाशाः

निस्त्रैगुण्यात्मरमणबद्धाशाः ।

शाटीभवद्दशाशाः

शान्ता भुवि शेरते गलत्पाशाः ॥ ३ ॥

End:

नाहं किञ्चिज्जाने

नानाभूतन्तु वस्तु बोधाब्धौ ।

चिदिहैकाकिन्यस्ति

श्रीकण्ठादिस्वरूपिणी सत्यम् ॥ ६२ ॥

कृतकनकन्यक्कुदीर्घतमनिद्रैः ।

करुणासुधासमुद्रैः

कर्मध्वस्तन्तु रामभद्रैर्नः ॥ ६३ ॥

Colophon:

इति श्रीमत्परमहंसशाश्वतानन्दस्वामिविरचितो ब्रह्मानन्दविलासः

सम्पूर्णः ॥

Subject: Brahmânandavilâsa.

Remarks :—The Ms. is in good condition.

The author of this poem, is one Śāśvatānanda, pupil of Rāmabhadrasamyamin, among whose numerous pupils, many an author is recorded in this volume. The author flourished in the 18th century. The work resembles the Ātmavidyāvilāsa of Sadāśivabrahman.

॥ बोधप्रक्रिया ॥

7697. BODHAPRAKRIYĀ.

J. L. Collection No. 985.

Substance—Paper. Size—$6\frac{1}{4} \times 4$ inches. Sheets—9. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—? Complete. Not printed.

Beginning:

पूर्णं ब्रह्म विशुद्धमद्वयमजं सच्चित्सुखैकात्मकं

साम्येनात्मगतात्मचिद्युततया संप्राप्तवत्पौरुषम् ।

तं दत्तं गुरुमीश्वरं च जगतां नित्यं नमामो वयं

यद्वाक्यामृतपानतो ह्यमृतता शुद्धैर्जनैर्लभ्यते ॥ १ ॥

पूर्वं गुरुप्रसादादिग्रन्थेषु ब्रह्मप्रकृतिजीवेश्वरोपक्रम-संहारबन्धमोक्षरूपाणि विस्तरशो(तो)ऽभिहितानि । विना-

यैर्न ब्रह्मात्मविज्ञाने निश्चय उपजायते । प्रीतिश्च । तथापि
न बालप्रज्ञैः समग्रत्वेनावमन्तुं शक्यानि ॥

End:

यथाकारणोपाधिः विवर्तरूपस्तथा कार्योपाश्रयोऽपि ।
तस्मात्स औपाधिकोऽपि भेदः विवर्तरूप एव । तेनावि
...न दृष्टया वर्तमानोऽपि न किंचित् । तस्मात् तत्परं ब्रह्म
सर्वाकारनिराकारं निर्गुणं निर्विकल्पं निजाकाराद्भ्रष्टं य-
थावदेवास्त्यत एवोच्यते "नेह नानास्ति किंचन"
इति ।

Colophon:

बोधप्राक्रियायां जीवेश्वरविवरणं प्रथमम् ॥

Subject: Bodhaprakriyā, I Chapter only.

Remarks:—The Ms. is in a fairly good condition.

The author of this work whose name is not known, seems to have written many works, of which Guruprasāda is one.

॥ सच्चिदानन्दभुजङ्गम् ॥

6798. SACCIDĀNANDABHUJAṄGAM.

Burnell's Catalogue No. 8580.

Substance—Paper. Size—6¾ × 4 inches. Sheets—12. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—72. Author—? Complete. Not Printed.

Beginning:

श्री गणेशाय नमः ।

यतस्तत्त्वमस्यादिवाक्योपदे

स्सदा सच्चिदानन्दभावो विभाति ।

स आचार्यवर्यस्स देवास्समस्ता

गिरस्तस्य वेदाः पदाद्देवगङ्गा ॥ १ ॥

कृतपूर्वैः

कलात्वाख्यनादान्तसिद्धान्तवादैः ।

चिदानन्दमेकं वदन्त्यात्मनिष्ठा-

स्स सिद्धो न चेत्किं फलं तैश्च वादैः ॥ २ ॥

क्व जीवस्य वार्ता क्व वा कोशवार्ता

क्व भूतानि वेधोमुखा देवताः क्व ।

क्व कैलासवैकुण्ठसत्यादिलोकाः

चिदानन्द एकस्सदाचार्यलक्ष्यः ॥ ३ ॥

चिदानन्दभावे सदाचार्यबुद्धे

कुतोऽष्टौ च सिद्धिः कुतो लोकभेदान् ।

कुतो देवसारूप्यलाभादि कांक्षे-

यदेतत्समस्तं सदोपाधियुक्तम् ॥ ४ ॥

End:

ज्ञलाभा-

भिजेषागमाद्वा मनःप्रीतिरस्ति ।

अमुष्यानुभूत्या सुखस्यामृताप्तिः
तथा सिद्ध्यो नित्यतृप्तिश्च भूयात् ॥ ४५ ॥

चिदा सच्चिदानन्दसंज्ञं भुजङ्ग-
प्रयातं पठेद्यस्तु वेदान्तसारम् ।
स दीर्घायुरारोग्यमैश्वर्यमेति
.... ॥

Colophon:

पिङ्गलनामसंवत्सरग्रीष्मऋतौ ज्येष्ठमासे कृष्णपक्षे एकादश्यां रविवारे अश्विनीनक्षत्रे इदं पुस्तकं लिखितम् ॥

श्रीरस्तु । शुभमस्तु । श्रीसरस्वत्यै नमः ॥

Subject: Saccidānandabhujangam, 1-46 Slokas. A short treatise, dealing with 'Sat', 'Cid', and 'Ānanda', in Bhujangaprayāta metre

Remarks:—The Ms. is in a fairly good condition. The Ms. is dated 1757 A. D.

॥ श्रुतिस्मृतिसंग्रहः ॥

7699. ŚRUTISMṚTISANGRAHAḤ.

Burnell's Catalogue No. 9718 *. Page 29. Right column.

Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—4 (14-17). Lines—7 to a Page. Script—Telugu. No. of Granthas—70. Author—? Incomplete, wants beginning. Not printed.

Beginning:

"तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "परीक्ष्य लोकान् कर्मजितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।"

श्रद्धावित्तो भूत्वा आत्मन्येवात्मानं पश्यति सर्वं पश्यन्। तदिहाभ्युक्तां "सत्यं ज्ञानघ(म)नन्तं ब्रह्म"। "नित्यं विज्ञानमानन्दं ब्रह्म"। "प्रज्ञानं ब्रह्म"। "अयमात्मा ब्रह्म"। "सोऽयमात्मा ब्रह्म"। "यदेव साक्षादपरोक्षं ब्रह्म"। "य आत्मा सर्वान्तरः। तस्मै व्याचक्षत्येष त आत्मा सर्वान्तरः"।

End:

'तत्र को मोहः कश्शोकः एकत्वमनुपश्यतः'। 'तरति शोकमात्मवित्' 'श्रद्धा स्वसा.........ति अभयं वै जनक प्राप्तोऽसि'

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

श्रुतिस्मृतिपुराणेभ्योऽयमर्थोऽवसीयते।

ओं तत्॥

Subject: Śrutismṛtisaṅgraha—a citation of Vedāntaśrutis and Smṛtis at one place. This work consists of

profuse quotations from Śrutis and Smṛtis.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 982. (Vol. II)

॥ पञ्चीकरणभूतोपसंहारः ॥

7700. PAÑCĪKARAṆABHŪTOPASAMHĀRAḤ.

Burnell's Catalogue No. 6490 c. Page 97. Left column. Substance—Paper. Size—8¾ × 4⅛ inches. Sheet—1 (28). Lines—9 to a Page. Script—Devanāgarī No. of Granthas—90. Author—? Complete. Not printed.

पृथ्व्यां भूतानि लीयन्ते पृथिव्यप्सु प्रलीयते ।
पयः प्रलीयते वह्नौ ज्योतिर्वायौ प्रलीयते ॥ १ ॥

वायुः प्रलीयते व्योम्न्यहंकारे व्योम लीयते ।
लीयतेऽहं महत्तत्त्वे तदव्यक्ते प्रलीयते ॥ २ ॥

अव्यक्तं पुरुषे ब्रह्म निष्कलं संप्रलीयते ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ ३ ॥

शब्दाद्व्योम स्पर्शतस्तेन वायु-
स्ताभ्यां रूपं वह्निनैते रसाश्च ।
अम्भो ह्येभिः गन्धतो भूधराद्याः
भूताः पञ्च स्युर्गुणानां क्रमेण ॥ १ ॥

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ २ ॥

को देवो यो मनस्साक्षी मनो मे द्रक्ष्यति मया ।
तर्हि देवस्त्वमेकोऽसि एको देव इति श्रुतेः ॥ ३ ॥

जाग्रत्स्वप्नसुषुप्तीनां साक्षी कूटस्थचिन्मयः ।
अहमस्मि परं ब्रह्म सच्चिदानन्दमद्वयम् ॥ ४ ॥

स्वबोधगलिताबोधतद्भूतजमद्भुतम् (?) ।
सदानन्दघनाद्वैतवरं ब्रह्मास्मि निर्भयः ॥ ५ ॥

अहंकारादिदेहान्तो वेद्यो नाम्ना घटादिवत् ।
तत्साक्षी सर्वगो ज्योतिरात्मा त्वंपदलक्षितम् ॥ ६ ॥

सदेव सोम्येदमग्र आसीदिति श्रुतेः ।

Colophon:

इति पञ्चीकरणभूतसंहारः पूर्णानन्दार्पणमस्तु ।
नरसिंह्मभट्टस्येदं पुस्तकम् । पुष्पग्रामस्थ भीमसेनेन लिखितम् ।

Subject: Pañcīkaraṇabhūtopasaṃhāra.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are (1) Ādhyātmavidyopadeśavidhi, (2) Pañcīkaraṇa.

॥ पञ्चब्रह्माख्याविवरणम् ॥

7701. PAÑCABRAHMĀKHYĀVIVARAṆAM.

Burnell's Catalogue No. 6480 c. Page 208. Right column.
Substance—Paper. Size—8 × 4¾ inches. Sheets—6-9.
Lines—9 to a Page. Script—Devanāgarī. No. of Gran-

thas—60. Author—Līlānanda. Complete. Not printed.

Beginning:

श्री गणाधिपतये नमः ।

....आत्मानन्दनाथगुर(वे) बोधरूपिणे ।

नमस्कृत्वा[थ] प्रवक्ष्यामि पञ्चब्रह्मविवर्णनम् ॥ १ ॥

तारकं दण्डकञ्चैव कुण्डल्य(ली अ)र्धचन्द्रकम् ।

पञ्चमं बिन्दुसंज्ञाख्यं पञ्चब्रह्म सनातनम् ॥ २ ॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।

पञ्चदेवता विख्याता(?) पञ्चब्रह्मस्वरूपवान् ॥ ३ ॥

End:

एतन्तद्गुह्यं परं गोप्यं गुह्यात्गुह्यं सनातनम् ।

पठनात्पाठनाद्वापि श्रवणान्मननादिभिः ।

पूजयेत्पुस्तकं नित्यं सर्वकामफलं लभेत् ॥ ५५ ॥

इत्येवं शम्भुनाथे(ते)न कथितं उमया प्रति ।

स्वात्मानन्दप्रसादेन लीलानन्देन भाषितम् ॥ ५६ ॥

Colophon:

इति श्रीतारकब्रह्मराममन्त्रग्रन्थाभ्यन्तरे पञ्चब्रह्माख्यविवरणं सम्पूर्णम् ॥

Subject: Pañcabrahmākhyavivaraṇam—an extract from a treatise called Tārakabrahmarāmamantra.

Remarks:—The Ms. is in good condition.

The other works contained herein are (1) Hṛdayaguhya and

(2) Pañcabrahmatattvam. The author is the desciple of one Svātmānanda.

॥ तत्वार्थप्रकरणम् ॥

7702. TATTVĀRTHAPRAKARAṆAM.

P. A. Collection No. 76 a.

Substance—Paper. Size—7½ × 4 inches. Sheets—6. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—? Incomplete. Not Printed.

Beginning:

श्री रामः कर्ता ॥

तत्त्वार्थप्रकरणं लिख्यते ।

प्रत्यगात्मा परंज्योतिः परमानन्दचिद्घनः ।
अहं नाहं न देहादि शिवोऽनन्तोऽहमद्वयः ॥ १ ॥

न स्त्री न षण्ढो न पुमान्जडो नाहं मृषात्मकः ।
व्यक्तं नाहं न चाव्यक्तम् तदाधारोऽहमद्वयः ॥ २ ॥

End:

कः सम्बन्धः शुक्तिकादेरध्यस्तरजतादिना ।
असता जगता को मे सम्बन्धः स्यात्सतस्तथा ॥ ६० ॥

शक्तिं विना महासिन्धौ पतन्तो वर्षबिन्दवः ।
न मुक्ताफलतां यान्ति यथा तत्पतनं वृथा ॥ ६१ ॥

Subject: Tattvārthaprakaraṇam; 61 verses only.

Remarks:—The Ms. is in a fairly good condition. The other

work contained herein is—

'स्वरूपानुभवम्'

॥ वेदान्तविषयकश्लोकसंग्रहः ॥

7703. VEDĀNTAVIṢAYAKAŚLOKA-SAṄGRAHAḤ.

Burnell's Catalogue No. 9667 s. Page 91. Left column.

Substance—Palm leaf. Size—17 × 1½ inches. Leaves—7. Lines—4 to a Page. Script—Grantha. No. of Granthas—60. Complete. Printed.

Beginning:

कच्चित्कल्याणकारिण्यस्संविदस्ते स्थिरा पदे ।
कच्चित्तपस्ते निर्विघ्नं कल्याणमनुवर्तते ॥

End:

ज्ञानेन्द्रियाणि खलु पञ्च तथापराणि
कर्मेन्द्रियाणि मन आदि चतुष्टयञ्च ।
प्राणादिपञ्चक...वियदादिकञ्च
कामश्च कर्म च तमः पुनरष्टमीयुः (?) ॥

Subject: Vedāntaviṣayakaślokasaṅgraha A collection of verses dealing with philosophy from the रामायण, and other works.

Remarks:—The Ms. is in a decaying condition. For the other works contained herein see remarks under No. 7457.

॥ शुकाष्टकम् ॥

7704. ŚUKĀṢṬAKAM.

Burnell's Catalogue No. 9858 b. Page 93. Right column. Substance—Palm leaf. Size—11½ × 1½ inches. Leaves -- 2 (1-2) at the end. Lines—7 to a Page. Script—Grantha. No. of Granthas—20. Author—Śuka Complete. Printed.

Beginning.

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥ १ ॥

End:

सत्यं सत्यं परममसृतं शान्तिकल्याणरूपं
मायारण्ये दहनमलिनं शान्तिकल्याणदीपम् ।
तेजोरूपं निगमसदृशं व्यासपुत्राष्टकं यः
प्रातः काले पठति मनसा याति निर्वाणमार्गम् ॥ ९ ॥

Colophon:

शुकाष्टकं समाप्तम् ॥

Subject. Śukāṣṭaka. An ideal Vedantic poem.

Remarks:—The Ms. is in a good condition. For the other work contained herein see remarks under No. 7137.

This work is published at Madras in 1921 with a foreword by K. S. Ramaswami Sastri as appendix II of the Edition of an English Translation of Dattātreya's Avadhūta Gītā.

ŚUKĀṢṬAKA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7705	B. L. 8487	Paper.	$5\frac{1}{4} \times 2\frac{7}{8}$	3	6	Devanāgarī.	Complete.
7706	,, 8937	,,	$8\frac{1}{2} \times 9\frac{3}{4}$	1	20	,,	,,
7707	Not noticed by Burnell No. 12350	,,	$15\frac{1}{2} \times 4\frac{1}{4}$	1	84	,,	,,
7708	,, 12651	,,	$5\frac{7}{8} \times 3\frac{3}{4}$	2	10	,,	,,
7709	,, 12652	,,	$6\frac{1}{2} \times 4\frac{1}{8}$	2	8	,,	,,
7710	,, 12653	,,	$9\frac{1}{2} \times 4$	2	8	,,	,,
7711	,, 12661	,,	$4\frac{1}{2} \times 2\frac{7}{8}$	4	6	,,	,,
7712	,, 12663	,,	$5\frac{3}{4} \times 3\frac{1}{4}$	2	8	,,	,,
7713	,, 12714	,,	$10 \times 3\frac{7}{8}$	1	21	,,	,,
7714	,, 18685	,,	$6 \times 3\frac{1}{4}$	4	5	,,	,,
7715	,, 15566 j.	Palm leaf.	$15\frac{3}{4} \times 1\frac{1}{2}$	1 (48th)	6	Telugu.	,,
7716	P. A. 87	Paper.	8×4	2 (1 & 8)	6	Devanāgarī.	Incomplete.

DETAILED REMARKS

on the

ŚUKĀṢṬAKA MSS.

IN THE ABOVE TABLE.

7705 & 7710 The following additional verse is given at the end:—

सत्यं सत्यं परममभृतं सर्वकल्याणहेतुं
मायाविद्यागगनदहनं शान्तिनिर्वाणदीपम् ।
नित्यं भक्त्या निगमसदृशं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा ब्रह्मनिर्वाणमीयात् ॥

7710 On the title page is given—

" बाबाजीनायकपुण्डे ॥ "

7711 On the title page is given—

' तुल्जाराजस्येदम् ॥ '

7715 For the other works contained herein see remarks under No. 7277.

7716 The text is followed by a Mahraṭhı commentary.

॥ पञ्चकोशविवेकः ॥

7717. PAÑCAKOŚAVIVEKAḤ.

P. A. Collection No. 113.

Substance—Paper. Size—$8\frac{1}{16}\times 4\frac{1}{16}$ inches. Sheets—4. Lines—7 to a page. Script—Devanāgarī. No. of

Granthas—45. Author—Bhāratītīrtha Vidyāraṇya ?
Complete. Not printed.

Beginning

श्रीगणेशाय नमः ॥

गुहाहितं ब्रह्म यत्तत्पञ्चकोशविवेकतः ।
बोद्धुं शक्यं ततः कोशपञ्चकं प्रविविच्यते ॥ १ ॥

End:

य एवं ब्रह्म वेदैषः ब्रह्मैव भवति स्वयम् ।
ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४२ ॥

Colophon:

इति पञ्चकोशविवेकः समाप्तः ॥ श्रीरस्तु ॥

Subject: Pañcakośavivekaḥ.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following verse:—

स्थूलारुन्धतिकान्यायात्पञ्चकोशप्रदर्शनम् ।
कालव्याधेन नष्टत्वात्पक्षिरूपत्वमुच्यते ॥

Rāmakṛṣṇa has written a commentary for this work called Pañcakośavivekavyākhyā. This Rāmakṛṣṇa is the desciple of the famous Vidyāraṇya and commented upon almost all the works of his Guru. Considering the fact that barring his original works the others are commentaries on his Guru's works it may be nearer truth if we say that this work also for which he wrote a commentary might have been written by his guru. About the duality or identity of Bhāratītīrtha and Vidyāraṇya vide remarks under No. 7864.

॥ पञ्चकोशविवेकः ॥

7718. PAÑCAKOŚAVIVEKAḤ.

P. A. Collection No. 112

Substance—Paper. Size—$8\frac{1}{8} \times 4\frac{1}{16}$ inches Sheets—5. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—45. Author—Bhāratītīrthavidyāraṇya ? Complete. Not Printed.

Beginning. end, colophon and subject—Same as No. 7717.

Remarks:—The Ms. is in a good condition.

After the colophon is given—

स्थूलारुन्धतिकान्यायात् + पञ्चिरूपत्वमुच्यते ॥

॥ आनन्दब्रह्मलक्षणम् ॥

7719. ĀNANDABRAHMALAKṢAṆAM.

Not noticed by Dr. Burnell. Ms No. 15572.

Substance—Paper. Size—$6\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—6. Lines—7 to a Page Script—Devanāgarī. No. of Granthas—44. Author—? Complete. Not Printed.

Beginning:

॥ मू ॥ श्रीगुरून् परमानन्दस्वरूपानभिवादये ।

तापत्रयापहा येषां कृपा ब्रह्मामृतप्रपा ॥ १ ॥

सद्गुरुबोधचन्द्र उदेला सद्वस्तुची प्राप्तिकरणार त्याचा

बोध चन्द्रज्ञानलक्षण चन्द्रोदय जाहला बोध चिद्ग्रन्थिक्षय समई ॥

मू ॥ श्लोक ॥

तारकस्योपदेशेन गुरुर्भूत्वा विमुक्तिदः ।
काश्यामपीश्वरस्तस्मादीश्वरादधिको गुरुः ॥ १ ॥

ईश्वरस्सर्वहेतुत्वात् हेतुस्संसारमोक्षयोः ।
मोक्षस्यैव गुरुस्तस्मान्नास्ति तत्त्वं गुरोः परम् ॥ २ ॥

क्षम्यतामिति किं वाच्यं प्रसीदेति किमुच्यताम् ।
क्षमाप्रसादसम्पूर्णः स्वभावादेव मे गुरुः ॥ ३ ॥

End:

मू ॥ सा मतातिप्रपाखेछा या त्वरा स्त्रीषु दृश्यते ।
मर्तारमनुयान्तीषु विछिद्याशां सुतादिषु ॥

प्रकाशकस्तथाप्यर्कः प्रकाश्यं पद्ममेव हि ।
तथा गुरूणां वचनैः जिज्ञासुर्बोधमञ्चति ॥ २४ ॥

उक्तप्रकारमुमुक्षुचकोरांस तन्मय बोध जाहला ध्यानामृत सेउानि चित्कला ॥

श्लोक ॥

निरन्तराचित्तस्य प्रवाहो ध्येयस्य ध्यानमीरितम् ।
ध्यानामृतचित्कला सत् आनन्दब्रह्मलक्षणे ॥

Subject: Ānandabrahmalakṣaṇa, a short Vedāntic treatise in 22 ślokas, some of which are quotations. The

text is followed by a Mahraṭhi gloss here and there.

Remarks:—The Ms. is in good condition.

॥ पञ्चीकरणम् ॥

7720. PAÑCĪKARAṆAM.

P. A. Collection No. 20.

Substance—Paper. Size—7 × 5¼ inches. Sheets—3 (20-22). Lines—12-14 to a Page. Script—Devanāgarī. No. of Granthas—55. Author—? Complete Not printed.

अथ पञ्चीकरणप्रारम्भः ॥ पृथिव्यापस्तेजो वायुराकाश इति भूतपञ्चकः । प्राणापानव्यानोदानसमाना इति प्राणपञ्चकः । श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राण इति ज्ञानेन्द्रियपञ्चकः । वाक्पाणिपादपायूपस्था इति कर्मेन्द्रियपञ्चकः । मनोबुद्धिचित्ताहंकारप्रकृतयः इति अन्तःकरणपञ्चकः । शब्दस्पर्शरूपरसगन्धा इति विषयपञ्चकः । नागकूर्मकृकरदेवदत्तधनंजया इति उपप्राणपञ्चकः । महत्तत्व इति षट्त्रिंशः ॥

आस्थिचरम(र्म)नखमांसरोम इति पृथ्व्यंशः । रक्तमूत्रशुक्लमज्जाश्लेष्म(इति)जलांशकः । क्षुधातृषानिद्रालस्यमैथुन इति तेजोंशकः । धावनं चलनं कम्पनं आकुञ्चनं निरोधन-

मिति वाय्वंशकः। कामक्रोधमोहलोभभय व्योमांशकः। इति पञ्चभूतांशकः॥

जीवात्म चञ्चलात्म निर्मलात्म ज्ञानात्म भूतात्म महात्म महाभूतात्म परमात्म इति अष्टात्मकः। स्थूल सूक्ष्म कारण महाकारण कैवल्यमानन्दचिन्मय चिद्रूप इत्यष्टतनुः। संकृत तृणीकृत वर्तनी क्रोधिनी मोहिनी अतिचारिणी गन्धचारिणी वासिनीत्यष्टशक्तिः।

ग्रहणशङ्का भय लज्जा जुगुप्सा जाति वृत्तशीलानीति अष्टपाशः।

कृतं च वर्धनं चैव रूपयौवनमेव च।
विद्याराजतपश्चैव मदाष्टं च प्रकीर्तितम्॥

पृथिवीपञ्च पयःपञ्च तेजःपञ्च वायुपञ्च आकाशपञ्च अविद्याकामकर्म इति पुराष्टकः। नख रुधिर मांस त्वक् शुक्ल मेदः मज्जा इति सप्तधातुः।

तनुर्मनधनं चैव राज उत्सवशेवकः।
विश्वास इति च प्रोक्ता सप्तव्यसनईरिताः॥

कामः क्रोधश्च लोभश्च मोहश्च मरणं परः।
वैरिवर्ग इह प्रोक्तः सर्वदेहसमाश्रितः॥

क्षुत्पिपासाशोकमोहजरामरण इति षडूर्मि(र्मयः)। अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भाव-

विकाराः । मधुराम्लतिक्तकटुकषायलवण इति षड्रसाः ॥ अविद्या विस्मृति राग द्वेष अभिव्यसनमिति क्लेशपञ्चकः। अन्नमय प्राणमय मनोमय विज्ञानमयानन्दमय इति कोश-पञ्चकः ॥ नित्यानित्यवस्तुविवेक इहामुत्रफलभोगविराग शमदमादिसाधन मुमुक्षुत्वमिति साधनचतुष्टयः । परा पश्यन्ती मध्यमा वैखरी (इति) वाकचतुष्टयः। अण्डज स्वेदज जरायुजोद्भिज्ज इति उत्पत्तिचतुष्टयः । ब्रह्मादिवर्ण-चतुष्टयः । धर्मार्थकाममोक्षपुरुषार्थचतुष्टयः॥ सत्त्वरजस्तम इति गुणत्रयः । राजसतामससात्त्विकाहंकारास्त्रयः । आध्यात्मिकाधिभौतिकाधिदैविक तापत्रयः । जाग्रत्स्वप्नसुषुप्तित्रयः । विश्व तैजस प्राज्ञ अभिमानत्रयः । कायिक वाचिक मानसिक कायत्रयः । व पुष्पत न वर्तन मोहन भावत्रयः । संचित प्रारब्धागामि कर्मत्रयः । ज्ञातृ ज्ञान ज्ञेय ध्यातृ ध्यान ध्येय कर्तृ कर्म क्रिया इति त्रिपुटिः । ...., ...मलत्रयः । तनुमनधनत्रयः । जीवात्म परमात्म अन्तरात्मा त्रयः । नारीधनमूर्तिकार्थ्यत्रयः। वात पित्त श्लेष्मा दोषत्रयः । यमनियमासनाद्यष्टाङ्ग-योगः । उदराग्नि मन्दाग्नि शोकाग्नि बडवाग्नि दावाग्नि इति अग्निपञ्चकः । सुखईण सुविचार निस्संगज्ञानाढ्य सुखानन्द तुर्य तुर्यातीत सप्तभूमिकाः । षड्विंशमयः स्थूलतनुः । चित्ताहंकारकारणतनुः । इन्द्रियदशक

वायुपञ्चक मनोबुद्धि सप्तदश सूक्ष्मतनुः। अस्य व्यक्तान्वयः। पृथ्व्यापद्वयं स्थूलतनुः। अग्निवायुद्वयं सूक्ष्मतनुः। आकाशं कारणतनुः। इति पञ्चीकरणम्॥ षड्विंशत्तत्त्वविवरणम्। स्थूल सूक्ष्म कारण महाकारण कैवल्य इति पञ्चदेहः। तारकदंडक.................... । ब्रह्म विष्णु रुद्र ईश्वर सदाशिवः इति पञ्चब्रह्म। अकार उकार मकार इकार ओंकार इति पञ्चमात्राः। वैखरी मध्यमा पश्यन्ती परा परात्परा पञ्चवाचः। अधश्शून्य मध्यशून्य निरामय महाशून्य इति शून्यपञ्चकः। ऋग्वेद यजुर्वेद सामवेदाथर्वणवेद सूक्ष्मवेद (इति) वेदपञ्चकः। रजस्तमस्सत्त्व शुद्धसत्त्व निर्गुण पञ्चगुणाः। प्रथम द्वितीय तृतीय चतुर्थ पञ्चमा पञ्चपदा गायत्री। सृजनपालनसंहारक्रिया....चन्द्रक्रिया क्रियापञ्चकः। पूर्वदक्षिण पश्चिमोत्तर ऊर्ध्व पञ्चदिशः। भूतकोण शम्भुकोण अग्निकोण वायुकोण अधःकोण पञ्चकोणाः। सद्योजात वामदेव(अघोर) तत्पुरुष ईशान पञ्चमुखः। अभ्रूहस्तपर्व अर्धपर्व...प्रमाणपञ्चकः। ह्रस्व दीर्घ प्लुत अर्ध असर(?)मात्रापञ्चकः। पीत रक्त श्वेत नील कृष्ण पञ्चवर्णाः। भूचरी खेचरी चाचरी अगोचरी उपरी पञ्चमुद्राः। रौवीकृता(?) उर्वीकृता योगीकृता ज्वालाकृता कृतातीत(?) इति पञ्चकृताः॥ पिपीलिका विहङ्ग कपि

मीन शेष पञ्चमार्गाः । पटाकाश मठाकाश महाकाश चिदाकाश निराकाश इत्याकाशपञ्चकः। सत्य वैकुण्ठ कैलास आश्रय निराश्रय पंचलोकः । विश्व तैजस प्राज्ञ प्रत्यगानन्द निरंजन पञ्चाभियातिः । तन्तु वितन्तु घन सुस्वर अनाहत पञ्चवाद्याः । विष्णुरविगणेशेश शक्ति इति पञ्चायतनः । इच्छाशक्ति ज्ञानशक्ति क्रियाशक्ति पराशक्ति आदिशक्ति पञ्चशक्तिः । क्षर अक्षर कूटस्थ क्षेत्रज्ञ आत्मा पञ्चविकारः । नित्यानन्द योगानन्द अद्वैतानन्द विदेहानन्द ब्रह्मानन्द पञ्चानन्दः । अहं कोऽहं शिवोऽहं अनामयोऽहं...पञ्चदीक्षा ।

Colophon:

इति पञ्चीकिरण(म्)समाप्ता(प्तम्) ॥

Remarks:—The Ms. is in good condition

॥ महावाक्यविवेकः ॥

7121. MAHĀVĀKYAVIVEKAḤ.

Burnell's Catalogue No. 9723 m.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaf—1 (19th). Lines—7 to a Page. Script—Grantha. No. of Granthas—10. Author—? Complete. Printed.

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम् ॥ १ ॥

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥ २ ॥

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि ।
बुद्धेस्साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥ ३ ॥

स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः ।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम् ॥ ४ ॥

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराधुनाऽप्यस्य तादृक्त्वं तदितीर्यते ॥ ५ ॥

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥ ६ ॥

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।
अहंकारादि देहान्तात्प्रत्यगात्मेति गीयते ॥ ७ ॥

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥ ८ ॥

Colophon:

इति श्रीमहावाक्यविवेकः समाप्तः ।

Subject: **Mahāvākyaviveka 8 verses.**

Remarks:—The Ms. is in good condition.

After the colophon is given the verse:—

हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यम् ।

हरिगुरुशिवयोगं सर्वभूतस्थमेकं

सकृदपि मनसा मां ध्यायते यस्स मुक्तः ॥

This is a portion of the Pañcadaśī written by Vidyāraṇya (No. 7421). Nos. 7341, 7842, 7348, 7844 & 7159, whether called Aṣṭaślokī or Mahāvākyaviveka are all identical with this, though wrongly ascribed in the Mss. as Śaṅkarā's, work.

॥ महावाक्यविवेकव्याख्या—दीपिका ॥

7722. MAHĀVĀKYAVIVEKAVYĀKHYĀ—DĪPIKĀ.

S. S. Collection No. 44

Substance—Paper. Size—7½×4⅝ inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Rāmakṛṣṇa Complete. Printed.

श्री गणेश्वरदगुरुभ्यां नमः ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।

महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः ॥

मुमुक्षोर्मोक्षसाधनब्रह्मात्मैकत्वसिद्धये प्रसिद्धानां चतुर्णां महावाक्यानां अर्थं क्रमेण निरूपयिष्यन् परमकृपालुराचार्यः आदौ तावदैतरेयारण्यकगतस्य 'प्रज्ञानं ब्रह्म' इति महावाक्यस्यार्थमाह ।

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदाहृतम् ॥

इति । येन चक्षुर्द्वारा निर्गतान्तःकरणवृत्त्युपहितचैतन्येन इदं दर्शनयोग्यं रूपादिकमीक्षते पश्यति पुरुषः । तथा श्रोत्रद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन येन चैतन्येन शब्दजातं शृणोति । तथैव घ्राणद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन चैतन्येन गन्धजातं जिघ्रति । वागिन्द्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति । येन च रसनेन्द्रियद्वारा निर्गतान्तःकरणवृत्त्युपहितेन स्वाद्वस्वादु विजानाति । अनुक्तसमुच्चयार्थः चशब्दः । तथा चोक्तानुक्तैः सकलेन्द्रियैः अन्तःकरणवृत्तिभेदैश्च उपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमुच्यत इत्यर्थः । अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्तीत्यस्यावान्तरवाक्यार्थः संक्षिप्य दर्शितः । तत्त्वं प्रज्ञानशब्दार्थं अभिधाय ब्रह्मशब्दार्थमाह ।

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥

उत्तमेषु देवादिषु मध्यमेषु मनुष्येषु अधमेषु अश्वगवादिषु देहधारिषु आकाशादिभूतेषु च जगज्जन्मादिहेतुभूतं यच्चैतन्यमस्ति तद्ब्रह्मशब्देनेर्यते । अनेनैष ब्रह्मैष इन्द्रः

इत्यादेः प्रज्ञा प्रतिष्ठेत्यन्तस्य अवान्तरवाक्यस्यार्थः संक्षिप्य दर्शितः। इत्थं पदार्थमभिधाय वाक्यार्थज्ञानमाह। अतः प्रज्ञानं ब्रह्म मय्यपि इति। यतस्सर्वत्रावस्थितं प्रज्ञानसंज्ञितं चैतन्यं ब्रह्म अतो मय्यवस्थितं प्रज्ञाचैतन्यं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः॥

एवमृक्शाखागतमहावाक्यार्थं निरूप्य यजुःशाखासु मध्ये बृहदारण्यकोपनिषद्गतस्य 'अहं ब्रह्मास्मि' इति महावाक्यस्यार्थाविष्करणाय अहंशब्दार्थमाह—

संपूर्णः परमात्मास्मिन्देहे विद्याधिकारिणि।
बुद्धिसाक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥

इति। परिपूर्णः स्वभावतो देशकालवस्तुभिरपरिच्छिन्नः परमात्मा अस्मिन् मायाकल्पिते जगति विद्याधिकारिणि शमादिसंभवेन विद्यासंपादनयोग्येऽस्मिन् श्रवणाद्यनुष्ठानवति देहे मनुष्यशरीरे बुद्धेः बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितया अविकारित्वेनावभासकतया स्थित्वा अवस्थाय स्फुरन् प्रकाशमानः अहमितीर्यते लक्षणया अहंपदेनोच्यत इत्यर्थः। ब्रह्मशब्दार्थमाह—

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्॥

इति। स्वतः पूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः

पूर्वोक्तः परमात्मातास्मिन्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोक्तः इत्यर्थः । तद्वाक्यगतेनासिपदेन सामानाधिकरण्यलभ्यं । जीवब्रह्मणोरैक्यं परामृश्यत इत्याह । आत्मैक्यपरामर्श इति । फलितमाह— तेन ब्रह्म भवाम्यहमिति ॥

इदानीं छान्दोग्यश्रुतिगतस्य "तत्त्वमसि" इति वाक्यस्यार्थप्रकाशनाय तत्पदलक्ष्यार्थमाह ।

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते ॥

'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं' इति वाक्येन सृष्टेः पुरा पूर्वं स्वगतभेदादिशून्यं नामरूपविरहितं यद्वस्तु प्रतिपादितं तद्वस्तुनोऽधुनापि सृष्ट्युत्तरकालेऽपि तादृक्त्वं विचारदृष्ट्या तथात्वं स्वगतभेदादिशून्यत्वं तदिति पदेनेर्यते लक्ष्यत इत्यर्थः । त्वंपदलक्ष्यार्थमाह—

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥

श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तेः देहेन्द्रियोपलक्षितस्थूलादिशरीरत्रयातीतं तत्साक्षितया तद्विलक्षणं वस्तु सद्वस्त्वेव त्वंपदेरितं वाक्यगतेन त्वमितिपदेन लक्षितमित्यर्थः। एतद्वाक्यगतेनासीति पदेन तत्त्वंपदयोः सामा·

नाधिकरण्यं लब्धम् । पदार्थद्वयैक्यं शिष्यं प्रत्याख्यायत इत्याह । एकता ग्राह्यतेऽसीति । सिद्धमर्थमाह, तदैक्यमनुभूयतामिति । द्वयोस्तत्त्वंपदार्थयोः ऐक्यं प्रमाणसिद्धमेकत्वमनुभूयतां मुमुक्षुभिरित्यर्थः ॥

क्रमप्राप्तस्याथर्वणवेदगतस्य "अयमात्मा ब्रह्म" इति वाक्यस्यार्थं व्याचिकीर्षुः आदावयमात्मेति पदद्वयेन विवक्षितं अर्थं क्रमेण दर्शयति ।

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।

अयमित्युक्तितः अयमिति शब्देन कथनात् स्वप्रकाशापरोक्षत्वं स्वयंप्रकाशत्वेनापरोक्षत्वं मतमभिमतम् । अहष्टादिवन्नित्यपरोक्षत्वं घटपटादिवद्दृश्यत्वं च व्यावर्तयितुं विशेषणद्वयमिति बोद्धव्यम् । देहादिष्वात्मशब्दप्रयोगदर्शनादात्मशब्देन किं विवक्षितमित्याकांक्षायामाह—

अहंकारादिदेहान्तात्प्रत्यगात्मेति गीयते ॥

इति । अहङ्कारः आदिर्यस्य अहंकारप्राणमनइन्द्रियदेहसंघातस्य सः अहंकारादिः तथा देहः अन्तः यस्योक्तस्य संघातस्य स देहान्तः अहंकारादिश्चासौ देहान्तश्चेति तथा तस्मात् । प्रत्यक्प्रत्यगात्माधिष्ठानतया साक्षितया च आत्मा अन्तरात्मेति गीयते । अस्मिन् वाक्य इत्यर्थः । ब्राह्मणादिष्वपि ब्रह्मशब्दस्य प्रयोगदर्शनात् ।

तद्भावर्तनाय तद्विवक्षितमर्थमाह—

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥

इति । दृश्यमानस्य दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेर्जगतः प्रपञ्चस्य तत्त्वमाधिष्ठानतया तद्बाधावधित्वेन च पारमार्थिकं सच्चिदानन्दलक्षणं यद्रूपमास्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः । वाक्यार्थमाह । तद्ब्रह्म स्वप्रकाशात्मरूपकमिति । तदुक्तलक्षणं ब्रह्म स्वप्रकाशः आत्मस्वरूपं यस्य स्वप्रकाशात्मकमेवेत्यर्थः ॥

Colophon:

इति श्रीरामकृष्णाख्यविरचितात्मानात्ममहावाक्यविवेकदीपिका समाप्ता ॥

Remarks:—This is a portion of Rāmakṛṣṇa's commentary on Pañcadaśī for the portion called Mahāvākyārthaviveka.

॥ महावाक्यविवेकव्याख्या—दीपिका ॥

7723. MAHĀVĀKYAVIVEKAVYĀKHYĀ—DĪPIKĀ.

Burnell's Catalogue No. 9829 a. Page 94. Left column. Substance—Palm leaf. Size—11½ × 1½ inches. Leaves—8. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—60. Author—Rāmakṛṣṇa. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7722

Remarks :—The Ms. is in a fairly good condition.

॥ सुज्ञानविंशतिः

7724. SUJNĀNAVIMS'ATIḤ.

Burnell's Catalogue No. 6337 b.

Substance—Paper. Size—9¾ × 4 inches. Sheets—2 (40-42). Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—Mukunda. Complete. Not Printed.

Beginning:

श्रीगणेशाय नमः ॥

आदौ सज्जनसंगाद्गुरुगणपतिर्ध्यायते ॥ श्रीगुरवे नमः ।

गगनसदनरूपं पुष्पमेकं प्रकाशं
परिमलनिजवेदात्सारसिद्धान्तमेतत् ।
निगमविदितवृन्दैरावृतैः भक्तवृन्दैः
रसरुचिरसिको यस्सज्जनस्तं नमामि ॥

End:

इति विदितार्थतत्त्वमस्वा
असिपदमानन्द नन्दयतीति पद्मम् (?)।
निखिलनिगमागमार्थसारात्
सारैरुवाच विंशतिश्लोकैः ॥

Colophon:

इति श्रीपूर्णानन्दसरस्वतीपादपद्मप्रणीतश्रीगुरुचिन्तामणिपादारविन्दवन्दित मुकुन्देन कृता सुज्ञानविंशतिस्सम्पूर्णा ॥ अंबार्पणमस्तु ॥

Subject: Sujñānaviṃśati a short Advaita work in 25 verses. The various topics dealt with in the work are:—

1 चारितक्रिया ।

2 तपःक्रिया ।

3 योगः ।

4 दर्शनं ।

5 ज्ञानम् ।

6 उद्भवहेतुः ।

7 प्रार्थना ।

Remarks:—The Ms. is in a fairly good condition, but is full of scriptorial blunders. The other work contained herein is Bhaktāmarastotra. This author is to be distinguished from another Mukundamuni the author of a Vedāntic treatise named Vivekasindhu.

॥ आत्मानात्मपञ्चकोशविवेकः ॥

7725. ĀTMĀNĀTMAPAÑCAKOŚAVIVEKAḤ.

Burnell's Catalogue No. 6418 c.

Substance—Paper. Size—$7\frac{1}{3} \times 3\frac{1}{2}$ inches. Sheets—4 (9-12). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—? Incomplete. Not Printed.

Beginning:

अथ मुमुक्षोरात्मना(त्म)पञ्चकोशविवेकस्संग्रहेण प्रदर्श्यते ।

अन्नमय प्राणमय मनोमय विज्ञानमय आनन्दमय इत्येते पञ्चकोशाः ॥

End:

तथा च श्रुतिः ।

'प्राणेन रक्षन्नपरं कुलायंबहिष्कुलायादमृतश्चरित्वा' इति । तौ हि पुरुषसुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रे बृहन् पण्डवासाः सोमराजन्निति ॥

Subject: Ātmānātmapañcakośaviveka.

Remarks:—The Ms. is in good condition. For the other works contained herein see remarks under No 7198.

॥ महावाक्यमन्त्रम् ॥

7726. MAHĀVĀKYAMANTRAM.

Burnell's Catalogue. No. 15573.

Substance—Paper. Size—9 × 4 inches. Sheets—4, Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—18. Author—? Complete. Not printed.

Beginning:

अस्य श्रीमहावाक्यमन्त्रस्य सदाशिव ऋषिः । निरंज-

नो देवता । अनुष्टुप् छन्दः ।

End:

पुनर्जन्म न विद्यते ।

Colophon: Nil.

Subject: Mahāvākyamantram.

Remarks;—The Ms. is in a decaying condition. The sheets are broken into pieces.

॥ महावाक्यार्थबोधप्रकारः ॥

7772. MAHĀVĀKYARTHABODHAPRAKĀRAḤ.

Burnell's Catalogue No. 9677 h.

Substance—Palm leaf. Size—9 × 1½ inches. Leaf—1. Lines—8 to a Page. Script—Grantha. No. of Granthas —15. Author—?. Complete. Not printed.

Beginning:

देहेन्द्रियमनोबुद्धिप्राणाहंकृतिलक्षणम् ।

सच्चिदानन्दाद्वयात्मा परब्रह्मैवाहमस्मि ॥

नतं विदाव्ययधीमाजजाना

न्यद्युष्माकं मन्तरं बभूव ।

नीहारेणप्रावृता जण्णचसुम्न उ........श्चरन्ति ॥ (?)

अथ महावाक्यार्थप्रबोधप्रकारं व्याख्यास्यामः ।

तत्त्वमसीति सोम्यमहावाक्यमिति प्रथमं शिष्यं प्रतिज्ञापयेद्गुरुः ।

End:

तत्त्वमसीति सामवेदे । अहं ब्रह्मास्मीति यजुर्वेदे । प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति ऋग्वेदे । अयमात्मा ब्रह्मेत्याथर्वणवेदे ।

ध्यानयोगे[न] समासत्वाद्ब्रह्महत्या व्यपोहति ।
संवत्सरंसदाभ्यासात् सिध्यष्टकमवाप्नुयात् ॥

Subject. Mahāvākyārthabodhaprakāraḥ, deals with the manner of teaching Mahāvākyas to a pupil.

Remarks:—The Ms. is in a fairly good condition. Though the work is named Mahāvākyārthabodhaprakāra, it is identical with No. 7740 which is printed in extenso later on.

॥ महावाक्यार्थबोधप्रकारः ॥

7728. MAHĀVĀKYĀRTHABODHAPRAKĀRAḤ.

Not noticed by Burnell No. 15574.

Substance—Paper Size—$6\frac{1}{2} \times 2\frac{3}{4}$ inches. Sheets—2. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—? Complete Not printed.

Beginning, end, colophon and subject—Same as No. 7727.

Remarks:—The Ms. is in a decaying condition.

॥ ज्ञानबोधः ॥

7729. JÑĀNABODHAḤ.

Burnell's Catalogue No. 6472. Page 93. Left column. Substance—Paper. Size—4¾ × 8 inches. Sheets—4. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—16. Author—Śukayogin. Complete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

भिन्नमेदं जगत्सर्वं त्रैलोक्यं सचराचरम् ।
अभिन्नेनैव विश्वात्मा तस्य भिक्षा विधीयते ॥ १ ॥

क्षमारूपी जितक्रोधः सत्यवादी दृढव्रतः ।
क्षरसर्वपरित्यागी तस्य भिक्षा विधीयते ॥ २ ॥

देहातीतं मनोऽतीतं देहस्थं देहवर्जितम् ।
देहभावस्थितिर्नास्ति तस्य भिक्षा विधीयते ॥ ३ ॥

End:

उत्तमो लयलीनश्च ध्यान धारण(?) मध्यमः ।
अधमो जपहोमं च पूजार्चनो(ऽ)अधमाधमः ॥ १५ ॥

मूर्खस्य प्रतिमा देवो विप्रदेवो हुताशनः ।
यतीनां आत्मदेवोऽसि सर्वदेवो जनार्दनः ॥ १६ ॥

Colophon:

इति श्रीशुकयोगिविरचिते ज्ञानबोधस्तोत्रं संपूर्णमस्तु ।

Subject: Jñānabodha.

Remarks:—The Ms. is in very good condition but is full of scriptorial blunders.

॥ स्वरूपानुभवः ॥

7730. SVARŪPĀNUBHAVAḤ.

P. A. Collection No. 76 b.

Substance—Paper Size—7½ × 4 inches. Sheets—2 (8–9). Lines—8 to a Page Script—Devanāgarī. No. of Granthas—15. Author—Padmapādācārya. Incomplete. Printed.

Beginning:

....शात्मैषां भवेद्धि सः ॥

अन्योऽसावन्योऽहमस्मीत्युपास्ते योऽन्यदेवताम् ।

न स वेद परं ब्रह्म स देवानां यथा पशुः ॥

End:

ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ।

नाहं देहो न मे देहः केवलोऽहं सनातनः ॥

एकमेवाद्वितीयं ब्रह्म । नेह नानास्ति किंचन ॥

Colophon:

इति श्रीपद्मपादाचार्यविरचितं स्वस्वरूपानुभवः

सम्पूर्णः ॥

Remarks:—The Ms. is in a fairly good condition. The other work

contained herein is Tattvārthaprakaraṇam. This work is printed by Srī Vāṇī Vilās Press, Srirangam under the name Brahmānucintana by Śaṅkarācārya in the memorial edition of Śaṅkarā's works. It has also appeared in this catalogue under the name Ātmānucintanam (No. 7160) as a minor work of Śaṅkara. But the colophon appended to this manuscript distinctly ascribes the work to Padmapādācārya one of the pupils of Saṅkarācārya Svarūpānubhava, Ātmānucintana and Brahmānucintana are the several names of the same work though the authorship thereof is still a matter of controversy, as the colophons attribute them to Śaṅkarācārya as well as Padmapādācārya.

॥ प्राणायामप्रकारः ॥

7731. PRĀṆĀYĀMAPRAKĀRAḤ.

Burnell's Catalogue No. 9902 (b).

Substance—Palm leaf. Size—8⅛×1 **inches**. Leaves—3 (25-27). Lines—5 to a Page. Script—Grantha. No. of Granthas—15. Author—? Incomplete. Not printed.

Beginning.

श्रीहरये परमात्मने नमः । श्रीदक्षिणामूर्तये नमः ।

श्रीसर्वेभ्यो ज्येष्ठयतीन्द्रेभ्यो नमः ।

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।

श्रीवेङ्कटनिवासाय श्रीनिवासाय मंगळम् ॥

भवारण्ये प्रविष्टस्य सम्मोहभ्रान्तचेतसः ।

येन मे दर्शितः पन्थाः तस्मै श्री गुरवे नमः ॥

पूरकेऽहंकारगतानिदमंशमस्मद्वास्तवस्वरूपनित्यापरोक्षं साक्षिचैतन्यमेव परं ब्रह्मेत्यखण्डाकारवृत्तिमुत्पाद्य तस्यां वृत्तौ प्रतिफलितेन चैतन्येन कुम्भके मनसा पठितैष्षोडश-प्रणवैरज्ञानशरीरनिवृत्तिः ॥

End.

इदमेवास्मद्वास्तवस्वरूपकं साक्षिनामचैतन्यमिति भाव-ना । पुनः प्रणवचतुष्टयेन इदमेव परं ब्रह्मेति भावना । पुनः प्रणवचतुष्टयेन परं ब्रह्मैवेदमिति भावना । पुनः प्रणवचतुष्ट-येन ब्रह्मज्योतिष्वहमिति समाधिरूपावस्थानम् ॥

Colophon:

एवं प्राणायामप्रकारः ॥

Subject: Prāṇāyāmaprakāra.

Remarks:—The Ms. is in a fairly good condition.

This work is not noticed by Dr. Burnell under this number. Though the work deals with Prāṇāyāma one of the auxiliaries of Yoga it is given here because Vedānta also is coupled along with it.

॥ पञ्चब्रह्मतत्त्वम् ॥

7732. PAÑCABRAHMATATTVAM.

Burnell's Catalogue No. 6480 b. Page 208. Right column.

Substance—Paper. Size—8 × 4¾ inches. Sheets—2 (5-6). Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—? Complete. Not printed.

Beginning.

श्रीगणेशाय नमः ॥

गुरुपादाम्बुजं स्मृत्वा मोक्षार्थं सर्वसिद्धिदम् ।

तारकाभ्यन्तरे पञ्चब्रह्मतत्त्वं तदुच्यते ॥

End:

न तस्य पुनरावृत्तिर्जन्ममृत्युभयं न हि ।

निजमोक्षार्थसंसिद्धं बन्धमोक्षातिगं शुभम् ॥

Colophon:

इति श्रीतारकनामग्रन्थे पञ्चत्रिंशतिपञ्चकशब्दकथनं सम्पूर्णम् ॥

Subject: Pañcabrahmatattvam a treatise grouping all things that are five in number. The Ms. is full of scriptorial blunders.

॥ निर्वाणषट्कम् ॥

7733. NIRVĀṆAṢAṬKAM.

Burnell's Catalogue No 9677 c. Page 83. Right column. Substance—Palm leaf. Size—9 × 1½ inches. Leaves—1. Lines—5 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—? Complete. Printed.

Beginning:

यदा तत्त्वमस्यादिवाक्योपदेशैः

सदा सच्चिदानन्दभावो विभाति ।

स आचार्यवर्यस्स देवास्समस्ताः
गिरस्तस्य वेदाः पदाद्देवगंगा ॥

End:

किमद्वैतवादैश्च किं द्वैतवादैः
तथाद्वैतकाद्वैतवादैः फलं किम् ।
वृथा वार्चयालं चिदानन्दलब्धः
सदाचार्यकारुण्यमेवाग्रगण्यम् ॥

Colophon: Nil.

Subject: Nirvāṇaṣaṭka, a short poem dealing with Advaita Vedānta.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 1139 (Vol. II.)

Though this work is given a different name it is only composed of eight verses culled out from a work culled Sacchidānandabhujaṅgam noted under No. 7698.

V. MINOR VEDĀNTA WORKS PRINTED IN EXTENSO.

Descriptive No.	Collection No.	Title of the work.	Author.	Substance.	Size inches.	No. of Sheets or leaves.	Script.
7734	B. L. 9856 a	Navamaṇimālā	Sadāśivabrahman	Palm leaf	$11\frac{1}{2} \times 1\frac{1}{2}$	1	Grantha.
7735	„ 9857 a	„	„	„	$18\frac{1}{2} \times 1\frac{1}{4}$	1	„
7733	P. A. 109 b	Vedāntasāravārttikarāja-saṅgrahaḥ	Sureśvara	Paper.	$10 \times 4\frac{1}{2}$	3	Devanāgarī.
7737	B. L. 9868 b	Pañcīkaraṇam	?	Palm leaf.	$9\frac{1}{2} \times 1\frac{1}{2}$	2	Telugu.
7738	„ 6418 b	„	?	Paper.	$7\frac{1}{4} \times 8\frac{1}{2}$	6	Devanāgarī.
7739	J. L. 938	Mahāvākyavivaraṇam	?	„	$5\frac{1}{4} \times 4$	4	„
7740	Ms. 15575	„	?	„	$6 \times 4\frac{1}{2}$	2	„
7741	J. L. 989	„	?	„	$5\frac{1}{4} \times 4\frac{1}{2}$	9	„
7742	Ms. 18677	Svātmānandastotram	Vimalabrahma-varya	„	$6 \times 3\frac{3}{8}$	6	„
7743	„ 18814	„	„	„	$6\frac{1}{2} \times 8\frac{3}{4}$	4	„
7744	B. L. 8820	„	„	„	$7\frac{1}{4} \times 8\frac{1}{2}$	3	„
7745	J. L. 956	Upadeśaśikhāmaṇiḥ	Tyāgarāja	„	$5\frac{3}{4} \times 8\frac{1}{4}$	4	Devanāgarī.

7746	B. L.	9856 f	Ātmānusandhānam	Sadāśivabrahman	Palm leaf.	$11\frac{1}{8} \times 1\frac{1}{2}$	4	Grantha.
7747	„	9857 f	„	„	„	$18\frac{1}{2} \times 1\frac{1}{4}$	2	„
7748	„	6488 b	Sammiśrapañcīkaraṇam	?	„	$9 \times 4\frac{1}{8}$	3	„
7749	„	6490 b	„	?	„	$8\frac{1}{2} \times 4\frac{1}{8}$	2	„
7750	„	9829 f	Nṛsiṃhadhyānam	?	Palm leaf	$9\frac{1}{8} \times 1\frac{1}{8}$	5	„
7751	„	6550	Anubhavapañcaviṃśatiḥ	?	Paper	$5\frac{1}{4} \times 4$	3	Devanāgarī.
7752	„	6562	„	„	„	$8 \times 4\frac{7}{8}$	2	„
7753	„	6355	Jīvanmuktalakṣaṇam	Dattātreya	„	$8\frac{1}{8} \times 4\frac{1}{4}$	2	„
7754	„	9856 c	Svapnoditam	Sadāśivabrahman	Palm leaf	$11\frac{1}{2} \times 1\frac{1}{2}$	2	Grantha.
7755	„	9857 c	„	„	„	$18\frac{1}{2} \times 1\frac{1}{4}$	1	„
7756	„	6196 c	Pañcīkṛtam	?	Paper	$10\frac{1}{4} \times 4$	1	Devanāgarī.
7757	„	„ d	„ „ ṭīkā	?	„	„	2	„
7758	„	9882 c	Praṇavārthaprakāśikā	Kaivalyānanda-tīrtha	Palm leaf	$10\frac{1}{4} \times 1\frac{1}{4}$	2	Grantha.
7759	„	9668 a	Sādhanacatuṣṭayasampattiḥ	?	„	$9\frac{1}{2} \times 1\frac{1}{2}$	1	Telugu.
7760	„	9748 d	Saptaślokī	?	Palm leaf	$15\frac{1}{2} \times 1\frac{1}{4}$	1	Grantha.
7761	„	9834 d	Bhikṣvaṣṭakam	Saccidānandayatiḥ	„	$15 \times 1\frac{1}{8}$	1	Telugu.
7762	„	6481	Ātmatattvam	?	Paper	6×4	2	Devanāgarī.

Descriptive No.	Collection No.	Title of the work.	Author.	Substance.	Size inches.	No. of Sheets or leaves.	Script.
7763	B. L. 6356	Manolayaprakaraṇam	?	Paper	$8 \times 4\frac{1}{8}$	1	Devanāgarī.
7764	T. S. 134	„	?	„	$8 \times 3\frac{1}{2}$	1	„
7765	S. S. 48 b	Brahmanirāmayāṣṭakam	?	„	$12\frac{1}{4} \times 5\frac{1}{8}$	1	„
7766	B. L. 9668 d	Urmiṣatkam	?	Palm leaf	$9\frac{1}{2} \times 1\frac{1}{8}$	1	Telugu.
7767	P. A. 88	Anubhavasopānam	?	Paper	8×4	1	Devanāgarī.
7768	„ 78 c	Pādukāpañcakam	?	„	$7\frac{3}{8} \times 4$	1	„
7769	S. K. 138 b	Vairāgyapañcakam	Vasudevendraśiṣya	„	$8 \times 4\frac{1}{2}$	1	„
7770	B. L. 9858 a	Svānubhūtiprakāśika	Sadāsivabrahman	Palm leaf	$11\frac{1}{2} \times 1\frac{1}{4}$	2	Grantha.
7771	„ 9856 b	„	„	„	„	1	„
7772	„ 9857 b	„	„	„	$18\frac{1}{4} \times 1\frac{1}{4}$	1	„

V. MINOR VEDĀNTA WORKS

Printed in extenso.

(Nos. 7734 to 7772 already described in the tabular statement are here printed in full for the first time.)

॥ नवमणिमाला ॥

7734—7735. NAVAMAṆIMĀLĀ.

विषयेषु निर्व्यपेक्षं
विमलतरज्ञानसंपदध्यक्षम् ।
परमकरुणार्द्रवीक्षं
परमशिवाचार्यपादमद्राक्षम् ॥ १ ॥

निर्जितवादिमृगेन्द्रं
भर्जितमदमानकामवैरीन्द्रम् ।
श्रितचयकुवलयचन्द्रं
परमशिवेन्द्रं भजामि निस्तन्द्रम् ॥ २ ॥

वेलातीतभवार्णव-
मग्नजनोद्धरणचातुरीधुर्यम् ।
प्रणतहृदम्बुजसूर्यं
परमशिवार्यं प्रणौमि गुरुवर्यम् ॥ ३ ॥

यत्करुणाक्षीरनिधे-
र्निर्मलविद्यामयो मणिर्लब्धः ।
तं देशिकवरमन्तः
परमशिवाचार्यपादमवलम्बे ॥ ४ ॥

यस्योपर्याश्रय
प्रत्यग्वाङ्मौखरीभरं स हरः ।

मौनमचारमतुचितं
परमशिवेन्द्रं तमानतोऽस्मि गुरुम् ॥ ५ ॥

व्याकुर्वति सति यस्मि-
न्नीशानः स्वाधिकारशैथिल्यात्
प्रापद्वटतरुमूल
परमशिवेन्द्रं तमाभजे सततम् ॥ ६ ॥

प्रवितनतजनमोह-
प्रशमनपद्वाक्प्रबोधितास्मानम् ।
वरकरुणाभरजलधिं
परमशिवेन्द्रं धियां निधिं वन्दे ॥ ७ ॥

शमितान्तरसंतमसं
विरचितविज्ञानकैरवोल्लासम् ।
कलये परमशिवेन्द्रं
कमपि सुखाकाशपरिलसच्चन्द्रम् ॥ ८ ॥

यमिणिष्क्रियं निरंशं
सूक्ष्ममलक्ष्यं च शुद्धपरतत्त्वम् ।
तत्त्वमसीति वदन्तं
परमशिवेन्द्रं भजेऽहमश्रान्तम् ॥ ९ ॥

नवमणिमालामेतां
गुरुवरचरणारविन्दनुतिरूपाम् ।
धारयति यस्तु कण्ठे
स जयति कैवल्यसाम्राज्ये ॥ १० ॥

दाक्षायणीपतिदयार्द्रनिरीक्षणेन
साक्षादवैति परतत्त्वमिहैव धीरः ।
न ज्ञानदानजपहोमसुरार्चनादि-
धर्मैरशेषनिगमान्तनिरूपणैर्वा ॥

हरिः ॐ ॥ गुरवे नमः ॥

॥ वेदान्तसारवार्त्तिकराजसंग्रहः ॥

7736. VEDĀNTASĀRAVĀRTTIKARĀJA-SAṄGRAHAḤ.

नन्वसौ सर्वभावाप्तिर्न विद्यामात्रतो भवेत् ।
विनोत्तमत्वानुष्ठानकालदेवाद्यनुग्रहान् ॥ १ ॥

विप्रस्य फलदो वेदो न शूद्रस्याधमत्वतः ।
देवादेरुत्तमस्यैव तथा विद्या फलप्रदा ॥ २ ॥

यागज्ञानमनुष्ठानाद्विना न स्वर्गदं तथा ।
ब्रह्मज्ञानमनुष्ठानाद्विना सर्वाप्तिदं कथम् ॥ ३ ॥

गर्भाधानमृतावेव नान्यकाले यथोत्तमे ।
विद्या कृतयुगे सर्वभावं यच्छति नान्यथा ॥ ४ ॥

राज्ञा कृषिफलं यद्वत्करार्थं प्रतिपद्यते ।
सर्वभावस्तथा देवैर्भागभुग्भिर्निवार्यते ॥ ५ ॥

तस्मादनुत्तमे जन्मन्यनुष्ठानमृते कलौ ।
युगे देवाद्यृणवतो न विद्या सर्वभावदा ॥ ६ ॥

इति चोदयितुर्येऽत्र चत्वारश्चोद्यहेतवः ।
तद्यो य इत्यादिवाक्यैश्चतुर्भिस्ताभिरस्यति ॥ ७ ॥

न तावदुत्तमं जन्म सर्वभावप्रयोजकम् ।
उत्तमस्यापि देवादेः सर्वत्राब्रह्मबोधतः ॥ ८ ॥

यो देवानामृषीणां वा मध्ये ब्रह्म व्यबुध्यत ।
असावसावेव सर्वमभून्नान्यस्तु कश्चन ॥ ९ ॥

मनुष्याणां तथा मध्ये ब्रह्मवित्सर्वभावता ।
विद्याविद्ये एव तस्मात्सर्वतान्यत्वकारणे ॥ १० ॥

ब्रह्म वा इदमग्रेऽभूदिति विद्याधिकारिता ।
श्रूयते ब्रह्मणो ब्रह्म सर्वजातिषु तत्समम् ॥ ११ ॥

न पश्वादेः सर्वभावप्रसङ्गो बोधवर्जनात् ।
शूद्रजातिस्तु विदुरः सर्वभावात्स मुच्यते ॥ १२ ॥

यागविद्येवात्मविद्या नानुष्ठानमपेक्षते ।
फलदान इति ज्ञेया वामदेवादिदर्शनात् ॥ १३ ॥

ब्रह्मात्मत्वं वामदेवः कथन्मन्वादिरूपताम् ।
प्रतिपेदे ह्यनुष्ठानावसरस्तस्य को वद ॥ १४ ॥

प्रयोजनं च विद्याया अनुष्ठानेऽत्र किं भवेत् ।
किमन्तरायापगमः किं वा जन्मनिरोधनम् ॥ १५ ॥

पुमर्थावाप्तिः किं वा यद्वा बाध्यार्थबाधना ।
अन्यद्वा किंचिदत्र स्यात्प्रक्रमे तदसंभवि ॥ १६ ॥

ब्रह्मप्राप्त्यन्तरायस्य प्रत्यक्संमोहरूपिणः ।
प्रत्यग्विज्ञानतो ध्वस्तौ कोऽन्तरायोऽन्य उच्यताम् ॥ १७ ॥

सकृदात्मप्रसत्यैव निरुपाख्यखिलं भवेत् ।
विद्यामोहनिरासेन रोद्धव्यं जन्म किं ततः ॥ १८ ॥

अविद्याध्वंसमात्रेण पुमर्थश्च समाप्यते ।
आनन्दस्य स्वरूपत्वादर्थनीयान्तरं न हि ॥ १९ ॥

नाबाधित्वेह बाध्यार्थबाधको बाधकात्मताम् ।
लभते तत्स्वलब्ध्यैव विद्या बाध्यं प्रबाधते ॥ २० ॥

सम्यग्ज्ञानपरिप्लुष्टमोहतत्कार्यरूपिणः ।
अपेक्ष्यं शिष्यते नान्यदतः स्यादननुष्ठितिः ॥ २१ ॥

अनात्मबुद्धिसत्यत्वनिवारणमपेक्ष्यते ।
अनुष्ठितिश्चेन्मैवं तत्सत्यत्वस्याप्रसक्तितः ॥ २२ ॥

ध्वान्तादिघस्मरे प्रत्यगद्वैतात्मावबोधने ।
प्रत्यर्थिनि स्थितेऽनात्मधियां स्यात्सत्यता कुतः ॥ २३ ॥

तस्मात्पश्यन्वामदेवः प्रतिपेद इतीरणात् ।
विद्याकालेऽपि सर्वाप्तिराविलम्बादितीक्ष्यताम् ॥ २४ ॥

वामदेवस्य मन्वादिरूपाप्तिर्न विरुध्यते ।
उपाधिमात्रभेदेन वस्तुतत्त्वैक्यसंभवात् ॥ २५ ॥

वामदेवो मनुः सूर्य इति शब्दैरुपाधयः ।
मूढव्यवहृतौ भान्ति विद्वद्व्यवहृतौ तु चित् ॥ २६ ॥

न चित्तो वामदेवे वा मनौ वान्येषु वा भिदा ।
तेन मन्वादिचिद्वामदेवेन प्रत्यपद्यत ॥ २७ ॥

ये तु पुण्ययुगे सर्वभावो न तु कलाविति ।
तदसद्बोधसाध्यस्य पुण्यकालानपेक्षणात् ॥ २८ ॥

न सूर्यग्रहणापेक्षा बोधाग्निद्राक्षये क्वचित् ।
तथा न सर्वभावोऽयं कालभेदमपेक्षते ॥ २९ ॥

य एतर्ह्यपि वेदाहं ब्रह्मास्मीति तदैव सः ।
इदं सर्वं भवत्येव यदिदं जगदीक्षते ॥ ३० ॥

अविचारितरम्यस्य नामरूपात्मकस्य यत् ।
जगतो वास्तवं रूपं सततं ब्रह्म तद्भवेत् ॥ ३१ ॥

तादृग्ब्रह्माहमस्मीति साक्षात्कृतवतः कथम् ।
सर्वभावे विवादः स्यात्सर्वाख्यं ब्रह्म नेतरत् ॥ ३२ ॥

नाम रूपं तु नो सर्वं तयोर्मायामयत्वतः ।
ब्रह्मैव वास्तवं सर्वं ज्ञानेनैव तदाप्यते ॥ ३३ ॥

ब्रह्मैव निखिलो जन्तुर्बोधात्प्रागपि वस्तुतः ।
अब्रह्मत्वमबोधात्स्याद्बोधात्तु ब्रह्मता ततः ॥ ३४ ॥

ब्रह्मबोधात्सर्वभावो भवेत्कृतयुगे न किम् ।
न निवारयितुं शक्यः सर्वभावः कलावपि ॥ ३५ ॥

नराणामधमर्णत्वात्सर्वभावं दिवौकसः ।
वारयन्ति हविर्भोक्तुं तैर्दत्तमिति चेन्न तत् ॥ ३६ ॥

तस्य ज्ञातात्मतत्त्वस्य प्रध्वस्ततमसो यतेः ।
इन्द्रादयोऽपि नैवालं सर्वभावान्निवारणे ॥ ३७ ॥

यद्यपीशा नृणां देवास्तथापि ब्रह्मवेदिनः ।
अनीशाः प्रत्युतैतेषामात्मा भवति तत्त्ववित् ॥ ३८ ॥

ईशेशितव्यसंबन्धः प्रत्यगज्ञानहेतुजः ।
ज्ञानेऽज्ञानतमोध्वस्तावीश्वराणामपीश्वरः ॥ ३९ ॥

अधमर्णो भवेदज्ञो देवादेर्न तु तत्त्ववित् ।
देवाद्यैश्वर्यविषयव्यतिक्रान्तत्वहेतुतः ॥ ४० ॥

सर्वज्ञस्य न विस्रम्भः कर्मानुष्ठान आपतेत् ।
देवैर्विप्राद्युत्तमर्णैः फलवारणसंभवात् ॥ ४१ ॥

नैवं देवेशकालादीनपेक्ष्यैव कृतत्वतः ।
कर्मणः फलदानायानुकूला ईश्वरादयः ॥ ४२ ॥

प्रतिबध्नन्ति यत्रैते फलं तत्रास्य कर्मणः ।
प्रबलस्य फलं दातुमेवैतदपि जानते ॥ ४३ ॥

अतः कर्मप्रधानत्वं श्रुतिस्मृतिषु संमतम् ।
तच्च्छास्त्रेषु कालादेरपि प्राधान्यमीरितम् ॥ ४४ ॥

कर्मकालेश्वरादीनां फलदानविवक्षया ।
प्राधान्यं वस्तु तत्सर्वं सर्वत्रापि ह्यपेक्षते ॥ ४५ ॥

सत्यं स्वृणित्वे देवाद्या नाज्ञानां कर्मणः फलम् ।
प्रतिबध्नन्ति वक्तव्यमनृणज्ञानिनां किमु ॥ ४६ ॥

न चेद्दाविदुषोऽपि स्यादृणित्वं देहसंभवात् ।
न किंचिन्ननु तैः प्राप्तमृणित्वं येन नो भवेत् ॥ ४७ ॥

शास्त्रादृणित्वमिति चेन्न शास्त्रस्यार्थवादतः ।
अवदानविधेरर्थवादो ह्यण्वपि च श्रुतौ ॥ ४८ ॥

पूर्वमप्यनृणः पश्चाद्देवानामन्तरात्मताम् ।
गतो बोधादस्य देवाः कथं स्युः प्रतिबन्धकाः ॥ ४९ ॥

इत्थं ये सर्वभावस्य वारकाश्चोद्यहेतवः ।
उन्मूलितास्ते निर्विघ्नः सर्वभावो भवेत्ततः ॥ ५० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पाद-
शिष्यसुरेश्वराचार्यविरचितो वेदान्तसारवार्त्तिकराजसंग्रहः
समाप्तः ।

॥ पञ्चीकरणम् ॥

7737 & 38. PANCĪKARAṆAM.

अथात्मजिज्ञासोस्त्वंपदार्थविवेकाय चतुर्विंशतितत्त्वाना-मुत्पत्तिक्रमः प्रदर्श्यते । ब्रह्माश्रयं त्रिगुणात्मकमज्ञानम् । तस्मात्त्रिगुणात्मकान्याकाशादीनि सूक्ष्मभूतान्युत्पद्यन्ते । ते-भ्यः श्रोत्रादीन्येकोनविंशतितत्त्वान्युत्पन्नानि । पञ्चीकृत-स्थूलभूतेभ्यः शब्दादिविषया उत्पन्नाः । कथम् । आकाश-सात्त्विकांशाच्छ्रोत्रेन्द्रियमुत्पन्नम् । वायोः सात्त्विकांशात्त्व-गिन्द्रियमुत्पन्नम् । अग्नेः सात्त्विकांशाच्चक्षुरिन्द्रियमुत्पन्नम् । अपांसात्त्विकांशाज्जिह्वेन्द्रियमुत्पन्नम् । पृथिव्याः सात्त्वि-कांशाद्घ्राणेन्द्रियमुत्पन्नम् । एतानि ज्ञानेन्द्रियाणि । तथा च श्रुतिः । 'श्रोत्रमाकाशे वायौ त्वक् अग्नौ चक्षुः अप्सु जिह्वा पृथिव्यां घ्राणम्' इति । आकाशादीनां सर्वेभ्यः सात्त्वि-कांशेभ्योऽन्तःकरणमुत्पन्नम् । तच्चतुर्विधं मनोबुद्ध्य-हंकारचित्तभेदेन । आकाशरजोभागाद्वागिन्द्रियमुत्पन्नम् । वायुरजोभागात्पाणीन्द्रियमुत्पन्नम् । अग्निरजोभागा-त्पादेन्द्रियमुत्पन्नम् । अपां रजोभागाद्गुह्येन्द्रियमुत्पन्नम् । पृथिवीरजोभागात्पाय्विन्द्रियमुत्पन्नम् । एतानि कर्मे-

न्द्रियाणि । आकाशादीनां सर्वेभ्यो रजोंशेभ्यः प्राण उत्पन्नः । स तु हृदयादिस्थानभेदेन पञ्चविधः । तथा चोक्तम् ।

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥'

इति । श्रुतिरपि 'प्राणोऽपानो व्यान उदानः समान इत्येतत्त सर्वं प्राण एव' इति । आकाशादीनां तमोभागान् प्रत्येकं द्विधा विभज्य पुनरेकैकमर्धं चतुर्धा कृत्वा तान् भागानितरार्धेषु स्वांशं विहाय क्रमेण योजयेत् । योजितेषु भागेषु आकाशादीनि पञ्चीकृतस्थूलभूतान्युत्पद्यन्ते । उत्पन्नेषु भूतेषु शब्दस्पर्शरूपरसगन्धाः पञ्च विषया उत्पन्ना आकाशादिषु यथाक्रममेकद्वित्रिचतुष्पञ्चधा विभज्यन्ते । पञ्चीकृतभूतेभ्यः स्थूलशरीरमुत्पन्नम् । 'अथातः पृथिव्यादिमहाभूतानां समवायः शरीरम्' इति श्रुतेः । तत्र ये कठिनांशा अस्थिमांसरोमादयः सा पृथिवी । ये द्रवांशाः रक्तमूत्रादयस्ता आपः । ये उष्णांशाः क्षुत्तृण्निद्रादयः सोऽग्निः । ये गमनागमनादयः स वायुः । ये च्छिद्रकामक्रोधादयः स आकाशः । तथा च श्रुतिः 'यत्कठिनं सा पृथिवी, यद्द्रवं तदापः, यदुष्णं तत्तेजः, यच्चरति स वायुः, यत्सुषिरं तदाकाशमित्युच्यते' इति । तथा चोक्तम् ।

'अस्थि चर्म तथा स्नायू रोम मांसं तथैव च ।
पृथ्व्याः पञ्च विधास्तज्ज्ञैः समासेन प्रकीर्तिताः ॥
रक्तं मूत्रं तथा श्लेष्मा शुक्रं मेदस्तु पञ्चमम् ।
अपां पञ्च विधास्तज्ज्ञैः समासेन प्रकीर्तिताः ॥
क्षुत्तृष्णा च तथा निद्रा आलस्यं रतिरेव च ।
वह्नेः पञ्च विधास्तज्ज्ञैः समासेन प्रकीर्तिताः ॥
प्रचारोत्तरणारोहास्तथा चोत्थानरोधने ।
वायोः पञ्च विधास्तज्ज्ञैः समासेन प्रकीर्तिताः ॥
कामः क्रोधश्च लोभश्च मोहश्चैव भयं तथा ।
व्योम्नः पञ्च विधास्तज्ज्ञैः समासेन प्रकीर्तिताः ॥

श्रोत्रादिज्ञानेन्द्रियाणां विषयाः शब्दस्पर्शरूपरसगन्धाः । वागादिकर्मेन्द्रियाणां विषया वचनादानगमनविसर्गानन्दाः । अन्तःकरणचतुष्टयस्य विषयाः संकल्पाध्यवसायाभिमानावधारणरूपाः । श्रोत्रादिचतुर्दशकरणानामधिपतयो दिगादयः । तथा चोक्तम्—

'दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः ।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः' ॥

इति । श्रोत्रादिचतुर्दशकरणान्यध्यात्मसंज्ञिकानि । तेषां विषयाः शब्दादयोऽधिभूतसंज्ञिकाः । ये करणाधिपतयो दिगादयस्ते अधिदैवसंज्ञिकाः । तथा च श्रुतिः—

'श्रोत्रमध्यात्मम् । श्रोतव्यमधिभूतम् । दिक् तत्राधिदैवतम् । त्वगध्यात्मम् । स्प्रष्टव्यमधिभूतम् । वायुस्तत्राधिदैवतम् । चक्षुरध्यात्मम् । द्रष्टव्यमधिभूतम् । सूर्यस्तत्राधिदैवतम् । वागध्यात्मम् । वक्तव्यमधिभूतम् । अग्निस्तत्राधिदैवतम् । पादोऽध्यात्मम् । गन्तव्यमधिभूतम् । विष्णुस्तत्राधिदैवतम् । पायुरध्यात्मम् । विसर्जयितव्यमधिभूतम् । मित्रस्तत्राधिदैवतम् । उपस्थोऽध्यात्मम् । आनन्दयितव्यमधिभूतम् । प्रजापतिस्तत्राधिदैवतम् । अन्तःकरणमध्यात्मम् । निर्विकल्पस्फुरणमधिभूतम् । नारायणस्तत्राधिदैवतम् । मनोऽध्यात्मम् । मन्तव्यमधिभूतम् । चन्द्रस्तत्राधिदैवतम् । बुद्धिरध्यात्मम् । बोद्धव्यमधिभूतम् । बृहस्पतिस्तत्राधिदैवतम् । चित्तमध्यात्मम् । चेतयितव्यमधिभूतम् । क्षेत्रज्ञस्तत्राधिदैवतम् । अहंकारोऽध्यात्मम् । अहंकर्तव्यमधिभूतम् । रुद्रस्तत्राधिदैवतम् । सत्त्वमध्यात्मम् । ज्ञातव्यमधिभूतम् । विष्णुस्तत्राधिदैवतम् । रजोऽध्यात्मम् । ममकर्तव्यमधिभूतम् । ब्रह्मा तत्राधिदैवतम् । तमोऽध्यात्मम् । विकारयितव्यमधिभूतम् । ईश्वरस्तत्राधिदैवतम् । इत्येवमध्यात्ममधिभूतमधिदैवतं च तत्सर्वमुक्तम् । एवमवशिष्टेषु करणेषु द्रष्टव्यम् । एवं चतुर्विंशतितत्त्वानि । तेभ्यः परं कूटस्थमात्मतत्त्वं विविच्य यो जानाति सोऽमृतत्वाय कल्पते । 'तरति शोकमात्मवित्' इति श्रुतेः ।

तथा चोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे भवेत् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥

इति श्रीभगवद्वचनाच्च ॥

इति श्रीपञ्चीकरणं समाप्तम् ॥

॥ महावाक्यविवरणम् ॥

7739. MAHĀVĀKYAVIVARAṆAM.

नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति परं ब्रह्म स्वानुग्रहार्थमिमं मानुषं वेषं धारयित्वा तिष्ठतीत्यत इत्थंभूताय स्वगुरवे स्वशरीरपर्यन्तं सर्वस्वं निवेद्य मुहुर्मुहुः प्रणम्य विज्ञापनं कुर्यात् । 'भो भगवन्, कीदृशं स्वरूपमिति न जाने, ममार्थे पुरुषार्थ इति च न जाने तत्स्वयमेव सर्वं विदित्वा मम यद्धितं मन्यसे तदेव मह्यमनुगृहाण । अहं तु नानादुःखमयसंसारजलधिमध्येऽनन्यशरणः परिभ्रमामि । मद्भाग्यवशात् सर्वज्ञः परमकारुणिको भवान् ध्रुव इवोपलब्धोऽसि । अतो मां भवाब्धेस्तारय रक्ष रक्ष' इति वदन्नुपासीत । एवं शिष्येणोपासितो गुरुः यदा महत्प्रधानभूतब्रह्मविद्यायास्तु समस्तदुःखमयमूलभूतप्रातिकूलाविद्यानिवर्तकत्वेन नित्यनिरतिशयानन्दस्वरूपप्रापकत्वेन समस्तानुकूलता च सुप्रसिद्धा । एवंभूतब्रह्मविद्योपदेशप्रकारः प्रस्तूयते । तत्र श्रोत्रियो ब्रह्मनिष्ठस्तत्त्वप्रतिपादनसमर्थः समस्तमन्त्रप्रयोगकुशलः शमशील आश्रमी परमकारुणिकः सर्वलक्षण

संपन्नो महापुरुषः सर्वविद्योपदेष्टा भवति । शिष्यस्तु श्रुताध्ययनसंपन्नः सदाचारो नित्यानित्यवस्तुविवेकी सर्वलक्षणयुक्तो गुरुभक्तो निखिलपुरुषार्थाकाङ्क्षी मन्त्रदेवतोपासनरत उपदेश्यो भवति । तत्र शिष्यः स्वगुरुमित्थं भावयेत् । अतीव कृपालु वर्तते तदैवोपदिशेत् । तत्र शिष्यं स्ववामपार्श्वे समुपवेश्य तच्छिरस्यमृतमयं दक्षिणकरं निधाय कृपादृष्ट्या विलोकयन् शिष्यस्वरूपं स्वस्वरूपभूतसत्यज्ञानानन्तानन्दलक्षणब्रह्मणा सहाभेदमनुसंधाय इत्थमुपादिशेत् । "तत्त्वमसि । अहं ब्रह्मास्मि । अयमात्मा प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म । सत्यं ज्ञानमनन्तं ब्रह्म । एष त आत्मान्तर्याम्यमृतः । तथोऽहं सोऽसौ, योऽसौ सोऽहम् । स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः" । इत्यादि महावाक्यप्रतिपाद्यं नित्यशुद्धबुद्धमुक्तस्वभावं सत्यज्ञानानन्तानन्दस्वरूपं परिपूर्णं परब्रह्मैवासि न संसारी त्वं न कर्ता नापि भोक्ता कर्तृत्वादिहेतुभूतदेहेन्द्रियमनोबुद्धिप्राणाहंकारादिपुत्रमित्रकलत्रादिभूतभौतिकभुवनादिसर्वप्रपञ्चः सर्वपरमार्थानुस्यूतसच्चित्सुखैकब्रह्मस्वरूपे त्वय्येव रज्जुसर्पवत्कल्पितः । त्वमेव समस्तपुरुषार्थब्रह्मानन्दस्वरूप इत्येवमुपदिष्टलक्षणं सच्चिदानन्दाद्वयं ब्रह्माहमस्मीति निःसन्दिग्धं भावयेत् । अनन्तरं तु गुरूक्तं निराकारब्रह्मविद्यारूपमन्त्रांस्तदुक्तविधानेन तदनुष्ठानप्रकारानुपदिशेत् ॥

एतैर्मन्त्रैरुपासीत । सच्चित्पूर्णानन्दस्वरूपभक्तानुग्रहगृहीतविग्रहो भगवांस्तदैहिकश्रेयांसि दत्त्वा ब्रह्मविद्यां विप्रतिबन्धमुद्बोधयिष्य इति । एवं गुरुणोपदिष्टः शिष्यस्तन्मन्त्रानपि यथावदनुतिष्ठेत् ।

ऐषब्रह्मोपदेशस्स्यादेष दीक्षेति कथ्यते ।
दीयते ज्ञानसर्वस्वं क्षीयते पापपञ्जरः ॥

दानक्षपणधर्मत्वाद्दीक्षेत्याहुर्मनीषिणः ।
प्रदद्याद्दिव्यभावं तु क्षिणुयाद्दुरितान्यहो ॥

॥ महावाक्यविवरणम् ॥

7740&41. MAHĀVĀKYAVIVARAṆAM.

अथ महावाक्यार्थप्रबोधप्रकारं व्याख्यास्यामः । तत्त्वमसीति सोम्य महावाक्यमिदामिति प्रथमं शिष्यं प्रति ज्ञापयेद्गुरुः । तेन तत्त्वमसीत्यस्मिन्महावाक्ये त्रीणि पदानि भवन्ति— तत् त्वम् असीति । तत्पदस्य द्वावर्थौ वाच्यो लक्ष्यश्चेति । मायाशबलं ब्रह्म वाच्योऽर्थः । मायाविनिर्मुक्तं सत्यज्ञानानन्दरूपं लक्ष्यम् । त्वंपदस्य द्वावर्थौ वाच्यो

लक्ष्यश्चेति । स्थूलसूक्ष्मशरीरद्वयपरिवेष्टितं चैतन्यं वाच्योऽर्थः । स्थूलसूक्ष्मशरीरद्वयविनिर्मुक्तं प्रत्यक्चैतन्यं लक्ष्यम् । तत्त्वमसि किमहं भवामि ? त्वं तदसीत्यैक्ये बोधिते सति संसार्यसंसारिणोः कथमैक्यमिति विरोधस्फुरणं भवेत् । ततो जहदजहल्लक्षणया सोऽयं देवदत्त इत्यत्र यथा तद्देशतत्कालपरित्यागेनोभयत्र देवदत्तस्वरूपमात्रं लक्ष्यते तद्वदुभयपरित्यागेन लक्षणया द्वयोर्लक्ष्ययोरैक्यमखण्डं ज्ञात्वाकृतकृत्यो भवेत् । तदखण्डं सजातीयविजातीयभेदरहितमित्यात्मभेदो नास्ति । स्वगतभेदरहितमित्येकरसं सैन्धवघनवज्ज्ञानघनं निर्गुणं निरवयवं सर्वगतमवस्थात्रयाविनिर्मुक्तमसङ्गं तद्ब्रह्मैवाहमस्मि । इत्यभेदेनावस्थानं समाधिः । एवं महावाक्यार्थं सदा स्मरतो मुक्तिर्भवत्येव । तरति शोकमात्मवित् ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥
तस्य को मोहः कः शोक एकत्वमनुपश्यतः ॥

अभयं वै जनक प्राप्तोऽसि । ब्रह्मविदाप्नोति परम् । ब्रह्म वेद ब्रह्मैव भवति । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति । शुको मुक्तो वामदेवो मुक्तः । अयमात्मा ब्रह्म । “स एतमेव पुरुषं ब्रह्म ततममपश्यत्” इत्यृग्वेदे । “अहं ब्रह्मास्मि” इति यजुर्वेदे । ‘तत्त्व-

मसि ’ इति सामवेदे । ‘ तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ’ इत्याथर्वणवेदे । ‘ तद्योऽहं सोऽसौ योऽसौ सोऽहम् ’ । ‘ स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः । स य एवंवित् ’ । ‘ प्राणोऽस्मि प्रज्ञात्मा ’ । ‘ प्रज्ञानं ब्रह्म ’ । ‘ अहं ब्रह्मास्मि ’ इति चतुर्णां वेदानाम् । ‘ परो रजसि सावदोम् । ओं ब्रह्म ’ ।

अच्युतोऽहमनन्तोऽहं गोविन्दोऽहमहं हरिः ।
आनन्दोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥

नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्म्यहं सदा ॥

आदिमध्यान्तमुक्तोऽहं न बद्धोऽहं कदाचन ।
स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥

ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन्भावयितुं वाक्यमेतदुदीरयेत् ॥

ध्यानयोगेन मासैकाद्ब्रह्महत्यां व्यपोहति ।
संवत्सरसदाभ्यासात्सिद्ध्यष्टकमवाप्नुयात् ॥

तत्सद्ब्रह्मार्पणमस्तु ॥

॥ स्वात्मानन्दस्तोत्रम् ॥

7742–44, SVĀTMĀNANDASTOTRAM.

गजाननस्तवः ॥

विघ्नौघतिमिरस्तोमसौभगर्द्धिदिवाकरः ।
मन्यते वरदोऽस्माभिर्गजाननविभुर्मुदा ॥ १ ॥

देवीस्तवः ॥

अनेकजन्मसंप्राप्तामहं महिषमर्दिनीम् ।
नौमि प्रज्ञां तुरीयां तामम्बा विश्वेति विश्रुताम् ॥ २ ॥

समर्थस्तवः ॥

सीतापतिपदाम्भोजभ्रमरीकृतमानसः ।
रामदासगुरुः साक्षाद्गतिर्मे पुरतः सदा ॥ ३ ॥

गुरुस्तवः ॥

रमारमणचिन्मात्रसमर्थानन्तभैरवे ।
सेतवे गुरवे नित्यं नमस्तस्मै महात्मने ॥ ४ ॥

योगिवर्यशिरोरत्नं तारकब्रह्मसद्गुरुः ।
तद्दृष्टिगोचराः सर्वे पुनते नात्र संशयः ॥ ५ ॥

यस्याङ्घ्रिस्मरणेनैव नाश्यन्ते पापराशयः ।

देशिकेन्द्रवरं वन्दे तारकब्रह्मसद्गुरुम् ॥ ६ ॥

कृपासिन्धुसमुद्भूतो ज्ञानचन्द्रोऽयमद्भुतः ।
देशिकेन्द्राव्ययत्वाच्चे कृष्णपक्षेऽपि वर्धते ॥ ७ ॥

कोकैककोपनोद्दामपरिशोभितमस्तकः ।
भाति हार्दमये कोष्ठे तारकब्रह्मशंकरः ॥ ८ ॥

सद्गुरुः स सुरैः सेव्यो मुक्तैरपि मुमुक्षुभिः ।
तारकब्रह्मवर्योऽसौ वेदान्तप्रतिपादकः ॥ ९ ॥

क्षीराब्धिकन्यकाकान्तपादसंजातजाह्नवी ।
पावनी भवतः स्पर्शात्सेवितः स तु सेतुराट् ॥ १० ॥

अम्भोधिकन्यकाजानिजायाभाग्यविवर्धनः ।
देशिकानुग्रहोदारो भाति मे पुण्यकर्मणा ॥ ११ ॥

देशिकानुग्रहोत्तुङ्गतरङ्गानन्दसागरे ।
निमज्जामि निराभासस्वप्रकाशैकवस्तुनि ॥ १२ ॥

सार्वभौमसुराराध्यपूजिताङ्घ्रिसरोरुहः ।
प्रत्यगात्मा सदा भाति तारकब्रह्मसद्गुरुः ॥ १३ ॥

सद्गुरोरीक्षणादेव दारिताखिलसंसृतिः ।
अप्रमेयो निराकारो जातोऽहं यदनुग्रहात् ॥ १४ ॥

पुरतो भाति योगीन्द्रस्तारकब्रह्मसद्गुरुः ।
यस्य प्रसादाल्लभते ह्यणिमाद्यष्टवैभवम् ॥ १५ ॥

आसनपरः ॥

शीतलसुमनउपवने
पद्मासनबद्धनासिकादृष्टिः ।
नादानन्दघनेऽस्मि-
न्देशिकदयया विराजते योगी ॥ १६ ॥

कुण्डलीपरः ॥

वसुनादगतज्योतिस्सच्चिदानन्दरूपिणी ।
सैव शक्तिर्महामाया कुण्डली प्रोच्यते बुधैः ॥ १७ ॥

शक्तिः कुण्डलिनी दिव्या योगानन्दपदं ददौ ।
वसिष्ठादिगरिष्ठानां मुनीनां योगिनामपि ॥ १८ ॥

परात्परतरं वस्तु सर्वाधिष्ठानमव्ययम् ।
भण्यते ब्रह्मविद्भिर्यत्तदेवाहं न संशयः ॥ १९ ॥

आखण्डलसहस्रांशुपरमेष्ठिकपर्दिनः ।
यत्सत्तामनुवर्तन्ते वासुदेवः स उच्यते ॥ २० ॥

अखण्डानन्दसान्द्रोऽयं स्वप्रकाशस्वरूपकः ।
यस्यांशलेशमात्रेण जीवन्ति प्राणिकोटयः ॥ २१ ॥

अनेकजन्मसाहस्रप्राक्पुण्यपरिपाकतः ।
अखण्डाकारवृत्त्या च गम्यमानः स्वयं बभौ ॥ २२ ॥

अप्रमेयं सुराध्यक्षमखण्डानन्ददायकम् ।
वन्देऽहं हृदयाकाशे ह्यवाङ्मनसगोचरम् ॥ २३ ॥

निगमशिरःप्रतिपाद्यं निरवधिचैतन्यमद्वयानन्दम् ।
देशिकवरेशकृपया ब्रह्मैवास्मीति सर्वतः सिद्धम् ॥ २४ ॥

अहं ब्रह्मेति निश्चित्य अद्वैतानन्दभावतः ।
अनेकजन्मपापौघात्तारितो भवसागरात् ॥ २५ ॥

मधुरादिरसादीनां रसो यस्य रसाद्दहो ।
प्रोच्यते वेदवचसा रसो वै स इति स्फुटम् ॥ २६ ॥

अगमन्मे मनोनेत्रेत्यादिवृत्तिप्रकाशकः ।
कैवल्यैकस्वसंवेद्यः परिपूर्णोऽवशिष्यते ॥ २७ ॥

अहमेव जगन्मत्वा मदन्यन्नास्ति किंचन ।
वर्तते स भवेद्योगी बोधानन्दैकविग्रहः ॥ २८ ॥

ग्रन्थविचारः

अकृत्रिममिदं ज्ञानं सर्वज्ञैः परिचक्ष्यते ।
ब्रह्मैवाहं च चिन्मात्रमहमेव शिवः सदा ॥ २९ ॥

मुद्रापरः ॥

विमलब्रह्मवर्येण कृतं स्वात्मनिरूपणम् ।
गीयते येन भक्त्या स प्राप्यते मोक्षवैभवम् ॥ ३० ॥

स्वात्मानन्दस्तोत्रं नित्यं यः पठति मानवो लोके ।
तस्य भवेत्किमलभ्यं कैवल्यं चापि करतले विद्धि ॥ ३१ ॥

इति श्रीविमलब्रह्मवर्यैर्विरचितं स्वात्मानन्दस्तोत्रं संपूर्णम् ।

॥ उपदेशशिखामणिः ॥

7745. UPADEŚAŚIKHĀMANIH.

भज गौरीशं भज गौरीशं
भज गौरीशं मुग्धमते ।
भज गौरीशं भज गौरीशं
भज गौरीशं मुग्धमते ॥ १ ॥

सत्यं वद रे धर्मं चर रे
कृत्याकृत्यविचारं कुरु रे ।
कालो याति गृहीत्वा देहं
व्यर्थं मा कुरु मानुषजन्म ॥ २ ॥

पृष्ठे तिष्ठति मरणव्याघ्रः
पुरतस्तिष्ठति जन्मश्वभ्रम् ।
पार्श्वे तिष्ठति स जरानक्रो
व्याधिव्यालो गिलति शरीरम् ॥ ३

कामव्याधो देहारण्ये
तिष्ठति मानसहरिणं हर्तुम् ।
तं जय शत्रुं नो चेत्त्वामपि
बद्ध्वा नेतुं शक्तो भवति ॥ ४ ॥

दुर्जनसङ्गं मा कुरु मा कुरु
दारदपादपमिव दुष्फलदम् ।
कष्टं कष्टं चिन्तय चिन्तय
कलिमलनरके मग्नो भवसि ॥ ५ ॥

साध्यो वह्निर्हेतुर्धूमः
पक्षः शैलो मा कुरु तर्कम् ।
तत्साध्यस्त्वां दहति तदानीं
नाप्यनुमानं प्रत्यक्षं हि ॥ ६ ॥

मृतसंजीवनगुळिका रक्षति
कालात्रापि भिषग्वरपथ्यम् ।
मृत्युंजयपदभक्तिं कुरुषे
यदि तं तीर्त्वा नित्यो भवसि ॥ ७ ॥

जायापुत्रा द्रव्यपरास्ते
नष्टे द्रव्ये वृद्धत्वे त्वम् ।
ज्ञास्यसि तेषां कृत्यं श्रद्धां
शेषाः किमु वद विहितं कर्तुम् ॥ ८ ॥

अष्टैश्वर्यप्रभुरपि वित्तं
कष्टं ज्ञात्वा त्यक्तदाशः ।
भिक्षार्थमरे चरति स्थाणु-
र्भयरहितं तं पश्य मुमुक्षो ॥ ९ ॥

मायामेघः पीत्वा वर्षति
भवजलधेस्तद्विषयविषाक्तम् ।
नीरं स्वप्नेऽपि त्वं न स्मर
नो चेद्दोषज्वरवान्भवसि ॥ १० ॥

मायावेश्या वञ्चयति त्वां
विषयाभिनयैर्विश्वविलासैः ।
प्रज्ञानधनं पालय नित्यं
तां प्रति विमुखो भव मुक्तोऽसि ॥ ११ ॥

दृश्यं सर्वं नश्वरमेत-
द्भावय सततं ज्ञाते तत्त्वे ।
सत्यज्ञानानन्दब्रह्म
त्वमसीत्येवं श्रुतिरपि पठति ॥ १२ ॥

नाभीकन्दे भुजगी सुप्ता
तामुत्थापय मरुदायामैः ।
ऊर्ध्वं गत्वा वर्षत्यमृतं
दशशतकमलाख्यं पिब नित्यम् ॥ १३ ॥

प्राणस्पन्दाच्चित्तविकार-
श्चित्तविकाराद्विषयासक्तिः ।
विषयासक्त्या विविधगतिस्ते
तस्मात्प्राणनिरोद्धा भव रे ॥ १४ ॥

चिन्तय साम्बं चिन्मयदेहं
संचितकर्म त्वचो गलति ।
पञ्चनदीनां नाथोऽसि त्वं
प्रणतो भव रे परमशिवाङ्घ्रौ ॥ १५ ॥

कोमलबिल्वीदलपुष्पाद्यैः
कामरिपुं यज कलिमलशान्त्यै ।
श्रद्धाभक्तिध्यानसमेतो
निर्मलचित्तः सत्यं भवसि ॥ १६ ॥

जननत्राणसमर्थः साम्बः
शंकर एको ह्यास्ते सत्यम् ।
ध्यात्वा मुक्तो भवति शिवं यं
तं त्वं भावय हृदयाकाशे ॥ १७ ॥

त्यागेशपदानन्दसमुद्रे
भानुहिमांश्वोर्योगविशेषे ।
काले स्नात्वा पूतो भव रे
न पुनर्जननं न पुनर्जननम् ॥ १८ ॥

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण
त्यागराजनाम्ना विरचिता उपदेशशिखामणिः
संपूर्णास्तु ।

॥ आत्मानुसंधानम् ॥

7746 & 47. ĀTMĀNUSAṂDHĀNAM.

अत्यन्ततातिसंसिद्धशुद्धविद्यैकगोचरः ।
अनाद्यन्तः परात्मासौ जयत्यानन्दसुन्दरः ॥ १ ॥

श्रीमत्परशिवेन्द्रश्रीदेशिकानां वयं मुदा ।
अद्वैतानन्दमाध्वीकमङ्घ्रिपद्ममुपास्महे ॥ २ ॥

श्रीदेशिकोक्तवेदान्तनामसाहस्रमध्यगान् ।
काँश्चिन्नाममणीन्पद्यदामाभिर्ग्रथयाम्यहम् ॥ ३ ॥

अच्युतोऽहमनन्तोऽहमतर्क्योऽहमजोऽस्म्यहम् ।
अव्रणोऽहमकामोऽहमसङ्गोऽस्म्यभयोऽस्म्यहम् ॥ ४ ॥

अशब्दोऽहमरूपोऽहमस्पर्शोऽस्म्यहमव्ययः ।
अरसोऽहमगन्धोऽहमनादिरमृतोऽस्म्यहम् ॥ ५ ॥

अक्षरोऽहमलिङ्गोऽहमजरोऽस्म्यकलोऽस्म्यहम् ।
अप्राणोऽहममूर्तोऽहमचिन्त्योऽस्म्यकृतोऽस्म्यहम् ॥ ६ ॥

अन्तर्याम्यहमग्राह्योऽनिर्देश्योऽहमलक्षणः ।
अगोत्रोऽहममात्रोऽहमचक्षुष्कोऽस्म्यवागहम् ॥ ७ ॥

अदृश्योऽहमवर्णोऽहमखण्डोऽस्म्यहमद्भुतः ।
अश्रुतोऽहमदृष्टोऽहमन्वेष्टव्योऽमरोऽस्म्यहम् ॥ ८ ॥

अवायुरस्म्यनाकाशोऽतेजस्कोऽव्यभिचार्यहम् ।
अमतोऽहमजातोऽहमतिसूक्ष्मोऽविकार्यहम् ॥ ९ ॥

अरजस्कोऽतमस्कोऽहमसत्त्वोऽस्म्यगुणोऽस्म्यहम् ।
अमायोऽनुभवात्माहमनन्योऽविषयोऽस्म्यहम् ॥ १० ॥

अद्वैतोऽहमपूर्वोऽहमबाह्योऽहमनन्तरः ।
अश्रोत्रोऽहमदीर्घोऽहमव्यक्तोऽहमनामयः ॥ ११ ॥

अद्वयानन्दविज्ञानघनोऽस्म्यहमविक्रियः ।
अनिच्छोऽहमलेपोऽहमकर्तास्म्यहमक्षयः ॥ १२ ॥

अविद्याकार्यहीनोऽहमवाङ्मनसगोचरः ।
अनल्पोऽहमशोकोऽहमविकल्पोऽस्म्यतिज्वलन् ॥ १३ ॥

आदिमध्यान्तहीनोऽहमाधारोऽस्म्यहमाततः ।
आत्मचैतन्यरूपोऽहमहमानन्दचिद्घनः ॥ १४ ॥

आनन्दामृतरूपोऽहमात्मसंस्थोऽहमान्तरः ।
आप्तकामोऽहमाकाशात्पर आत्मेश्वरोऽस्म्यहम् ॥ १५ ॥

ईशानोऽस्म्यहमीड्योऽहमहमुत्तमपूरुषः ।
उत्कृष्टोऽहमुपद्रष्टाहमुत्तरतरोऽस्म्यहम् ॥ १६ ॥

केवलोऽहं कविः कर्माध्यक्षोऽहं करणाधिपः ।
गुहाशयोऽहं गुप्तोऽहं चक्षुषश्चक्षुरस्म्यहम् ॥ १७ ॥

चिदानन्दोऽस्म्यहं चेता चिद्घनश्चिन्मयोऽस्म्यहम् ।
ज्योतिर्मयोऽस्म्यहं ज्यायाञ्ज्योतिषां ज्योतिरस्म्यहम् ॥

तमसः साक्ष्यहं तुर्यात्तुर्योऽहं तमसः परः ।
दिव्यो देवोऽस्मि दुर्दर्शो द्रष्टा ध्येयो ध्रुवोऽस्म्यहम् ॥ १९ ॥

नित्योऽहं निरवद्योऽहं निष्क्रियोऽस्मि निरञ्जनः ।
निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः ॥ २० ॥

निर्विकारो नित्यपूतो निर्गुणो निःस्पृहोऽस्म्यहम् ।
निरिन्द्रियो नियन्ताहं निरपेक्षोऽस्मि निष्कलः ॥ २१ ॥

पुरुषः परमात्माहं पुराणः परमोऽस्म्यहम् ।
परावरोऽस्म्यहं प्रज्ञाप्रपञ्चोपशमोऽस्म्यहम् ॥ २२ ॥

परामृतोऽस्म्यहं पूर्णः प्रभुरस्मि पुरातनः ।
पूर्णानन्दैकबोधोऽहं प्रत्यगेकरसोऽस्म्यहम् ॥ २३ ॥

प्रज्ञात्माहं प्रशान्तोऽहं प्रकाशः परमेश्वरः ।
बहुधा चिन्त्यमानोऽहमहं ब्रह्मादिवन्दितः ॥ २४ ॥

बुद्धोऽहं भूतपालोऽहं भारूपो भगवानहम् ।
महादेवो महानस्मि महाज्ञेयो महेश्वरः ॥ २५ ॥

विमुक्तोऽहं विभुरहं वरेण्यो व्यापकोऽस्म्यहम् ।
वैश्वानरो वासुदेवो विश्वतश्चक्षुरस्म्यहम् ॥ २६ ॥

विश्वाधिकोऽहं विशदो विष्णुर्विश्वकृदस्म्यहम् ।
शुद्धोऽस्मि शुक्रः शान्तोऽहं शाश्वतोऽस्मि शिवोऽस्म्यहम् ॥

सर्वभूतान्तरात्माहमहमस्मि सनातनः ।
सर्वेश्वरोऽहं सर्वज्ञः सूक्ष्मः सर्वगतोऽस्म्यहम् ॥ २८ ॥

अहं सकृद्विभातोऽहं स्वे महिम्नि प्रतिष्ठितः ।
सर्वान्तरः स्वयंज्योतिः सर्वाधिपतिरस्म्यहम् ॥ २९ ॥

सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम् ।
समस्तसाक्षी सर्वात्मा सर्वभूतगुहाशयः ॥ ३० ॥

सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ।
स्थानत्रयव्यतीतोऽहं सर्वानुग्राहकोऽस्म्यहम् ॥ ३१ ॥

सच्चिदानन्दपूर्णात्मा सर्वप्रेमास्पदोऽस्म्यहम् ।
सच्चिदानन्दमात्रोऽहं स्वप्रकाशोऽस्मि सद्घनः ॥ ३२ ॥

सत्यस्वरूपः सन्मात्रः सिद्धः सर्वात्मकोऽस्म्यहम् ।
सर्वाधिष्ठानसन्मात्रस्वात्मा बन्धहरोऽस्म्यहम् ॥ ३३ ॥

सर्वग्रासोऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् ।
स्वतन्त्रोऽस्मि सुविस्पष्टः सुविभातोऽस्म्यहं हरिः ॥ ३४ ॥

अहं हरो हृदिस्थोऽहं हेतुदृष्टान्तवर्जितः ।
क्षेत्रज्ञः परमात्माहं श्रीमद्देशिकसूक्तितः ॥ ३५ ॥

इत्थमात्मानुसंधानपरो यः पुरुषो भवेत् ।
सोऽविद्याक्लेशनिर्मुक्तो ब्रह्मैव भवति स्वयम् ॥ ३६ ॥

इत्यात्मानुसंधानं समाप्तम् ॥

हरिः ओं श्रीगोष्ठीश्वराय नमः ॥

॥ सांमिश्रपञ्चीकरणम् ॥

7748 & 49. SAMMIŚRAPAÑCĪKARAṆAM.

॥ अथ सांमिश्रपञ्चीकरणम् ॥

अतः पञ्चीकृतपञ्चमहाभूतानां कार्योपादानाय परस्परं भूतमिश्रीकरणमाह ॥

ज्ञातृत्वं च तथा व्यानः श्रोत्रं वाचा तथैव च ।
शब्दो गगनतत्त्वानि कीर्त्यन्ते ब्रह्मवादिभिः ॥ १ ॥

मनः समानस्त्वक्त्वं पाणिः स्पर्शस्तथैव च ।
वायुतत्त्वानि कीर्त्यन्ते पञ्चधा ब्रह्मवादिभिः ॥ २ ॥

बुद्ध्युदानौ तथा चक्षुः पादौ रूपं तथैव च ।
वह्नितत्त्वानि कीर्त्यन्ते पञ्चधा ब्रह्मवादिभिः ॥ ३ ॥

चित्तापानौ तथा जिह्वा गुह्यं रसस्तथैव च ।
जलतत्त्वानि कीर्त्यन्ते पञ्चधा ब्रह्मवादिभिः ॥ ४ ॥

अहंप्राणौ तथा घ्राणं गुदं गन्धस्तथैव च ।
भूमितत्त्वानि कीर्त्यन्ते पञ्चधा ब्रह्मवादिभिः ॥ ५ ॥

एवं जातेषु भूतेषु प्रत्येकं विभजेद्द्विधा ।
चतुर्धा भिन्नमेकैकमर्धमर्धं तथा स्थितम् ॥ ६ ॥

व्योमार्धभागाश्चत्वारो वायुतेजःपयोभुवाम् ।
व्यानश्रोत्रवचःशब्दाः क्रमेण भूतमिश्रिताः ॥ ७ ॥
वाय्वर्धभागाश्चत्वारो व्योमतेजःपयोभुवाम् ।
बुद्बुदानाड्यग्निरूपाश्च क्रमेण भूतमिश्रिताः ॥ ८ ॥
अम्भोर्धभागाश्चत्वारः खंवाय्वग्निभुवां तथा ।
चित्तापानौ तथा जिह्वारसौ भूतैश्च मिश्रिताः ॥ ९ ॥
भूम्यर्धभागाश्चत्वारः खंवाय्वग्न्यम्भसामपि ।
अहंकारस्तथा प्राणघ्राणापानैश्च मिश्रिताः ॥ १० ॥
व्योमान्तःकरणांशाश्च व्योम्ना च भूतमिश्रिताः ।
वायोरंशाः समानादिवायवो भूतमिश्रिताः ॥ ११ ॥
ज्ञानेन्द्रियाणि वह्न्यंशा भूतान्तर्मिलितास्तथा ।
कर्मेन्द्रियाणि चाबंशा भूतसंमिश्रितास्तथा ॥ १२ ॥
पृथिवीविषयाः पञ्च भूतान्तर्मिलितास्तथा ।
एकैकस्यैकमेकैकं पञ्चानां पञ्च चैव च ॥ १३ ॥
ऊर्ध्वो गुणः कारणत्वादधः कार्यानुवर्तने ।
गुणत्वेनापि स्वगुणः कल्पनैवमनुक्रमात् ॥ १४ ॥
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १५ ॥
दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रकान्तकाः ।
विष्णुश्चन्द्रश्चतुर्वक्त्रः क्षेत्रज्ञस्त्रिपुरान्तकः ॥ १६ ॥

तत्त्वं तत्त्वं समुत्पन्नमेकं पञ्च च पञ्चधा ।
जडं चैतन्ययोगेन सर्वं वीराद् समुद्भवेत् ॥ १७ ॥

पञ्चभूतविभागोऽयं कल्पितस्तत्त्वचिन्तकैः ।
एतत्कार्यं च ब्रह्माण्डं यत्र विश्वं प्रकल्पितम् ॥ १८ ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
बोधार्थमेव शिष्याणां तत्त्वज्ञैः कल्पितं क्रमात् ॥ १९ ॥

पञ्चीकृतिरियं पञ्चभूतानां किल कल्पिता ।
एवं जानाति यो विप्रः स मुक्तो नात्र संशयः ॥ २० ॥

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसेत् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ २१ ॥

पञ्चविंशद्गुणश्चैतत्स्वेच्छया विहरन्नपि ।
कदाचिदपि योनौ च न बद्धः पूज्य एव सः ॥ २२ ॥

इति सामिश्रपञ्चीकरणं संपूर्णम् ॥

श्रीकृष्णार्पणमस्तु ॥

॥ नृसिंहध्यानम् ॥

7750. NṚSIṂHADHYĀNAM.

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥ १ ॥

यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं नौमि श्रीनृसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥ २ ॥

नैदाघभानुकिरणेष्विव वारिपूरः
सर्वो विभाति यदबोधवशात्प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधा-
त्तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥ ३ ॥

यस्मादभूदभवनानुभवात्सुखाब्धे-
र्विश्वं मरीचिमरुवारिसमं मुरारेः ।
तस्यालयो निखिललोकसुमङ्गलानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहम् ॥ ४ ॥

यस्याज्ञावशवर्तिनोऽनुदिवसं ब्रह्मादिलोकाधिपा
यस्यानन्दशतांशभागिन इमे शक्रादयो निर्वृताः ।
तं सत्यानवधिप्रबोधवपुषं भूमानमाशास्महे
स्वान्ते श्रीनरसिंहमाग्रहवतां दूरं सतामन्तिके ॥ ५ ॥

यत्पादरेणुकलिलं सलिलं निपीय
मूकोऽपि मूकयति पण्डितमण्डलानि ।
सद्भागधेयममितस्वपदप्रबोधं
निर्धूतमोहविभवं गुरुमानतोऽस्मि ॥ ६ ॥

कल्याणगुणसंपूर्णं निर्वाणविभवालयम् ।
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ॥ ७ ॥

श्रीमद्गुरुपदद्वन्द्वध्याननिर्धूतकल्मषः ।
कुर्वे तदाज्ञयाऽद्वैतदीपिकां भेदभेदिनीम् ॥ ८ ॥

श्रेयान्स्वधर्मो विगुणोऽपि यस्मा-
दित्यब्रवीत्पार्थसुहृत्सुरेशः ।
तस्मादहं साक्षिविवेकमादौ
गुरुप्रसादात्प्रकटीकरोमि ॥ ९ ॥

याज्ञिज्ञासा यज्ञदानादिभिः स्या-
च्छ्रुत्या मत्या चिन्तया यत्प्रबोधः ।
यस्मिन्बुद्धे बाध्यतेऽनर्थमूलं
तं भूमानं भावये स्वस्वरूपम् ॥ १० ॥

चेतश्चापलमिन्द्रियार्थविषयं त्यक्त्वा भजस्वाभयं
संसारार्णवतारकं नरहरेः पादाब्जरेणुप्लवम् ।
यो ध्यातो दितिजेन्द्रबालकमघःसिन्धोर्गतं पर्वतै-
राक्रान्तं श्रितमुग्रभोगिभिरनायासेन पारेऽकरोत् ॥ ११ ॥

नरहरिवपुषा यो दारयन्दानवारेः
प्रकटयति पुमर्थोऽभेददृष्टाविति।शः ।
निजगुणमथ मायामात्रमात्रादिभेदो
गुरुतरदयया मां पातु लक्ष्मीसहायः ॥ १२ ॥

मायासंभृतमानसेषु बहुधा यो बिम्बितो भासते
ब्रह्मब्राह्मणदेवदैत्यपशुभिर्भास्वानिवाप्सु प्रभुः ।
यः स्वाभापहृताखिलाशुभवपुर्यो भौतिकज्योतिषां
ज्योतिः श्रीपतये मृगेन्द्रवपुषे तस्मै परस्मै नमः ॥ १३ ॥

वेदान्तवनसंचारिनीलाचलगुहाश्रयम् ।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम् ॥ १४ ॥

किं न त्वं नरसिंह एव यदि वा नाहं न नो चेत्कथं
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्तः परः ।
भूयादर्थवदात्मबन्धहर इत्याद्यं वचोऽपौरुषं
न त्वं नातदहं त्वमेव नृहरे भूयासमात्मंस्त्वयि ॥ १५ ॥

मृषामायाविद्यावृतमहिमनि ब्रह्मणि परे
जगज्जालं जातं स्फुरति वियतीवोरुनगरम् ।
विरिञ्चश्रीशेशत्रिदशनरतिर्यग्गतमिदा
कुतोऽतो भूमाहं निरवधिचिदानन्दघनचित् ॥ १६ ॥

सार्थानि वेदान्तवचांसि येन यो
हिरण्यविद्विट् च सुदर्शनाश्रयः ।

प्रह्लाद उत्सर्पति यस्य चिन्तया
स मे नृसिंहो यतिराट् परा गतिः ॥ १७ ॥

यन्मायया पृथग्भूतः सदानन्दैकविग्रहः ।
हरिरप्यहमीशानं तं भजे पुरुषोत्तमम् ॥ १८ ॥

उपनिषदवबोधं बोधमानन्दकन्दं
निजगुणगणकान्तं कान्तमम्भोजयोनेः ।
परिहृतपरसत्त्वं सत्त्वमेतस्य मूलं
नरहरिवपुरैशं धाम कामं प्रपद्ये ॥ १९ ॥

गुरुचरणकृपा मे कञ्चुकीकुर्वती मां
नरहरिचरणेच्छां चारयत्यात्ममार्गे ।
अहमिति विगताधिः संचराम्यात्मयोग्यं
कपटमतिविलासैर्भेदिभिर्भिन्नमार्गे ॥ २० ॥

निरवधिनिर्मलवर्ति-
प्रकटनशीलप्रभो गुरोः स्नेहात् ।
औपनिषदात्मदीपः
कुरुतात्कल्याणकारिणीं विद्याम् ॥ २१ ॥

॥ अनुभवपञ्चविंशतिः ॥

7751 & 7752. ANUBHAVAPAÑCAVIṂŚATIḤ.

॥ श्रीमहादेवाय नमः ॥

अहो निरञ्जनः शान्तो बोधोऽहं प्रकृतेः परः ।
एतावन्तमहं कालमहंमोहविडम्बितः ॥ १ ॥

यथा प्रकाशयत्येको देही देहं जगत्तथा ।
अतो मम जगत्सर्वमभवन्न च किंचन ॥ २ ॥

सशरीरमहो विश्वं परित्यज्य मयाधुना ।
कुतश्चित्कौशलादेव परमात्मावलोक्यते ॥ ३ ॥

यथा न तोयतो भिन्नास्तरङ्गाः फेनबुद्बुदाः ।
आत्मनो न तथा भिन्नं विश्वात्मनि विनिर्गतम् ॥ ४ ॥

तन्तुमात्रो भवेदेव पटो यद्वद्विचारितः ।
आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितम् ॥ ५ ॥

यथैवेक्षुरसोत्क्षिप्ता तेन व्याप्ता न शर्करा ।
तथा विश्वं मयि क्षिप्तं मया व्याप्तं निरन्तरम् ॥ ६ ॥

आत्माज्ञानाज्जगद्भ्रान्तिरात्मज्ञानान्न भासते ।
रज्ज्वज्ञानादहिभ्रान्तिस्तज्ज्ञानाद्भासते न हि ॥ ७ ॥

प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः ।
यदा प्रकाशते विश्वं तदाहं भास एव हि ॥ ८ ॥

अहो विकल्पितं विश्वमज्ञानान्मयि भासते ।
रूप्यं शुक्तौ फणी हारे वारि सूर्यकरे तथा ॥ ९ ॥

मत्तो विनिर्गतं विश्वं मय्येव लयमेति हि ।
मृदि कुम्भो जले वीचिः कनके कटको यथा ॥ १० ॥

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ।
ब्रह्मादिस्तम्बपर्यन्तजगन्नाशेऽपि तिष्ठतः ॥ ११ ॥

अहो अहं नमो मह्यमेकोऽहं देहवानपि ।
क्वचिन्न गन्ता नागन्ता व्याप्य विश्वमवस्थितः ॥ १२ ॥

अहो अहं नमो मह्यं दक्षोऽहं नास्ति मत्समः ।
असंस्पृष्टशरीरेण येन विश्वं चिरं धृतम् ॥ १३ ॥

अहो अहं नमो मह्यं यस्य मे नास्ति किंचन ।
अथ वा यस्य मे सर्वं यद्वाज्ञानस्य गोचरः ॥ १४ ॥

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम् ।
अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरञ्जनः ॥ १५ ॥

द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजम् ।
दृश्यमेतन्मृषा सर्वमेकोऽहं चिद्रसोऽमलः ॥ १६ ॥

बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मयि ।
एवं विमृशतो नित्यं निर्विकल्पस्थितं मम ॥ १७ ॥

सशरीरमहो विश्वं न किंचिदिति निश्चितम् ।
शुद्धचिन्मात्रमात्माहं तत्का स्यात्कल्पनाधुना ॥ १८ ॥

शरीरं स्वर्गनरकौ बन्धमोक्षौ सुखं तथा ।
कल्पनामात्रमेवैतत्किं कार्यं मे चिदात्मनः ॥ १९ ॥

अहो जनसमूहेऽपि न द्वैतं पश्यतो मम ।
अरण्यमिव संवृत्तं क रतिं करवाण्यहम् ॥ २० ॥

नाहं देहो न मे देहो जीवो नाहमहं हि चित् ।
कल्पनामात्रमेवैतत्किं कार्यं मे चिदात्मनः ॥ २१ ॥

मय्यानन्दाम्बुधौ चित्तवातस्तस्मात्समुत्थितैः ।
अहो भुवनकल्लोलैर्विचित्रैर्भानमुत्थितम् ॥ २२ ॥

मय्यानन्दमहाम्भोधौ चित्तवाते प्रशाम्यति ।
अभाग्यजीववणिजो जगत्पोतोऽपि नश्वरम् ॥ २३ ॥

मय्यानन्दमहाम्भोधावाश्चर्यं जीववीचयः ।
उद्यन्ति घ्नन्ति खेलन्ति प्रविशन्ति स्वभावतः ॥ २४ ॥

अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितम् ।
न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिः शान्ता निराश्रया ॥

इत्यनुभवपञ्चविंशतिः समाप्ता ॥

24081

॥ जीवन्मुक्तलक्षणम् ॥

7753. JĪVANMUKTALAKṢAṆAM.

श्रीगणेशाय नमः ॥

जीवः शिवसमायुक्तो ज्ञानाज्ञानसमासमः ।
एकानेकसमश्चैव जीवन्मुक्तः स उच्यते ॥ १ ॥

एकं ब्रह्म जगत्सर्वमखण्डं भासते सदा ।
अनादि भान्ति भूतानि जीवन्मुक्तः स उच्यते ॥ २ ॥

एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।
आत्मवत्सर्वमेकं तु जीवन्मुक्तः स उच्यते ॥ ३ ॥

सर्वभूतसमं ब्रह्म भेदोऽभेदो न विद्यते ।
एकमेवाधिपश्यन्ति जीवन्मुक्तः स उच्यते ॥ ४ ॥

कर्माकर्म न पश्यन्ति सर्वकर्मविमोचकम् ।
निष्कर्म कर्म कर्तारं जीवन्मुक्तः स उच्यते ॥ ५ ॥

लोभमोहपरित्यक्त आशापाशविवर्जितः ।
सुखं दुःखं न जानाति जीवन्मुक्तः स उच्यते ॥ ६ ॥

कर्ममुक्तः क्रियामुक्तो नित्यमुक्तश्चिदात्मकः ।
कामभायापरित्यक्तो जीवन्मुक्तः स उच्यते ॥ ७ ॥

दिवारात्री न जानाति दारपुत्रादिकं समम् ।
दयातोषौ मृदु भाष्यं जीवन्मुक्तः स उच्यते ॥ ८ ॥

कामनाकार्यनिर्दोषः कार्याकार्यव्यवस्थितः ।
स्वहितात्मनि संतुष्टो जीवन्मुक्तः स उच्यते ॥ ९ ॥

गुणदोषापरिच्छिन्नो गुणागुणपरीक्षकः ।
गुणत्रयविहीनश्च जीवन्मुक्तः स उच्यते ॥ १० ॥

संतुष्टसकलावस्थो सदानन्दसुखात्मकः ।
सर्वलोकप्रियं भाष्यं जीवन्मुक्तः स उच्यते ॥ ११ ॥

पूर्णानन्दोऽहमस्मीति पूर्णानन्दोऽस्मि सर्वदा ।
पूर्णापूर्णतरं येन जीवन्मुक्तः स उच्यते ॥ १२ ॥

जाग्रत्स्वप्नमिव साक्षी साक्षी देहचतुष्टयम् ।
सर्वसाक्षी निरालम्बो जीवन्मुक्तः स उच्यते ॥ १३ ॥

एकात्मभावनादेव यदि भावं न हि न हि ।
लोकान्तश्चैवमेकान्तो जीवन्मुक्तः स उच्यते ॥ १४ ॥

शान्तिवृद्धी क्षमा पूर्णशान्तिर्दान्तिर्मुहुर्मुहुः ।
भक्तिभावं परित्यज्य जीवन्मुक्तः स उच्यते ॥ १५ ॥

आनन्दमखिलं सर्वमानन्देति चिदात्मकम् ।
आनन्दं परमानन्दो जीवन्मुक्तः स उच्यते ॥ १६ ॥

तत्पदस्य तदात्मानं त्वंपदस्य चिदात्मकम् ।
असिपदे सदा मग्नं जीवन्मुक्तः स उच्यते ॥ १७ ॥

निर्धूतं च निरापेक्षं जितसङ्गं जितेन्द्रियम् ।
प्रतापः पुरुषं येन जीवन्मुक्तः स उच्यते ॥ १८ ॥

प्रज्ञानं हृदयावर्तं विज्ञानं कृतमानसा ।
अज्ञानं शृङ्खलाच्छेद्यं जीवन्मुक्तः स उच्यते ॥ १९ ॥

दृश्यादृश्यसमं चैव दृष्टादृष्टसमं तथा ।
दर्शने बुद्धिः स्थातव्यं जीवन्मुक्तस्स उच्यते ॥ २० ॥

अयमात्मा चिद्ध्यक्षं अहमस्मीतिभावना ।
सर्वभावविहीनश्च जीवन्मुक्तः स उच्यते ॥ २१ ॥

अहंभावं न गृण्हीयादहंकर्ता कदाचन ।
अहंकारातीतमानं जीवन्मुक्तः स उच्यते ॥ २२ ॥

जीवन्मुक्त इति व्याख्या व्याख्यानं च परं पदम् ।
दत्तेन कथितं व्याख्या जीवन्मुक्तः स उच्यते ॥ २३ ॥

इति श्रीदत्तात्रेयमुनिविरचितं जीवन्मुक्तलक्षणं संपूर्णम् ॥
श्रीशिवार्पणमस्तु ।

॥ स्वप्नोदितम् ॥

7754 & 7755. SVAPNODITAM.

हरिः ओम् ॥

देशिकानुग्रहोत्तुङ्गतरङ्गशिशिराशयः ।
निवसामि निजानन्दपरिपूर्णैकभूमनि ॥ १ ॥

देशिकानुग्रहोत्तुङ्गमत्तमातङ्गमस्तकम् ।
आरुह्य विहराम्यात्मपदे समरसोज्ज्वले ॥ २ ॥

देशिकानुग्रहोत्तुङ्गगिरिशृङ्गमुपेयुषः ।
तृणवद्भाति मे सर्वं जगदत्यल्पमाततम् ॥ ३ ॥

देशिकानुग्रहोदारग्रहग्रस्तात्मवानहम् ।
न किंचिदपि जानामि जगदेतच्चराचरम् ॥ ४ ॥

देशिकानुग्रहोदारवेत्रोदस्तमनोग्रहः ।
विजानामि जगत्सर्वमात्ममात्रतयाधुना ॥ ५ ॥

देशिकानुग्रहोदारतरणिप्रसरोद्भवे ।
स्वानन्दैकरवं वीक्षे समुल्लसितमद्भुतम् ॥ ६ ॥

देशिकानुग्रहोदारतुषारकिरणोदये ।
आश्चर्यमान्तराम्भोजमुन्निद्रमभवन्मम ॥ ७ ॥

देशिकानुग्रहोदारदावानललता भृशम् ।
दग्ध्वाऽशेषं जगज्जालमलं मां शीतयत्यहो ॥ ८ ॥

देशिकानुग्रहोदाररवितप्तमनोमरौ ।
स्वानन्दकन्दलः कश्चिदाश्चर्यमुदभूद्भृशम् ॥ ९ ॥

देशिकानुग्रहोदारसमीरे वाति सर्वतः ।
मम चित्तमहाम्भोधिश्चितं न स्पन्दते कुतः ॥ १० ॥

देशिकानुग्रहोदारदारैः संततसङ्गिनः ।
मम भावे मनो लीनं निवृत्ताशेषवृत्तिकम् ॥ ११ ॥

देशिकानुग्रहोदारपीताम्बरधरस्य मे ।
शीततापादिभिर्दुःखं कथं संगो भविष्यति ॥ १२ ॥

देशिकानुग्रहोदारसाम्राज्याधिपतेर्मम ।
अशेषमभवद्दृश्यमतः किमतिशेषतः ॥ १३ ॥

देशिकेन्द्रकृपाखड्गखण्डिताशारिमण्डलः ।
अखण्डितनिजानन्दमण्डले निवसाम्यहम् ॥ १४ ॥

देशिकेन्द्रकृपाखड्गकृत्तचित्तमृगोत्तमः ।
शान्तभीतिश्चराम्यन्तरात्मकान्तारसंततौ ॥ १५ ॥

देशिकेन्द्रकृपाखड्गविलूनेऽज्ञानपादपे ।
संसारघोरवेतालः क्व गतो वा न वेद्म्यहम् ॥ १६ ॥

देशिकेन्द्रकृपाचन्द्रचन्द्रिकाशीतलाकृतिः ।
संसारसौरसंतापं नैवाहं वेद्मि किंचन ॥ १७ ॥

देशिकेन्द्रकृपाचन्द्रसमेधितचिदम्बुधौ ।
निमग्नोऽहं न पश्यामि स्वभिन्नं वस्तु किंचन ॥ १८ ॥

देशिकेन्द्रकृपाचन्द्रनिरस्तान्तस्तमस्ततिः ।
किमप्यहं न पश्यामि किमाश्चर्यमभूदिह ॥ १९ ॥

देशिकेन्द्रकृपाचन्द्रप्रफुल्लानन्दकैरवम् ।
आघ्रायाघ्राय हृष्यामि स्वात्मन्येव मुहुर्मुहुः ॥ २० ॥

देशिकेन्द्रकृपाचन्द्रद्रुतचन्द्रोपलान्तरः ।
विश्रान्तिमाप्तवानस्मि विज्ञानैकरसे पदे ॥ २१ ॥

कृतार्थोऽस्मि कृतार्थोऽस्मि देशिकानुग्रहादहम् ।
अतः सर्वे जना यूयमुपाध्वं देशिकोत्तमम् ॥ २२ ॥

इति स्वप्नोदितां निष्ठामनुस्मरति यः पुमान् ।
सोऽसौ सत्यपरानन्दपदवीं याति पावनीम् ॥ २३ ॥

॥ हरिः ॐ ॥

॥ पञ्चीकृतम् ॥

7756. PAÑCĪKṚTAM.

पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सर्वं विराडित्युच्यते। एतत्स्थूलशरीरमात्मनः। आत्मन इन्द्रियैरर्थोपलब्धिजागरितम्। तदुभयाभिमान्यात्मा विश्वम्। एतत्त्रयमकारः। अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते। एतत्सूक्ष्मशरीरमात्मनः। करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः। तदुभयाभिमान्यात्मा तैजसः। एतत्त्रयमुकारः। शरीरद्वयकारणमात्माज्ञानं साभासमव्याकृतमित्युच्यते। तच्च न सन्नासन्नापि सदसन्न भिन्नं नाभिन्नं नापि भिन्नाभिन्नं कुतश्चिन्न निरवयवं न सावयवं नोभयं केवलं ब्रह्मैकत्वज्ञानापनोद्यं सर्वप्रकारं ज्ञानोपसंहारो बुद्धेः कारणात्मनावस्थानं सुषुप्तम्। तदुभयाभिमान्यात्मा प्राज्ञः। एतत्त्रयं मकारः। अकारउकारमकारोऽहमेवाहं साक्षीचिन्मात्रस्वरूपो नाज्ञानं तत्कार्यं वा। किं तु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं ब्रह्मैवाहमस्मि। अहं ब्रह्मेत्यभेदेनावस्थानं समाधिः 'अयमात्मा ब्रह्म'इत्यादिश्रुतिभ्यः। जायतोऽस्ति विपरिणमते विवर्धतेऽपक्षीयते विनश्यतीति षड् भावविकाराः। अशनायापिपासाशोकमोहजरामरणानि षडूर्मयः। अस्ति नास्ति नास्तीत्येताश्चतु-

ष्कोटयः हेयाज्ञेया पापाख्यापि चतुष्कोट्यन्तरम् । आत्मनानात्मा नोपादीयते न त्यज्यते स्वात्मविक्रियाविरोधात् । अनात्मनात्मा नोपादीयते न त्यज्यते अद्वयत्वादात्मनः । आत्मना वाऽन्यदनात्मा नोपादीयते न त्यज्यते अक्रियत्वादात्मन इति ॥

पञ्चीकृतः समाप्तः ॥

॥ पञ्चीकृतटीका ॥

7757. PAÑCĪKṚTAṬĪKĀ.

सच्छब्दवाच्यमविद्याशबलं ब्रह्म । तस्मादाकाशवायुतेजोबन्नानि महाभूतानि क्रमेण जातानि । सत आकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी । एवमेतानि पञ्चीकृतपञ्चमहाभूतानि । तत्कार्यं सप्तदशलिङ्गमुत्पन्नम् । वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि । प्राणापानव्यानोदानसमाना इति पञ्च वायवः । मनो बुद्धिरहंकारश्चित्तमित्यन्तःकरणचतुष्टयम् । संशयात्मकं मनो निश्चयात्मिका बुद्धिरित्येकमेवान्तःकरणमुभयथा व्यपदिश्यते । क्रियाभेदात्मा च कलालवकादिवदित्येतत्सूक्ष्मशरीरं लिङ्गमित्यु-

च्यते। अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सप्तदशकं लि-
ङ्गं हिरण्यगर्भः। तत्सूक्ष्मशरीरमात्मनः। श्रुतिसिद्धानि पञ्ची-
कृतपञ्चमहाभूतानि। तेभ्य उत्पन्नमधिदैवं ब्रह्माण्डमध्या-
त्ममधिभूतं च करशिरश्चरणादिमल्लोकप्रसिद्धं स्थूलशरीरं जा-
तम्। एतानि पञ्चीकृतपञ्चभूतानि। तत्कार्यं ब्रह्माण्डम्।
प्राणिनां स्थूलशरीरजातं सर्वं विराडुच्यते। तत्स्थूलश-
रीरमात्मनः। एकमेव स्थूलशरीरं विराडाख्यम्। एकमेव सू-
क्ष्मशरीरं हिरण्यगर्भाख्यम्। एवं शरीरद्वयाभिमानी जीव
स्त्वंपदार्थः। सच्छब्दवाच्यं ब्रह्मैव। शरीरद्वयप्रविष्टं जलसू-
र्यवद्घटाकाशवच्च प्राणधारणक्रियायोगात् जीव इत्युच्यते।
स च जीवो जाग्रत्स्वप्नसुषुप्तिव्यतिरिक्तो निर्गुणो निरवयवो
निःसङ्गो नित्यः शुद्धः परमानन्दाद्वयश्च भावः परमात्मैव
त्रिष्वपि कालेषु सन्नप्यन्तःकरणसंनिधानाज्जाग्रत्स्वप्नसुषु-
प्तीनि अन्तःकरणस्थानि क्रियाकारकफलानि चानिकृतः प-
श्यति। इन्द्रियैरर्थोपलब्धिर्जागरितं स्थूलकर्मनिमित्तं। करणे-
षूपसंहृतेषु जागरितसंस्कारजः क्षुद्रकर्मनिमित्तवासनारूप-
हस्त्यादिविषयः स्वप्नम्। स्थूलक्षुद्रकर्मद्वयोपरमे तत्कृतजा-
गरितस्वप्नप्रत्ययद्वयोपरमाद्वटकणिकायामिव वटवृक्षावस्था-
नमन्तःकरणस्थसच्छब्दवाच्ये ब्रह्मणि मायाविनि शबले का-
रणात्मनावस्थानं सुषुप्तिः। एवमेतानि जागरितस्वप्नसुषुप्ति-
स्थानानि। जीवः क्रमतोऽक्रमतश्चापश्यत्येवाधार्यपूर्वं

समाध्यारम्भकाले मुमुक्षुः पश्चान्निश्चलेऽन्तःकरणजाते क्षेत्रजातं सर्वं क्रमेण प्रविलापयेत् ॥ क्षेत्रज्ञं च परिशेषयेत् । पञ्चीकृतपञ्चमहाभूतेभ्यो यदुत्पन्नमण्डादि तत्सर्वं पञ्चीकृतपञ्चमहाभूतव्यतिरेकेण नास्ति । यथा मृद उत्पन्नो घटो मृद्व्यतिरेकेण नास्ति तत्कार्यत्वात् । एवं पञ्चीकृतपञ्चमहाभूतानि अपञ्चीकृतपञ्चमहाभूतव्यतिरेकेण न सन्ति तत्कार्यत्वात् । इदानीं हिरण्यगर्भमात्रं सूक्ष्मशरीरं परिशिष्टम् । तत्रापि सप्तदशकालिङ्गं अपञ्चीकृतपञ्चमहाभूतव्यतिरेकेण नास्ति तत्कार्यत्वात् इदानीमपञ्चीकृतमहाभूतानि परिशिष्टानि । तत्रापि अन्नशब्दवाच्यव्याप्तपृथिवी उदकव्यतिरेकेण आकाशशब्दव्यतिरेकेण मायाविशुद्धव्यतिरेकेण इदानीमन्तःकरणभावाज्जाग्रत्स्वप्नसुषुप्तानामभावेजीवत्ववर्जितप्रत्यगात्मचैतन्यस्वभावो नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयस्वभावं ब्रह्मैवाहमस्मि । अहमेव ब्रह्मेति तप्तपरशुग्रहणपर्यन्तं दार्ढ्योपेतः । तत्त्वमसीति वाक्यार्थं करतलविन्यस्तामलकफलवदनुभवफलपर्यन्तेन ज्ञानेन स स मुच्यते । 'एवमाचार्यवान् पुरुषो वेद । तस्य तावदेव चिरम् ।' इति श्रुतेः

इति पञ्चीकृतटीकासमाप्ता । शुभं भवतु ॥

श्रीशिवार्पणमस्तु ॥

॥ प्रणवार्थप्रकाशिका ॥

7758. PRAṆAVĀRTHAPRAKĀŚIKĀ.

श्रीसाम्बपरमेश्वराय नमः ।

श्रीकृष्णाय नमः ॥

समास्थितः सप्तमयोगभूमिका-
मपारगम्भीरसुखामृताम्बुधिः ।
सतां गुरुः सद्गुणसागरो मुहु-
र्मया शिवानन्दयतीश्वरो नतः ॥ १ ॥

॥ अकारोकारवर्णाभ्यां सातत्योत्कर्षधर्मिणम् ।
प्रत्यञ्चं संस्मरेन्मार्थं ब्रह्म चैक्यं तथोमिति ॥ २ ॥

अजाद्यात्मकमात्मानमकारार्थं परेश्वरम् ।
उवर्णपूर्वभागार्थमुत्कृष्टाद्यात्मकं मुहुः ॥ ३ ॥

उवर्णोत्तरभागार्थं तं विदुर्व्यवहारतः ।
मार्थमुक्तमहानन्दाद्यात्मप्रत्यक्तथोमिति ॥ ४ ॥

इत्यजोत्कृष्टमुक्तादिस्वन्देकांशाक्षरात्मना ।
एकेन प्रणवेनैक्यं जानीयाद्व्यतिहारतः ॥ ५ ॥

अथवाकारमात्मानमुकारं च जगद्गुरुम् ।
अवधारणसंयुक्तमेकीकुर्यादथोमिति ॥ ६ ॥

अहंशब्दैकदेशत्वाद्ब्रह्मशब्दैकदेशतः ।
अनयोरेकदेशत्वाद्ब्रह्माकारेण च स्मरेत् ॥ ७ ॥

साक्षित्वान्मनआदीनां मकारेण तु साक्षिणम् ।
सावधारणमैक्यार्थमेवमोमिति पश्यति ॥ ८ ॥

उक्ते स्वात्मन्यवस्थानात्कथंचित्प्रच्युतो यदि ।
आत्मानं त्रिशरीरं त्रिशरीरं ब्रह्म चिन्तयेत् ॥ ९ ॥

स्थूलत्वात्स्थूलभुक्त्वाच्च सूक्ष्मत्वात्सूक्ष्मभुक्त्वतः ।
ऐक्यादानन्दभोगाच्च तुर्यैकत्वं च चित्त्वतः ॥ १० ॥

विश्वतैजसकप्राज्ञतुर्यैश्च चतुरात्मकैः ।
वैश्वानराद्यभिन्नं तं चतुष्पादं विचिन्तयेत् ॥ ११ ॥

परादिरूपाकारेण विश्वो वैश्वानरात्मकः ।
चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिरुच्यते ॥ १२ ॥

हिरण्यगर्भाभिन्नश्च तैजसश्चतुरात्मकः ।
उच्यते पूर्ववत्तत्रोंकारेण चतुरात्मना ॥ १३ ॥

प्राज्ञस्तथेश्वराभिन्नचतुरात्मा निगद्यते ।
चतूरूपमकारेण जगद्बीजोपधानकः ॥ १४ ॥

ओतानुज्ञानुज्ञाना(?)विकल्पप्रणवेन तु ।
तादृशेनोच्यते साक्षी स्वप्रकाशचिदात्मकः ॥ १५ ॥

वाच्यैरथात्मपादैस्तु मात्राणां चोंकृतेर्यतिः ।
एकत्वं चिन्तयेत्प्राज्ञो युगपल्लयसिद्धये ॥ १६ ॥

स्थूलं सूक्ष्मे च तद्बीजे मात्राभिः प्रविलापयेत् ।
कारणं चोंकृतेरोताद्यात्मना चिन्तयन्ग्रसेत् ॥ १६ ॥

य इत्थं प्रणवस्यार्थं गुरोर्ज्ञात्वा यतिर्भवेत् ।
स्वात्मनिष्ठः स मुक्तः स्यादत्रैवानन्दवारिधिः ॥ १७ ॥

हरिः ॐ ॥ ऐरावतेश्वराय नमः
श्रीविश्वनाथाय नमः ॥

॥ साधनचतुष्टयसंपत्तिः ॥

7759. SĀDHANACATUṢṬAYASAMPATTIḤ.

अथशब्दार्थः साधनचतुष्टयमुच्यते नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभोगविरागः शमदमादिसंपत्तिर्मुमुक्षुत्वं चेति । ब्रह्म नित्यं सकलं जगदनित्यमिति नित्यानित्यवस्तुविवेकः । 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति श्रुतिः । यथा इह भूलोके कर्मणा चितः संपादितः पुत्रमित्रकलत्रादिलक्षणो लोकः जनः क्षीयते नश्यति एवमेवामुत्र स्वर्गादिलोकेष्वपि पुण्येन चितः संपादितः लोकः जनः क्षीयत इति तदर्थः । 'परीक्ष्य लोकान्

कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रुतिः । कर्मणा चितान् संपादितान् चतुर्दश लोकान् लोकस्थान् जनान् परीक्ष्य अनित्यत्वेन निश्चित्य ब्राह्मणः ब्रह्मसाक्षात्कारकामः निर्वेदं वैराग्यम् आयात् प्राप्नुयात् । अकृतो मोक्षः कृतेन कर्मणा नास्ति न संपद्यते । तस्मात्कारणात् तद्विज्ञानार्थं ब्रह्मज्ञानार्थं श्रोत्रियं साङ्गवेदाध्ययनवन्तं ब्रह्मनिष्ठं ब्रह्मसाक्षात्कारवन्तं गुरुं समित्पाणिः यथायोग्यं समिद्दन्तकाष्ठादिपाणिः सन् अभिगच्छेत् एतादृशगुरुनिकटं प्राप्नुयादित्यर्थः । 'शान्तो दान्तः उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वा आत्मन्येवात्मानं पश्येत् ।' शान्तः अन्तरिन्द्रियमनोनिग्रहवान् दान्तः बहिरिन्द्रियचक्षुरादिनिग्रहवान् उपरतः सकलविषयाभिलाषरहितः तितिक्षुः शीतोष्णसुखदुःखमानावमानादिद्वन्द्वसहिष्णुः ब्रह्मविषयिणी श्रद्धैव वित्तं यस्य सः एवंविधविशेषणविशिष्टो भूत्वा आत्मनि विशुद्धान्तःकरणे प्रतिबिम्बितम् आत्मानं परमात्मानं साक्षात्कुर्यादित्यर्थः । मुमुक्षुत्वं मोक्षेच्छा ।

इत्यात्मनि साधनचतुष्टयसंपत्तिः

समाप्ता ॥

॥ सप्तश्लोकीप्रकरणम् ॥

7760. SAPTAŚLOKĪPRAKARAṆAM.

आत्माश्रयात्मविषयं भावरूपमनादि च ।
अज्ञानं बाध्यमानत्वान्न सदित्युच्यते बुधैः ॥

नासत्प्रतीयमानत्वाज्जगन्निर्वाहकत्वतः ।
परस्परविरोधेन न भवेत्सदसच्च तत् ॥

सदादिभ्यो विभिन्नं तद्धर्म्यादेरनिरूपणात् ।
उक्तदोषत्रयापत्तेरभिन्नं च न तद्भवेत् ॥

परस्परविरोधेन भिन्नाभिन्नं न तद्भवेत् ।
न सावयवहीनं तत्कार्येष्ववयवान्वयात् ॥

न च सावयवं तत्स्यान्मूलकारणताबलात् ।
मिथो विरोधादुभयात्मकत्वं नैव संभवेत् ॥

तस्मिन्नेव चिदाभासे सुस्थितं कृत्यपञ्चकम् ।
सत्कृत्य तत्सदाध्यस्तं प्रत्यगद्वयचिद्घने ॥

निरपेक्षशिवात्मैक्यज्ञानस्योदयमात्रतः ।
सकार्यमेतदज्ञानं नासीदस्ति भविष्यति ॥

इति सप्तश्लोकप्रकरणं समाप्तम् ।

॥ भिक्ष्वष्टकम् ॥

7761. BHIKṢVAṢṬAKAM.

गङ्गाप्रतीरं ध्रुवमाश्रयन्तः
सङ्गापनोदं परिशीलयन्तः ।
तुरंगश्रृङ्गान्समुपाश्रयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥

कामाद्यरातीन्परिभावयन्तो
भामादिभोगानपि दूरयन्तः ।
वामान्द्रुमूलान्समुपाश्रयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ २ ॥

ब्रह्मात्मभावैकसुधां पिबन्तो
माहेश्वरं श्रीमनुमामनन्तः ।
मायां महाजालमयीं त्यजन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ३ ॥

तीर्थानि सर्वाणि च तीर्थयन्तो
मुक्तिं परां केवलमर्थयन्तः ।
स्वीयानि नामानि यथार्थयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ४ ॥

भिक्षां क्षुधामात्रहरामटन्तो
रक्षां जनानां निगमै रटन्त ।
साक्षात्परोक्षेऽपि परे रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

गुर्वर्पिताज्ञामनुपालयन्तः
सर्वं चिदेवेति विलोकयन्तः ।
सर्वंसहां च क्षमया जयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ६ ॥

आशास्वनन्तासु भृशं भ्रमन्त
आशां समूलामवमानयन्तः ।
ईशाङ्घ्रिपद्मे सततं रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ७ ॥

चिन्तां दुरन्तां परिहर्तुमन्त-
श्चिन्तां भवस्यात्मपरां भजन्तः ।
स्वान्ते नितान्तं स्वगुरून्स्मरन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ८ ॥

श्रीदक्षिणामूर्तिकटाक्षवीक्षा-
लक्षीकृतेनागमदक्षिणेन ।
श्रीसच्चिदानन्दमुनीश्वरेण
भिक्ष्वष्टकं दीपितमार्यभक्त्या ॥ ९ ॥

प्रत्यूषकाले पठतां जनानां
प्रत्याहतिः कास्ति नु तद्व्रतानाम् ।

स्वर्गादिलोकानपि तुच्छयन्तो
निर्वाणसाम्यं ननु ते लभन्ते ॥ १० ॥

॥ आत्मतत्त्वम् ॥

7762. ĀTMATATTVAM.

ओं नमः सर्वमङ्गलमूर्तये श्रीकृष्णाय ॥

श्री शुक उवाच—

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ।
ब्रह्मणे दर्शयन्पश्यमव्यलीकव्रताहृतौ ॥ १ ॥

सृजामि तपसैवेदं ग्रसामि तपसा पुमान् ।
बिभर्मि तपसा विश्वं वीर्यं मे दुस्तरं तपः ॥ २ ॥

श्री भगवानुवाच—

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥ ३ ॥

यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ४ ॥

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्यत सोऽस्म्यहम् ॥ ५ ॥

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथा भासो यथा तमः ॥ ६ ॥

शुक उवाच—

यथा महान्ति भूतानि भूतेषूच्चावचेषु तु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ७ ॥

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यः स्यात्सर्वत्र सर्वदा ॥ ८ ॥

एतन्मतं समातिष्ठन्परमेण समाधिना ।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ९ ॥

ब्रह्मीब्रह्मविवर्त्तमूलप्रकृती माया अविद्यावशे
चैतन्यप्रतिबिंबभासत असें जीवेश्वराकारसे ।
द्वन्द्वी देहचतुष्टयपृथक्कृताऽब्रह्माण्डपिण्डान्वये
ऐसी व्यष्टिसमष्टिसृष्टिप्रतिभा निर्द्वन्द्व आत्मा स्वयम् ॥

॥ मनोलयप्रकरणम् ॥

7763 & 64. MANOLAYAPRAKARAṆAṂ.

अन्तर्निष्ठो भवेद्योगी अन्तर्निष्ठः सदा सुखी ।
अन्तर्निष्ठस्तपोनिष्ठः अन्तर्भावं सदा कुरु ॥

मनोमूलं न जानाति मूर्खो भवति पण्डितः ।
मनोमूलं भवेदेवमेवं जानाति पण्डितः ॥

मनोमूलं भवेद्ब्रह्म ब्रह्ममूलमिदं जगत् ।
कथं ध्याता कथं ध्येयं ब्रह्मैवाहं न संशयः ॥

देहमध्ये स्थितं ब्रह्म कथं मूढ न पश्यसि ।
मूढात्मा देहभावात्मा देहं सत्यं कथं भवेत् ॥

जीवात्मा देहसंबद्धो देहातीतः परो मतः ।
सर्वं खलु इदं ब्रह्म इति मे निश्चिता मतिः ॥

देहमध्ये स्थितं ब्रह्म कथं मूढ न पश्यसि ।
वाचा जल्पो वृथाऽयं तु निःशब्दं ब्रह्म उच्यते ॥

माया ब्रह्म कथं भिन्नं सूर्यरश्मी तथैव च ।
पुष्पगन्धं कथं भिन्नं जलतरंगं तथैव च ॥

ब्रह्मरूपमिदं सर्वं ब्रह्मैवाहं न संशयः ।
मनोलयं भवेद्ब्रह्म ब्रह्ममूलमिदं जगत् ॥

ब्रह्मनिष्ठो भवेद्योगी ब्रह्मनिष्ठः शिवात्मकः ।
ब्रह्मनिष्ठं शुचिष्मन्तं पवित्रमिदमुत्तमम् ॥

इति मनोलयप्रकरणं समाप्तम् ।

॥ ब्रह्मनिरामयाष्टकम् ॥

7765. BRAHMANIRĀMAYĀṢṬAKAM.

ओम् ॥

एवं सर्वश्चिदानन्द आदिमध्यान्तवर्जितः ।
पूर्ण आत्मप्रकाशं च सोऽहं ब्रह्म निरामयम् ॥ १ ॥

एकमेव निराभासमभासं रूपवर्जितम् ।
भावाभावविहीनं च सोऽहं ब्रह्म निरामयम् ॥ २ ॥

निर्गुणं परमं ब्रह्म सच्चिदानन्दमद्वयम् ।
तत्त्वमस्यादिवाक्येन सोऽहं ब्रह्म निरामयम् ॥ ३ ॥

एकमेवाद्वितीयं च नामरूपविवर्जितम् ।
एकमेव समं तत्त्वं सोऽहं ब्रह्म निरामयम् ॥ ४ ॥

आत्मतत्त्वमयं नित्यमेकमेवातिनिर्मलम् ।
पूर्णब्रह्मनिराभासं सोऽहं ब्रह्म निरामयम् ॥ ५ ॥

एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।
अहमेव निराकारं सोऽहं ब्रह्म निरामयम् ॥ ६ ॥

अव्यक्तं च वचोतीतमखण्डं खण्डवर्जितम् ।
निराधारं परं ब्रह्म सोऽहं ब्रह्म निरामयम् ॥ ७ ॥

अक्षरं परमं ब्रह्म द्वैताद्वैतविवर्जितम् ।
मुनीश्वरहितं तत्त्वं सोऽहं ब्रह्म निरामयम् ॥ ८ ॥

इति श्रीब्रह्मनिरामयाष्टकं संपूर्णम् ॥

जलेऽग्निश्च करेऽग्निश्च ब्रह्माग्निश्चाभिमन्त्रितः ।
अग्नित्रयप्रदानेन शुद्धो भाति कमण्डलुः ॥

कमण्डलुमहातीर्थं त्रिवेणीसंगमे भवम् ।
महानदीमहातीर्थं पुण्यस्यैकपरायणम् ॥

॥ ऊर्मिषट्कम् ॥

7766. ŪRMIṢAṬKAM.

ब्राह्मण्यं प्राप्य लोकेऽस्मिन् मूको बधिरो यदि ।
न च क्रामति संसारात्स खलु ब्रह्महा भवेत् ॥ १ ॥

अप्येतियोऽशनायादीन्विचारेण निरूप्यते ।
क्षुधादिसाक्षी तस्यास्य ब्रह्मत्वं केन वार्यते ॥ २ ॥

नन्वेक आत्मा मूढानां विदुषां चेति ते मतम् ।
उक्तोर्मिषट्के तत्त्वं तत्पतं चान्यतत्कथम् (?) ॥ ३ ॥

अविचाराविचाराभ्यां यथा सर्पत्वरज्जुवत् ।
तथाचात्मन्यसंसारे भावाभावावितीर्यताम् ॥ ४ ॥

क्षुत्पिपासे प्राणधर्मौ शोकमोहौ तु मानसे ।
जरामृत्यू स्थूलदेह आत्मधर्मो न कश्चन ॥ ५ ॥

प्राणसंचारबाहुल्याद्गमनादिश्रमे सति ।
क्षुत्पिपासाजनिस्तेन प्राणधर्मत्वमेतयोः ॥ ६ ॥

इष्टस्य वस्तुनोऽसिद्धौ चेतसो यानवस्थितिः ।
स शोको मनसो धर्मो मोहश्च विषयभ्रमः ॥ ७ ॥

जरा देहस्य शैथिल्यं मृत्युः प्राणवियुक्तता ।
ते सर्वे ह्यात्मनि भ्रान्त्या कल्पिता व्योमनैल्यवत् ॥ ८ ॥

॥ अनुभवसोपानम् ॥

7767. ANUBHAVASOPĀNAM.

श्रीरस्तु ।

शास्त्राचार्योपदेशेन तर्कैः शास्त्रानुसारिभिः ।
सर्वसाक्षितयात्मानं सम्यङ् निश्चित्य सुस्थिरम् ॥ १ ॥

स्वात्मनोऽन्यतया भातं समस्तमविशेषतः ।
स्वात्ममात्रतया बुद्ध्वा पुनः स्वात्मानमद्वयम् ॥ २ ॥

शुद्धं ब्रह्मेति निश्चित्य स्वयं स्वानुभवेन च ।
निश्चयं च स्वचिन्मात्रे विलाप्याविक्रियेऽद्वये ॥ ३ ॥

विलापनं च चिद्रूपं बुद्ध्वा केवलरूपतः ।
स्वयं तिष्ठेदयं साक्षाद्ब्रह्मवित्प्रवरो मुनिः ॥ ४ ॥

स्वस्वप्नः स्वप्रबोधेन स्वमात्रं भासते यथा ।
तथा जाग्रत्प्रपञ्चोऽपि स्वयं स्वात्स्वप्रबोधतः ॥ ५ ॥

स्वस्वप्नः स्वातिरेकेण यथा नास्ति तथैव च ।
स्वजाग्रत्स्वातिरेकेण नास्ति तेनाहमद्वयः ॥ ६ ॥

सोपानक्रमतो लब्धं विज्ञानं यस्य सुस्थिरम् ।
तस्य मुक्तिः परा सिद्धा सत्यमेव मयोदितम् ॥ ७ ॥

॥ पादुकापञ्चकम् ॥

7768. PĀDUKĀPAÑCAKAM.

अथ पादुकापञ्चकम् ।

जगज्जनिस्थेमलयालयाभ्या-
मगण्यपुण्योदयभाविताभ्याम् ।
त्रयीशिरोजातनिवेदिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ १ ॥

विपक्षमस्तोमविकर्तनाभ्यां
विशिष्टसंपत्तिविवर्धनाभ्याम् ।
नमज्जनाशेषविशेषदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ २ ॥

समस्तदुस्तर्ककलङ्कपङ्का-
पनोदनप्रौढजलाशयाभ्याम् ।
निराश्रयाभ्यां निखिलाश्रयाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ३ ॥

तापत्रयादित्यकरार्दितानां
छायामयीभ्यामतिशीतलाभ्याम् ।
आपन्नसंरक्षणदीक्षिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ४ ॥

यतो गिरोऽप्राप्य धिया समस्ता
ह्रिया निवृत्ताः सममेव नित्याः ।
ताभ्यामजेशाच्युतभाविताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ५ ॥

ये पादुकापञ्चकमादरेण
पठन्ति नित्यं प्रयताः प्रभाते ।
तेषां गृहे नित्यनिवासशीला
श्रीदेशिकेन्द्रस्य कटाक्षलक्ष्मीः ॥ ६ ॥

इति श्रीगुरुपादुकापञ्चकं संपूर्णम् ।

श्रीरामचन्द्रार्पणमस्तु ॥

॥ वैराग्यपञ्चकम् ॥

7769. VAIRĀGYAPAÑCAKAM.

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षी शिवोऽहम् ।
नित्यानन्दस्तुरीयो विगतकलिमलः सर्वसाक्षी शिवोऽहम् ॥ १ ॥

नाहं मनुष्यो न च देवयक्षो
न ब्राह्मणक्षत्रियवैश्यशूद्रः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुर्न चाहं निजबोधरूपः ॥ २ ॥

शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते ।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम् ॥ ३ ॥

अहमेव परं ब्रह्म मदन्यन्नास्ति किंचन ।
प्रत्यगद्वय एवाहं शिव एव न संशयः ॥ ४ ॥

प्रत्यगात्मपरानन्दगुरोः सर्वस्य साक्षिणः ।
वासुदेवेन्द्रयतिनः कृतार्थोऽहमनुग्रहात् ॥ ५ ॥

इति तत्त्वश्लोकम् ।

इति वैराग्यपञ्चकम् ॥

निरवधिनिजबोधोऽहं

निरुपमनिःसीमसत्त्वमात्रोऽहम् ।

परमानन्दघनोऽहं

परशिव एवाहमनिशमभयोऽहम् ॥ ११ ॥

APPENDIX A.

INDEX OF AUTHORS.

(Vol. XIII.)

VIII

APPENDIX B.

INDEX TO OWNERS OF MSS.

(Vol. XIII)

APPENDIX C.

INDEX TO SCRIBES OF MSS.

(Vol. XIII)

NAMES		NUMBERS.
Anantadeva	...	7685
Kṛṣṇānandaśiṣya	...	7516
Nañjuṇḍa	...	7562
Periyaperumāḷappan	...	7605
Bālakṛṣṇendrabhikṣu	...	7600
Bālarāmatīrtha	...	7552
Bāḷa son of Śeṣabhaṭṭa	...	7652
Yajñanārāyaṇa	...	7622
Raghunāthabhaṭṭa	...	7436
Raṅgasvāmi	...	7640
Rāma	...	7570
Rāmaputra	...	7606
Rāmabhaṭṭa	...	7681
Veṅkaṭaraṅgayya	...	7623
Veṅkaṭeśvarasūri	...	7581

APPENDIX D.

INDEX TO DATED MSS.

(Vol. XIII)

	Dates.	Numbers.
A. D.	1602 —	7545
„	1686 —	7441
„	1720 —	7599

APPENDIX E.

INDEX OF WORKS NOTICED IN Vol. XIII.

* The asterisks indicate that the work is not available in print.

Names.	Numbers.
Ātmatattvam *	7762
Ātmaparīkṣā *	7525
Ātmavidyāvilāsaḥ	7684-93
Ātmānātmapañcakośavivekaḥ *	7725
Ātmānātmavivekaḥ *	7668
Ātmānusandhānam *	7746 & 47
Ānandaprakaraṇavyākhyā *	7608
Ānandabrahmalakṣaṇam *	7719
Iṣṭasiddhiḥ	7544
Upadeśasāraḥ *	7620
Upadeśaśikhāmaṇiḥ *	7745
Ūrmiṣaṭkam *	7766
Kutarkanirāsaḥ *	7609
Khaṇḍanakhaṇḍakhādyavyākhyā *	7545
Guruśiṣyakathanam *	7672
Caturmatasārasaṅgrahaḥ *	7628
Cidacidgranthivivekaḥ *	7670 & 71
Jīvanmuktalakṣaṇam *	7758
Jīvanmuktivivekaḥ	7418-7419
Jīvabrahmābhedaḥ *	7642
Jñānaprabodhamañjarī *	7666 & 67
Jnānabodhaḥ *	7729
Jñānāṅkuśam (Savyākhyam) *	7661 & 62
Tattvacandrikā *	7528 & 29
Tattvaprakriyā *	7546
„ Vyākhyā—Sampradāyanirūpaṇam *	7547
Tattvapradīpikā	7448-50
Tattvabodhaḥ	7682 & 83
Tattvampadārthaśodhanaprakāraḥ *	7507

NAMES.	NUMBERS.
Paramahamsacaryā *	7614-18
Paramārthasāraḥ	7554-57
" Vyākhyā	7558 & 59
Pādukāpañcakam *	7768
Praṇavadīpikā *	7553
Praṇavārthaprakāśikā *	7750
" " Vyākhyā *	7619
Pramāṇamālāvyākhyā-Tātparyaṭīkā *	7451 & 52
Prāṇāyāmaprakāraḥ *	7781
Bahuvidhamatakhaṇḍanam *	7684
Bhikṣvaṣṭakam *	7761
Bodhaprakriyā *	7697
Bodhasāraḥ *	7625
Brahmanirāmayāṣṭakam *	7765
Brahmavidyāsudhārṇavaḥ *	7560
Brahmānandavilāsaḥ *	7696
Bhedadhikkāraḥ	7508-10
" Vyākhyā-Satkriyā	7511-13
" Ṭippaṇī *	7514
" Upanyāsaḥ *	7515
Madhvatantramukhamardanam	7469-71
Madhvamatavidhvamsaḥ *	7561
Madhvamatakathanam *	7660
Manolayaprakaraṇam *	7763 & 64
Mahāvākyadīkṣā *	7674
Mahāvākyamantraḥ *	7726
Mahāvākyaratnāvalī	7563 & 64
Mahāvākyavivaraṇam	7565 & 66
" " *	7739-41
" Vyākhyā *	7567

NAMES.	NUMBERS.
Mahāvākyavivekaḥ	7721
„ „ Vyākhyā	7722 & 23
Mahāvākyārthadarpaṇaḥ	7562
Mahāvākyārthabodhaprakāraḥ *	7727 & 28
Muktisopānapaddhatiḥ *	7610
Mokṣasāmrājyalakṣmītantram *	7568 & 69
Rāmānujamatakhaṇḍanam *	7659
Laghuvāsudevamananaprakaraṇam	7571 & 72
Vākyaprakaraṇam *	7573
Vākyasudhākaraḥ *	7664
Vākyāmṛtam *	7574
Vādanakṣatramālikā	7629 & 30
Vāsudevamananam	7570
Vivekasindhuḥ—Paramārthabodhaḥ *	7580-82
Vedāntatattvasāraḥ *	7575
Vedāntanāmaratnasahasravyākhyā *	7592-94
Vedāntaparibhāṣā	7595-99
„ Vyākhyā-Śikhāmaṇi	7600-05
Vedāntaprakaraṇam *	7611
Vedāntavādārthaḥ *	7516-18
Vedāntavilāsaḥ *	7679
Vedāntaviṣayakaślokasaṅgrahaḥ	7703
Vedāntasaṅgrahavyākhyā-Prakāśikā *	7622 & 23
Vedāntasaṃjñāprakaraṇam *	7626
Vedāntasāraḥ (Sadānanda)	7576-87
„ Ṭīkā—Subodhinī	7588
Vedāntasāraḥ (Dattātreya) *	7589-91
Vedāntasāravārttikarājasaṅgrahaḥ *	7736
Vedāntopaniṣad *	7612

ERRATA ET ADDENDA. of VOL. XIII

Page	Line	For	Read.
5491	Last line	सुक्के	मुक्के
5492	19	Nārārayan	Nārāyan
5494	17	सर्वो	सर्वैः
5497	15	स्थाया	स्थाय
5510	19	or	of
5516	22	Add 'is' before identical	
5521	5	7456	7455
5528	23	Printed	Not printed
5559	8	व्याक्यां	व्याख्यां
5561	12	वक्त्रतो	वक्त्रता
5577	20	मातृत्यादि	मातृत्वादि
5608	17	कळ	[कळ]
5607	5	सत्याभि	सत्वाभि
5617	2	बोधितां	बोधिता
5628	16	द्यातते	द्योतते
5629	12	Paper	Palm leaf
,,	,,	Sheets	Leaves
,,	17	यत्त	तत्
5631	2	Delete 'not'	
5642	4	संज्ञा	संज्ञ

Page	Line	For	Read
5647	6	वादी	वादिनः
5650	15	P. S.	?
5657	4	युत	युव
5660	11	व्यासाद्यो	व्यासाद्यैः
,,	14	सद्यक्श्युता	सर्वेश्रुता
5664	22	गोपः	गोपालः
5665	18	7574	7571
5676	15	सन्यंक्	सम्यंक्
5680	8	आत्मनेना	आत्मनैवा
,,	9	नराकार	निराकारं
5686	18	Delete ' दित्या '	
		Page 5785	5758
5825	19	6798	7698
5856	10	7772	7727
5863	15	culled	called
5870	8	प्रवित	प्रविततं
5877	4	व्रह्मा	ब्रह्मा
5878	19	छिद्र	छिद्र
5880	11	मन्तव्य	मन्तव्य
5881	3	पश्च	पश्च
5884	6	ऐष	एष
,,	18	इदभिति	इदमिति
5885	21	ममपश्यत्	मपश्यत्
5891	last line	वध्द्वा	बद्ध्वा

Page	Line	For	Read
5893	4	स्बप्ने	स्वप्ने
5896	6	पूर्बो	पूर्वो
5897	19	विश्व	विश्व
,,	last line	सर्बे	सर्वे
5902	16	शक्तादयो	शक्रादयो
5910	15	मावना	भावना
5924	17	स्बीय	स्वीय
5925	8	रटन्त	रटन्तः
5925	16	श्रिन्तां	भ्रिन्तां
5926	10	ब्रह्मणे	ब्रह्मणे
5927	13	मूल	मूल
5931	5	दीनबि	दीन्वि
5934	8	मेब	मेव
5935	4	मृही	गृही
5936	15	साक्ष्यहं	साक्ष्यह